Gadadharipancalaksani

॥ श्रीः ॥

गादाधरीपञ्चलक्षणी ।

न्तामणि-दीधिति-गादाधरी-कृष्णंभट्टीय-

न्यायरत्नेति न्यायपञ्चग्रन्थीसंग्रहः ।

सिंहव्याघ्रलक्षणसार्वभौमपरिष्कारोपेतः ।

शाकः १८४१, सन १९१९.

[illegible] ।

GÂDÂDHARÎ-PAÑCHALAKSHAṆÎ

CONTAINING THE FIVE NYAYA WORKS,

Chintâmani, Dîdhiti, Gâdâdharî, Krishṇambhattîya,
and Nyâyaratna.

WITH AN APPENDIX,

SÂRVABHAUMA-PARISHKÂRA,

EDITED BY

TARKA-VÂCHASPATI BHIMÂCHÂRYA OTTANGÂḌKAR.

PUBLISHED BY

PÂNDURANG JÂWAJÎ,

PROPRIETOR OF "NIRNAYA-SÂGAR" PRESS,

BOMBAY.

1919.

Price 1½ Rupees.

PUBLISHER:—Pandurang Jawaji, } Nirnaya-Sagar Press,
PRINTER:—Ramchandra Yesu Shedge, } 23, Kolbhat Lane, Bombay.

॥ श्रीः ॥

गादाधरीपञ्चलक्षणी ।

चिन्तामणि–दीधिति–गादाधरी–कृष्णंभट्टीय-
न्यायरत्नेति न्यायपञ्चग्रन्थीसंग्रहः ।

सिंहव्याघ्रलक्षणसार्वभौमपरिष्कारोपेतः ।

अयं

तर्कवाचस्पतिबिरुदमण्डितविद्वद्वर-
भीमाचार्यओट्टंगाडकरइत्येतैः
संशोधितः ।

मुम्बय्यां

पाण्डुरङ्ग जावजी इत्येतैः
स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये
मुद्रयित्वा प्रकाशितः ।

शाकः १८४१, सन १९१९.

मूल्यं [illegible] ।

श्रीगुरुभ्यो नमः ।

विज्ञप्तिः—

अथोपक्रम्यते—रघुनाथभट्टाचार्यतार्किकशिरोमणिकृतशिरोमण्यपरनामकदीधितेष्टीकां गदाधरभट्टाचार्यचक्रवर्तिप्रणीतां संगतिनाम्नीं **गादाधरीं** मुद्रयित्वा प्रकाशयितुम् । इयं हि वाराणस्यां म्हैसुरनगरे च मन्ये कैश्चिदेकैकमेव पुस्तकमालम्ब्य मुद्रितेति । यतस्तदीयटिप्पणीकृष्णंभट्टीयादिषु गृहीतवाक्यानां कुत्रचिदभावः पाठान्तराभावश्च पूर्वोक्तशङ्कां द्रढयतः । किंच तत्रतत्र केवलं गादाधरी कुत्रचित् एकविधा टिप्पणी अन्यत्र च भिन्नेति विशकलय्य मुद्रितास्ति । तदेतदालोच्याध्यापकाध्येतृसौकर्याय नानादेशस्थबहुलपुस्तकावलम्बनेन सुपरिशुद्धपुस्तकप्रकाशनकामैर्निर्णयसागरमुद्रणालयप्रधानविद्वद्वर्यैः **पणशीकरोपाह्व—वासुदेवशास्त्रिमहोदयैरेत**न्मुद्रापणाय सन्नियुक्तः तैरेव महाशयैः प्रदत्तं मुद्रणालयग्रन्थभाण्डागारस्थमेकं पुस्तकमलभे । तत्पुस्तकान्ते च काश्यां लिखितमिति वर्तते । परंतु तत्र लेखकानवधानजनितानुपयुक्तासंमतार्थपाठभेदप्रदर्शनं विद्वदायासफलकं मन्यमानेन मया तदेव न सर्वत्रोपयोजितम् । तदनु प्रवृत्ते परिशुद्धपुस्तकान्वेषणे 'सातारा'नगरनिवासिनां विद्वद्वरगजेन्द्रगडकरोपाह्व—**बाळाचार्याणां** परंपरागतं परिशुद्धं संपूर्णं जीर्णं चैकं पुस्तकमासादितम् । यत्प्रतिलिपिर्मुद्रणार्थमुपायोज्यत । **अपरंच** 'नडियाद' नगरपुस्तकभाण्डागारस्थं **तनसुखराममहाशयै**रानाय्य दत्तं नातिशुद्धं प्राचीनं सिंहव्याघ्रलक्षणान्तं च । अन्यच्चास्मदीयं परम्परागतं परिशुद्धं **चतुर्थादर्शपुस्तकम्** । किंच मुद्रितपुस्तकद्वयं । एवं सदीधितिगदाधर्याः **षडादर्शपुस्तकान्यासादितानि** । अथ च तट्टीकान्वेषणकाले तैरेव गजेन्द्रगडकरोपाह्व—**बाळाचार्यमहाशयैः** पञ्चलक्षण्याः **कृष्णंभट्टी**, तथा आसार्वभौमपरिष्कारं **न्यायरत्नटीका** च दत्ता । तथास्मदीयं शुद्धं टीकापुस्तकद्वयं च मुद्रणायोपयुक्तम् । किंच **तनसुखराममहाशय**दत्ता सिंहव्याघ्रलक्षणपर्यन्ता **न्यायरत्नटीका** च । अपरा मुद्रित-**कृष्णंभट्टीटीका,** तथा

मुद्रित-न्यायरत्नटीकाद्वयं चेति टीकायाः पञ्चादर्शपुस्तकानि लब्धानि । तत्र अस्मदीयपुस्तकस्थपाठस्य बाळाचार्यपुस्तकपाठस्य च परस्परं भेदः प्रायशो न दृष्टः । अन्यान्यपुस्तकपाठान्तराणि तु तत्रतत्र दत्तान्येव ।

महासागरायमाणगादाधरीप्रवेशनौकायमानपञ्चलक्षणी-सिंह-व्याघ्रादिग्रन्थस्थानामनेकवारं तत्रतत्र प्रयुक्तानां विषमपदानां परिष्कारकरणे व्याकरणनिष्णातगजेन्द्रगडकरोपाह्वसेतुमाधवाचार्य-महाशयैः प्रेरितेन तथा तैरेव विरचितानुकूल्येन संशोधनादिकर्मणि बद्धपरिकरैः **पणशीकरवासुदेवमहाशयैः** समेधितोत्साहेन मया विषमपदानां तत्तत्स्थलानुकूलतया कुत्रचित्सर्वसाधारणतया च परिष्काराः कृतास्ते चान्ते संयोजिताः सन्ति । निवेशितश्च विषय-सूचीक्रमः प्रारम्भे ।

इत्थं सर्वसाहित्यसंमेलनपुरःसरं समारब्धं मुद्रणमस्यास्माभिः । अत्रान्तरे च संस्कृतभाषोद्धरणबद्धकक्षाः निर्णयसागरमुद्रणालया-ध्यक्षाः श्रीमन्तः **तुकारामश्रेष्ठिश्रेष्ठाः** निष्कारणवैरिणा प्रकृति-कुटिलेन दैवहतकेन करालकालपरिपाकप्रसृमरव्याधिना स्वर्लोकमितो नीताः । न जाने किमिति वा निष्करुणत्वमेतदकारणमाविष्क्रियते भारतवर्षे विधात्रेति । यदनेन प्रत्यहमेव करालकालवदनकुहरे समर्प्यन्ते तानि तानि भारतवर्षीयाणि जगदुपकृतिपराणि सद्रत्नानि । शोचामश्चैषां निधनेन भगवत्याः स्तोकतमोच्छ्वसितमात्रावशिष्टजी-विताया गीर्वाण्या वाण्या दुर्भागधेयविलसितानि । योजयतात्समु-चितेन पदेन **श्रीमत्तुकारामश्रेष्ठिमहाभागं** तदभीष्टा देवतेति संप्रार्थ्यतेऽस्माभिः । अनन्तरं च तत्स्थानापन्नैस्तदन्यूनयोग्यताकै-स्तदनुजैः **श्रीपाण्डुरङ्गश्रेष्ठिवरैः** पुनः प्रेरितः कार्यमकरवम् । तदेवं महान्तमायासमनुभूय संपादितेऽस्मिन्कार्ये गादाधरीदुरूहतायाः सुप्रसिद्धतया मन्मतेरपाटवेन सीसकाक्षरयोजकदोषेण च सुलभानि स्खलितानि क्षाम्यन्तो गुणैकदृशः शास्त्ररसिका आस्वादयन्तु प्राची-नशास्त्रप्रतिपादनशैलीसमालोचनसमुत्थं प्रमोदं प्रसीदतु च सर्वा-न्तर्यामी जगदीश्वरो भगवाननेन व्यापारेणेति शम् ॥

विद्वदनुचरो भीमाचार्यः

शोधनसंकेतदिग्दर्शनम्—

अत्र सर्वत्र बाळाचार्यमहाशयपुस्तकपाठ एवादृत इति तदीयपाठान्तरं प्रायशो न दत्तं, परंतु यत्र क्वचिद्दत्तं तत्र "ब. पु." अथवा केवलं "ब. पा." इति वर्तते। अनन्तरं ह्मैसूरदेशादानीतस्य मदीयपुस्तकस्य पाठप्रभेदाः "मै. पु." इति दत्ताः। अथ च तनसुखराममहाशयपुस्तकपाठाः "त. पा." इति निवेशिताः। निर्णयसागरीयग्रन्थभाण्डागारपुस्तकपाठान्तराणि "का. पा." इत्युल्लिखितानि सन्ति॥

श्रीमद्गादाधरीपञ्चलक्षणीविषयानुक्रमणिका ॥

समाप्ता चेयं विषयानुक्रमणी ।

श्रीहयग्रीवाय नमः ।

तत्त्वचिन्तामणिः ।

पञ्चलक्षणीदीधितिसहितः ।

व्याप्तिग्रहोपायश्च वक्ष्यते । नन्वनुमिति-हेतुभूतव्याप्तिज्ञाने का व्याप्तिः । नतावदव्यभिचरितत्वम् । तद्धि न साध्याभाववदवृत्तित्वम् । साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम् । साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम् । सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम् । साध्यवदन्यावृत्तित्वं वा । केवलान्वयिन्यभावात् ॥ इति तत्त्वचिन्तामणौ पञ्चलक्षणी ॥

सर्वमिदं सति व्याप्तिनिश्चये स्यात् । स एव न संभवति उपायाभावादित्यत आह—व्याप्तीति । समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते—नन्वित्यादिना । अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह—साध्यवद्भिन्नेति । साध्यवद्भिन्ने यः साध्याभावस्तद्वदवृत्तित्वमित्यर्थः । कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह—साध्यवदिति । हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह—सकलेति । साकल्यं साध्याभाववति साध्ये च बोध्यम् । साध्याभावो वा, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः । तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः । नवा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः । अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेः । व्यभिचारिणि चाव्याप्यवृ-

त्तावतिव्याप्तेर्वारणायाभावद्वये प्रतियोगिवैयधिकरण्यं बोध्यम्। हेत्वभावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो बोध्यः। तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यम्। तेन द्रव्यत्वादौ साध्ये विशिष्टसत्वादौ नाव्याप्तिः। न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्वादावतिप्रसङ्गः। यत्रैकव्यक्तिकं साध्यं विपक्षो वा, तत्र निर्धूमत्वव्याप्ये, तत्वेन साध्ये, निर्वह्नित्वादौ चाव्याप्तिः। तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह—साध्यवदिति। अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम्। नहि भवति नीलो घटो घटादन्य इति॥ इति दीधितौ पञ्चलक्षणी समाप्ता॥

श्रीहयग्रीवाय नमः।

तत्त्वचिन्तामणिः।

सिंहव्याघ्रलक्षणदीधितिसहितः।

नापि साध्यासामानाधिकरण्यानधिकरणत्वं, साध्यवैयधिकरण्यानधिकरणत्वं वा। तदुभयमपि साध्यानधिकरणानधिकरणत्वम्। तच्च तत्र यत्किंचित्साध्यानधिकरणाधिकरणे धूमे चाप्रसिद्धम्॥ इति तत्त्वचिन्तामणौ सिंहव्याघ्रलक्षणे॥

नापीति। साध्यमसमानाधिकरणं यस्य, यदधिकरणानधिकरणं साध्यं तत्त्वं, साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम्, साध्यनिष्ठाधेयत्वनिरूपकाधिकरणवृत्तित्वमिति यावत्। तदनधिकरणत्वमित्यर्थः। साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसंगः। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः। तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः। साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणत्वं चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तमपहाय स्वयमेकोत्त्यानूद्य दूषयति—तदुभयमपीति। साध्येत्यादेः, साध्यं यदधिकरणानधिकरणं तत्त्वाभावः, साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः। तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिध्या, नानाव्यक्तिसाध्यके च एकसाध्यव्यक्ति[1]निष्ठाधेयत्वानिरूपकत्वं साधना[2]धिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः। क्वचिद्व्यभिचारिण्यतिव्याप्ति[3]श्चाद्ये। द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको बोधो विवक्षितः तदा केवलान्वयिनि यदि च यत्किंचित्साध्यवद्व्यक्तिभेदः तदा नानाधिकरणसाध्यके सर्वत्राव्याप्तिः॥ इति दीधितौ सिंहव्याघ्रलक्षणे॥

१ व्यक्तिका. पु. ना.। २ अधिकरणत्वं का. पा.। ३ प्रसंगः का. पा.।

अथ दीधितौ सार्वभौमपरिष्कारः ।

केचित्तु । साध्येति । साध्यासामानाधिकरण्यं हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणे, तेनैव संबन्धेन साध्यवद्वृत्तित्वा(स्या)भावस्तदधिकरणभिन्नत्वमर्थः । तेन धूमस्य स्वावयवे संयोगेन वह्निमतिच समवायेनावृत्तावपि न क्षतिः । तादृशाभावश्च तत्रैव संबन्धान्तरेण वर्तमाने सुलभः । व्यभिचारिण(स्तु)श्च व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्वम् । सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्र[1]तीतेः । नचैवं विशि[2]ष्टसत्वेऽव्याप्तिः । विशिष्टस्यातिरिक्तत्वात् । [3]अनतिरेके तु विशेषणविशेष्यसंबन्धस्यैव परंपरया व्या(प्त)प्यत्वात् । केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः । तच्चिन्त्यम् । सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमिति प्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परंपरासंबन्धेन सामानाधिकरण्यस्य वा अभावं गुणेऽवगाहते, नतु सत्तायामेव द्रव्यवृत्तित्वाभावं । सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादिसर्वजनप्र(सिद्ध)प्रतीतिबाधितत्वात् । बाधकाभावात्तु संयोगतदभावयोरवच्छेदकभेदेन एकत्र प्रतीत्या तदुभयोरेकत्र प्रसिद्धिः । अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारिण्यतिप्रसंगाच्च । तत्र सामानाधिकरण्याभावस्य प्रत्यक्षासंभवेनासिद्धेः। नच तदभाववद्वृत्तित्वेन तत्र तदनुमेयं तद्वद्वृत्तिभिन्नत्वस्योपाधित्वात्। किंचेदमिदानीमिति प्रतीतिनियामकविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः । तेन संबन्धेनाधिकरणे काले तेन संबन्धने साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः ॥

इति श्रीमद्रघुनाथभट्टाचार्यशिरोमणिविरचितायां शिरोमण्याख्यतत्त्वचिन्तामणिव्याख्यायां दीधित्यपराख्यायां सार्वभौमपरिष्कारः समाप्तः ॥

---

१ अनुभवात् का. पा. २ गुणकर्मान्यत्वविशिष्ट का. पा. ३ अनतिरिक्तत्वे तु का. पा.

॥ श्रीः ॥

गदाधरीपञ्चलक्षणी ।

चिन्तामणि-दीधिति-गदाधरी-कृष्णंभट्टीय-न्यायरत्नेति न्यायपञ्चग्रन्थीसंग्रहः

सिंहव्याघ्रलक्षणसार्वभौमपरिष्कारोपेतः ।

सर्वमिदं सति व्याप्तिनिश्चये स्यात् । स एव न संभवति उपायाभावादित्यत आह—व्याप्तीति ।

श्रीगुरुभ्यो नमः ॥ **सर्वमिदम्** । अनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनम् । व्याप्तिनिश्चये सतीत्यन्वयः ॥ **स एव** व्याप्तिनिश्चय एव । **न संभवति** नोत्पत्तुमर्हति । **उपायाभावात्**

कृष्णंभट्टीयं ।

श्रीः ॥ चार्वाकेण धूमत्वावच्छेदेनैवाप्रामाण्यं साधनीयं नतु तत्सामानाधिकरण्येन सिद्धसाधनप्रसङ्गात् । एवंच नैयायिकैस्तत्पराजयार्थं तत्सामानाधिकरण्येनैव प्रामाण्यसाधनेनापि अवच्छेदकावच्छेदेन प्रामाण्यानुमितिसंभवादुभयोरप्येकमेव धूमज्ञानं पक्षः । तत्र नैयायिकानां प्रमितिजनकतावच्छेदकरूपत्वं हेतुः । तच्च व्याप्तिनिश्चयत्वमेव भवति । तत्रासिद्धिं बौद्धः शङ्कते—सर्वमिदमिति । गादाधर्याम् । **अनुमानं** धूमज्ञानं । **युक्तिः**

न्यायरत्नं ।

श्रीः ॥ **न संभवति** नोत्पत्तुमर्हतीति । अत्र संपूर्वकभूधातोरुत्पत्तियोग्यत्वरूपमर्थमभिसंधायोक्तमुत्पत्त्यर्हत्वं नास्तीति । व्याप्तिनिश्चयश्च निषेद्धुमशक्यः सिद्ध्यसिद्धिभ्यां व्याघातात् । नचोत्पत्तियोग्यत्वाभावोऽपि वक्तुमशक्यश्चार्वाकमते धर्म्यप्रसिद्धेरिति वाच्यम् । व्याप्तिविषयकत्वसंशयान्यत्वज्ञानत्वानां प्रत्येकं प्रसिद्धानामेकजन्यतावच्छेदकत्वाभावस्यैव विवक्षितत्वात् । व्याप्तिविषयकत्वसंशयान्यत्वज्ञानत्ववृत्तिसमुदायत्वं जन्यतावच्छेदकतापर्याप्त्यनवच्छेदकमिति परमार्थः । नच सामान्यतो जन्यतावच्छेदके संशयान्यत्वस्य वक्तुमशक्यत्वाद्व्याप्त्यंशे संशयान्यत्वं वक्तव्यं । तच्च व्याप्त्यभावनिष्ठप्रकारत्वानिरूपित-

निश्चायकाभावात्[1]। अनुमानप्रामाण्योपपादकतया व्याप्तिग्रहोपायस्यै-

कृष्णंभट्टीयं।

व्याप्तिनिश्चयत्वरूपहेतुः। **निश्चायकाभावादिति**। सामग्र्या दुर्वचत्वादिति भावः। एवंच व्याप्तिनिश्चयस्यैवोत्पत्तुमर्हतया सुतरां नैयायिकोक्तहेत्वप्रसिद्धिरिति भावः। केचित्तु नन्ववच्छेदक [कं] रूपमन्तरेण न प्रमाकरणत्वसंभवः। तत्र व्याप्तिनिश्चयत्वमप्रसिद्धम्। अन्यच्चानतिप्रसक्तं दुर्वचम्। तथाचानुमानप्रामाण्यं दुरुपपादम्। प्रत्यक्षादिप्रामाण्यं त्वनायत्या स्वतोग्राह्यं स्वीकार्यम्। अनभ्यासदशापन्नज्ञाने दोषादिवशात्तादृशग्रह इत्यत आह— **व्याप्तीति** मूलमवतारयन्ति। केचित्तु व्याप्तिस्वरूपे विशिष्टपरामर्शनिर्वाहकत्वेन व्याप्तिविशिष्टेत्यादिलक्षणोपोद्घातः संगतिः। अनुमितिहेतुज्ञान इति मूलतोऽपि तथैव लाभात्। नच यां कांचिदनुमितिलक्षणे व्याप्तिस्वरूपस्याघटकतया न तदवतार इति वाच्यम्। मणिकारनिरूप्ये व्याप्तिस्वरूपे तन्निरूपितार्थसंगत्यपेक्षणादित्याहुः। एवंसति पक्षधर्मता(विशेषणता)पन्नहेत्वंशे अनुमितिजनकज्ञानविषयरूपे व्याप्तिपदार्थे पौनरुक्त्यप्रसङ्गेन यथाश्रुतमूलार्थान्वयानुपपत्तिः। प्रामाण्यनिरूपणाव्यवहितोत्तरनिरूपणौपयिकसंगत्यलाभश्चेति समारब्धेत्यादिकमुक्तम्। तथाचानुमानप्रामाण्योपोद्घातसंगत्या व्याप्तिस्वरूपनिरूपणमिति भावः। एतेनानुमितिहेतुज्ञान इति मूलार्थोऽपि ज्ञा[पि]तः। तथाहि—**अनुमितिः** अनुमाने प्रामाण्यव्यवस्थितिः। तादर्थ्यात्तज्जनकशब्दप्रयोगः। परीक्षापदार्थभूतः। तत्र हेतुः—प्रयोजकं जनकजनकं ज्ञानं करणव्युत्पत्त्या निरूपणं। विषयत्वं सप्तम्यर्थः। तथाच निरुक्तपरीक्षाजनकीभूतोपायनिरूपणजनकनिरूपणविषय इत्यर्थः। केचित्तु हेतुशब्दो जनकपर एव। तथाच निरुक्तपरीक्षाजनकीभूतोपायनिरूपण इत्येवार्थः। एवं चोपायनिरूपण एवोपोद्घात[रूप]संगतिः सूच्यते। व्याप्तिस्वरूपनिरूपणे तु न प्रामाण्यसंगत्यपेक्षा। किंतूपायप्रतिपादनार्थतया तत्प्राथम्यमात्रम्। अतएव तदौपयिकनिरूपणकत्वार्थिका सप्तमी। तथाच व्याप्तिस्वरूपनिरूपणपूर्वकोपायनिरूपण एवोपोद्घात इत्याहुः। ननु समारब्धेत्यादिनिदानमित्यन्तं दीधितिकृदुक्तविशेषणं किमर्थम्। व्याप्तिस्वरूपनिरूपणमारभत इत्येतावन्मात्रस्यैव सम्यक्त्वादित्यत आह—**अनुमानेति**। प्र-

न्यायरत्नं।

व्याप्तिनिष्ठप्रकारतानिरूपितविशेषताकत्वरूपं चार्वाकमतेऽप्रसिद्धमेवेति वाच्यम्। व्याप्त्यभावाप्रकारकत्वस्यैव तदर्थत्वात्।

अथवा पक्षताग्रन्थोक्तत्रितयसंबन्धेन व्याप्तिविषयताविशिष्टविषयिताशून्यत्वं विवक्षणीयं। तच्च घटज्ञानादौ प्रसिद्धमिति न कश्चिद्दोषः।

---

१ व्याप्तिनिश्चाय त. पा.

समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रति-

वेदानीमभिधातुमुचितत्वात्, वक्ष्यत इत्यनेन तत्प्रतीक्षां विधाय व्याप्तिस्वरूपनिरूपणमयुक्तमित्याशङ्कां परिजिहीर्षुस्तत्प्राथम्ये तस्य व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वं (रूपं)[1] वीजं दर्शयन्नन्वित्यादिग्रन्थमवतारयति—**समारब्धेति** । व्याप्तिग्रहोपायाकथनेन प्रामाण्यव्यवस्थापनस्य अनिष्पन्नत्वात्समारब्धेति परीक्षाविशेषणम् । परीक्षा च

कृष्णंभट्टीयं ।

कृतं यदनुमानप्रामाण्यहेत्वसिद्धिनिरासद्वारा तत्साधकत्वरूपप्रकृतोपपादकत्वमपास्येत्यर्थः । नचानुमानप्रामाण्यसिद्ध्युपयोगिपरामर्शस्वरूपनिर्वाहकत्वेन तदुपोद्घातः कुतो न दर्शित इति वाच्यम् । उपायाभिधानप्रतीक्षाया निर्बीजत्वापत्तेः । **इदानीं** व्याप्तिस्वरूपनिरूपणात्प्राक् । **उचितत्वादिति** । उपोद्घातज्ञानादेव जिज्ञासासंभवात् । **तत्प्रतीक्षां** उपायनिरूपणस्य प्रारब्धप्रामाण्यनिरूपणाव्यवहितोत्तरत्वत्यागम् । **तत्प्राथम्ये** व्याप्तिस्वरूपनिरूपणस्य उपायनिरूपणाधिकरणक्षणवृत्तिध्वंसप्रतियोगित्वे । अप्रमाणसाधर्म्येणेत्यादिग्रन्थेन अनुमानप्रामाण्यव्यवस्थापनेन वादिनिरासात् व्याप्तिस्वरूपनिरूपणं व्यर्थमित्याशङ्कानिराकरणार्थं समारब्धेति विशेषणमित्याह—**व्याप्तीति** । **अनिष्पन्नत्वादिति** । निष्पन्नत्वमतीतकृतिवि-

न्यायरत्नं ।

प्रतीक्षां विधायेति । प्रतीक्षा भविष्यत्कालकर्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः । स च व्याप्तिग्रहोपायश्च वक्ष्यत इत्येवंरूपः । **तत्प्राथम्य इति** । तस्य व्याप्तिस्वरूपनिरूपणस्य । प्राथम्ये प्रथमतः कर्तव्यत्वे इत्यर्थः । **तस्य** व्याप्तिस्वरूपनिरूपणस्य । **व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वमिति** । औपयिकत्वं व्याप्तिग्रहोपायप्रतिपादनघटकोपायविषयकप्रतिपत्तिप्रयोजकत्वम् । प्रतिपत्तिश्च व्याप्तिग्रहजनकव्यभिचारज्ञानाभावसहचारज्ञानयोर्व्याप्तिग्रहजनकत्वप्रकारिका । प्रयोजकत्वं च जनकज्ञाने जनकताघटकीभूतजन्यतावच्छेदकविशिष्टज्ञानस्य हेतुतया जन्यतावच्छेदकीभूताव्यभिचारनिश्चयत्वसहचारज्ञानत्वयोर्ज्ञाने घटकीभूताव्यभिचारसहचारज्ञानयोर्हेतुतया परंपरया जनकत्वरूपं बोध्यम् । ननु प्रामाण्यव्यवस्थापनस्याप्रमाणसाधर्म्येणेत्यादिग्रन्थेन समाप्ततया समारब्धेति कथं युज्यते । आसमाप्तेरेव समारब्धत्वव्यवहारादत आह—**अनिष्पन्नत्वादिति** । अपरिसमाप्तेरित्यर्थः । अप्रमाणसाधर्म्येणेत्यादेः परमतनिराकरणपरत्वा"त्समारब्धेति युज्यत" इति शेषः । अनिष्पन्नत्वादित्यस्यानन्तरं "तन्निष्पत्तिरवश्यं संपादनीयेति सूचनाये"ति शेष इति केचित् ।

---

१ रूप का. पाठः

परमतनिराकरणपूर्वकस्वमतस्थापनम् । कारणीभूतेति, प्रतिपादनवि-

कृष्णंभट्टीयं ।

षयत्वं, अतीतत्वं च वर्तमानध्वंसविशिष्टत्वं, विशिष्टत्वं च स्वाधिकरणकालवृत्तिकृतिजन्यक्रियाजन्यफलानुकूलक्रिया । ननु अनुकूलत्वविशिष्टप्रतियोगित्वसंबन्धेन व्याप्तिग्रहोपायकथनस्यानुमानप्रामाण्यव्यवस्थित्यौपयिकतायाः सर्वमिदमिति ग्रन्थेन लभ्यतया तदनुकूलकृतेर्भावित्वात् ।

अथानुमानं न प्रमाणमिति शब्दाद्यनुकूलकृतिध्वंसस्य स्वपदेन ग्रहणासंभवात् । तथाचानुमानप्रामाण्यव्यवस्थापनस्यैव वादिनिरासहेतुत्वं, परंत्विदानीं न तन्निरासो भवति तस्यासिद्धत्वादिति भावः । नच व्याप्तिग्रहोपायश्च वक्ष्यत इति ग्रन्थावतरणव्याप्तिग्रहोपायप्रतिपादनेति दीधितिग्रन्थाभ्यामेवोपायनिरूपणावश्यकतालाभेनार्थत एव समारब्धत्वलाभात्किं तदुपादानेनेति वाच्यम् । तावता मानसबोधे तद्भानलाभेऽपि शाब्दबोधे तद्भानलाभार्थं तदुक्तेः । समित्युपसर्गस्य फलद्योतकत्वं, फलं च अनुमानप्रामाण्यतत्त्वनिर्णयादि, सामान्यतः प्रमाणतत्त्वविवेचनं वा [व्यवस्थितिरेव] । आङ्पूर्वकस्य रभधातोराद्यकृतिरर्थः । आद्यकृतित्वं च स्वविषयककृतिध्वंसासमानकालीनस्वविषयकृतित्वम् । अतीतत्वं विषयत्वं च क्तप्रत्ययार्थः । अतीतत्वं च वर्तमानकालवृत्तिध्वंसप्रतियोगित्वम् । वर्तमानकालश्च नन्वित्यादिशब्दा[प्रयोगा]धिकरणकालः । तथाच वर्तमानकालवृत्तिध्वंसप्रतियोगिनी सफला या आद्यकृतिस्तद्विषयत्वं समारब्धत्वम् । ननु क्तप्रत्ययार्थीभूतविषयत्वे क्तप्रत्ययार्थीभूतातीतत्वान्वितरभधात्वर्थान्वयो न घटते । प्रत्ययानां केवलप्रकृत्यर्थान्वितस्वार्थ[स्यैव] बोधकत्वेन स्वार्थान्वितप्रकृत्यर्थान्वितस्वार्थबोधकत्वासंभवादिति चेन्न । 'प्रतिष्ठितं लिङ्गं पूजये'दित्यादौ वर्तमानध्वंसप्रतियोगिनी या प्रतिष्ठा तत्कर्मीभूतं लिङ्गमित्यन्वयबोधदर्शनेन प्रत्ययाना-[मपि] मेव स्वार्थान्वितप्रकृत्यर्थान्वितस्वार्थान्तरबोधस्यापि स्वीकारात् । नन्वतीतकृतिनिष्ठाद्यत्वघटकस्वपदार्थत्वं न भाव्युपायनिरूपणादेः संभवतीत्यत आह—**परीक्षेति**। परीक्षायाः परमतनिराकरणपूर्वकत्वघटितत्वेन अथानुमानं न प्रमाणमित्यादिग्रन्थस्य परमतनिराकरणानुकूलतया परीक्षारूपत्वं तस्यैव च पदार्थतया तद्विषयककृतेराद्यत्वमिति भावः । **परमतेति** । परमतं पर-

न्यायरत्नं ।

अनिष्पन्नत्वादित्यत्र पञ्चम्यर्थो ज्ञानज्ञाप्यत्वं, तस्य समारब्धत्वेऽन्वयः । निष्पन्नत्वमतीतकृतिविषयत्वं । कृतावतीतत्वं च स्वोत्पत्त्यधिकरणलक्षणवृत्तिकृतिजन्यक्रियाजन्यफलानुकूलव्यापारानुकूलत्वप्रतियोगित्वोभयसंबन्धेन वर्तमानध्वंसविशिष्टत्वम् । द्वितीयादिदिवसीयकार्यस्याद्यसिद्धत्वव्यवहारवारणाय प्रतियोगित्वनिवेशः । अनेककृतिसाध्यकार्यस्य कतिपयकृतिक्षणे सिद्धत्वव्यवहारवारणाय द्वितीयसंबन्धनिवेशः । एतेन परीक्षायां समारब्धत्वविशेषणप्रयोजनं सूचि-

कृष्णंभट्टीयं ।

सिद्धार्थोऽनुमानाप्रामाण्यं । तन्निराकरणं तद्विषयकज्ञाने मध्यस्थस्याप्रामाण्यज्ञानसंपादनं । तत्पूर्वकं स्वमतव्यवस्थापनं स्वसिद्धयुक्तिजन्यव्यवस्थितिजनकशब्दप्रयोगः । अनुमानप्रामाण्यस्यैतादृशपरीक्षापदार्थैकदेशव्यवस्थितावन्वयः । तथाचानुमानप्रामाण्यपरीक्षापदेन परसिद्धार्थानुमानाप्रामाण्यविषयकज्ञानधर्मिकाप्रामाण्यज्ञानसंपादनोत्तरकालीनस्वसिद्धयुक्तिजन्यानुमानप्रामाण्यविषयकव्यवस्थिति[1]जनकशब्दप्रयोगलाभः । परमतसिद्धो योऽर्थोऽनुमाने प्रामाण्याभावः, तन्निराकरणं तज्ज्ञानानुत्पत्तिप्रयोजको व्यापारः, तत्पूर्वकं स्वाभिप्रेतार्थानुमानप्रामाण्यं तद्विषयकज्ञानानुकूलव्यापार इति केचित् । तस्यच न्यायरूपतया प्रयोजकत्वरूपं जनकत्वं बोध्यम् । पराभिप्रेतार्थज्ञानप्रतिबन्धकज्ञानानुकूलव्यापारस्तु न परीक्षा । प्रतिवादिनं प्रति स्वस्यापि परत्वात् तत्कर्तृकव्यापारस्यापि परीक्षा[2]त्वापत्तेः । रत्नपरीक्षादावप्यरत्नदुष्टत्वादिनिरासपूर्वकस[द्रत्न]निर्धारकव्यापारस्यैव परीक्षापदार्थत्वाच्च । एवमप्रमाणसाधर्म्येणेत्यादेः परमतनिराकरणस्वमतव्यवस्थापनपरतयैव समारब्धेत्यादिपरीक्षान्तं बोध्यम् । कारणीभूतेति । नच निरुच्यमानप्रतिपादनस्य निरुक्तशब्दरूपपरीक्षां प्रति कारणत्वं नैव संभवदुक्तिकमिति वाच्यम् । परीक्षापदार्थघटकीभूतस्वमतव्यवस्थितिरूपानुमितौ व्याप्तिग्रहोपायप्रतिपादनस्य हेतुत्वेन तद्विशिष्टे कारणत्वोक्तेः कथं तत्र तस्य हेतुत्वमिति चेत् । इत्थम् । अप्रामाण्यरूपसाध्यानुमापकचार्वाकोक्तहेतुमत्ताज्ञानं यन्मध्यस्थस्य जातं तादृशहेतुमत्ताज्ञाने [[3]तस्याप्रामाण्यज्ञानसंपादनार्थं प्रथमतः प्रामाण्यसाधकहेतुमत्ताज्ञानं] तस्य संपादनीयम् । तच्च न संभवति । इन्द्रियत्वादावेव प्रमितिजनकतावच्छेदकतायाः प्रसिद्धतया तादृशेन्द्रियत्वाभावज्ञानस्यैव स्वरूपासिद्धिज्ञानरूपस्य मध्यस्थे विद्यमानत्वात् । एवंच तादृशासिद्धिनिवारणपूर्वकहेतुमत्ताज्ञानसंपादनार्थं व्याप्तिग्रहोपायप्रतिपादनमिति रीत्या कारणत्वं बोध्यम् । प्रतिपादनं प्रतिपत्तिजनकशब्दप्रयोगः । तदेकदेशप्रतिपत्तौ व्याप्तिग्रहोपायविषयताकभेदान्वयः । कारणीभूतान्तवैय-

न्यायरत्नं ।

तम् । तच्च प्रामाण्यपरीक्षायाः प्रामाण्यसाधकयुक्तिप्रदर्शनेन सिद्धत्वज्ञानवतः प्रवृत्त्यनुदयेन तत्प्रतिबन्धकसिद्धत्वज्ञाननिवर्तनं । तन्निवृत्तिश्च सिद्धत्वघटकातीतत्वग्रहनिवर्तनद्वारा । तन्निवर्तनं च परीक्षाविषयकृतिध्वंसासमानकालीनपरीक्षाविषयककृतिविषयत्वरूपसमारब्धत्वघटकपरीक्षाविषयककृतिध्वंसासमानकालीनत्वज्ञानस्योक्तसंबन्धद्वयेन वर्तमानध्वंसवत्वरूपातीतत्वज्ञाने प्रतिबन्धकतया । नचोक्तसंबन्धेनोक्तध्वंसवत्वज्ञाने आद्यत्वनिश्चयस्य कथं प्रतिबन्धकत्वमिति शङ्क्यम् । आद्यत्वस्योक्तसंबन्धेनोक्तध्वंसवत्वाभावव्याप्यतया तदभावव्याप्यवत्ताज्ञानविधयैव प्रतिबन्धकत्वात् । नचैकमात्रकृतिजन्यफलानुकूलकृतावुक्तो-

१ स्थितिविषयक इति पाठः. २ तथात्वापत्तेः. ३ मै. पु. अ.

शेषणम्। यद्यपि व्याप्तिग्रहोपायप्रतिपादनस्य अनुमानप्रामाण्यव्यवस्थापकत्वकथनं न तस्यावश्यकत्वप्रदर्शनाय। व्याप्तिग्रहोपायश्च वक्ष्यत इत्येतद्ग्रन्थावतरणाद्व्याप्तिग्रहोपायस्य अनुमानप्रामाण्योपपादकतालाभेनैव तल्लाभात्। तथापि प्रामाण्यव्यवस्थापननिर्वाहकतया भवतु व्याप्तिग्रहोपायस्य इदानीमाकाङ्क्षितत्वम्। एवमपि तन्न व्या-

कृष्णंभट्टीयं।

र्थ्यमाशङ्कते—यद्यपीति। तस्य व्याप्तिग्रहोपायप्रतिपादनस्य। अवतारणं सर्वमिदमित्यादिग्रन्थः। एवंच तद्ग्रन्थेनोपायप्रतिपादने समारब्धानुमानप्रामाण्यपरीक्षाकारणत्वसूचनसंभवे, पुनः कारणीभूतान्ताभिधानं पुनरुक्तिग्रस्तमिति भावः। तल्लाभात् व्याप्तिग्रहोपायप्रतिपादनस्यावश्यकतालाभात्। कारणीभूतान्तोपादान एव उपायप्रतिपादने उक्तरीत्या लब्धस्यापि प्रामाण्यव्यवस्थापनजनकत्वस्य धर्मिपारतन्त्र्येण तज्जनकव्याप्तिस्वरूपनिरूपणे लाभो भवति नान्यथेति। सामग्र्यन्तरेण कथमपि तदसंभवज्ञापनाय पुनः कारणीभूतान्तकीर्तनमित्याशयेन समाधत्ते—तथापीति। नच तत्र तल्लाभः किमर्थमिति वाच्यम्। उपायप्रतिपादनस्य जनके व्याप्तिस्वरूपनिरूपणे परीक्षाजनकत्वस्यापि लाभेनात्यन्तावश्यकत्वलाभात्। एवमपीति।

न्यायरत्नं।

भयसंबन्धेन तादृशध्वंसवत्त्वाद्यत्वयोः समावेशेन सामान्यव्याप्तिभङ्ग इति वाच्यम्। तथापि प्रामाण्यपरीक्षाद्यकृतित्वस्य तादृशकृतावभावेन विशेषव्याप्तेरव्याहतत्वात्। इत्थंच समारब्धत्वविशेषणाधीनकृतिविशेषकाद्यत्वज्ञाने जात एव निरुक्तसंबन्धेन तादृशध्वंसवत्त्वज्ञानानुत्पादनेन तद्घटितसिद्धत्वज्ञानानुत्पादः संभवति नान्यथेति। व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थाप्रयोजकत्वज्ञानार्थं कारणीभूतेति विशेषणं वक्तव्यं, तच्चान्यथासिद्धमिति शङ्कते—यद्यपीति। प्रामाण्यव्यवस्थापकत्वकथनमिति। व्यवस्था निश्चयः स चानुमानधर्मिकः। तथाच व्यवस्थापकत्वं प्रामाण्यानुमितिप्रतिबन्धकस्वरूपासिद्धिज्ञानविघटकत्वम्। आवश्यकत्वं सफलत्वम्। प्रामाण्यव्यवस्थापकत्वविशिष्टव्याप्तिग्रहोपायप्रतिपादननिदानत्वलाभाय तद्विशेषणम्। नच तल्लाभः किमर्थमिति शङ्क्यम्। तल्लाभस्य व्याप्तिनिरूपणस्यात्यन्तावश्यकत्वलाभार्थत्वादित्याशयेन समाधानमाह—तथापीति केचित्॥

कारणीभूतान्तोपादान एवोक्तरीत्या लब्धस्यापि प्रामाण्यव्यवस्थापनजनकत्वस्य धर्मिपारतन्त्र्येण व्याप्तिग्रहोपायप्रतिपादनजनके व्याप्तिनिरूपणे लाभो भवति नान्यथेति पुनः कारणीभूतान्तविशेषणमित्याशयेनाह तथापीत्यपरे॥

परेतु स्यादेवं यदि भूतान्तेन ग्रन्थेन व्याप्तिग्रहोपायप्रतिपादनस्यावश्यकत्वसूचनं ग्रन्थकर्तुरभिप्रेतं, तदेव न। किंतु तस्येदानीं कर्तुमर्हत्वे विवादाभाव-

पादननिदानं व्याप्तिस्वरूपनिरूपणमारभते—

प्तिस्वरूपनिरूपणं विना संभवतीति प्रथमतस्तदेवोचितमित्येतत्सूचनाय तदभिहितम्। **निदानमिति**। व्याप्तिघटकीभूताव्यभिचारांशभाने बाधाभावमुद्रया व्यभिचारज्ञानाभावो हेतुः। साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकांशग्रहे च विशेषणज्ञानमुद्रया सहचारग्रहो हेतुरिति क्रमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपमप्रति-

कृष्णंभट्टीयं।

तत् प्रामाण्यव्यवस्थापनम्। नच स्वरूपनिरूपणं विना प्रामाण्यव्यवस्थापनं न संभवतीति स्वरूपनिरूपण एव प्रामाण्यव्यवस्थापकत्वमुच्यतामिति वाच्यम्। व्याप्तिस्वरूपनिरूपणे प्रामाण्यव्यवस्थापनसाक्षात्कारणताबाधादिति संप्रदायः। वस्तुतो नैयायिकहेतौ स्वरूपासिद्धिवारणायोपाधनिरूपणं साधनाप्रसिद्धिवारणाय व्याप्तिस्वरूपनिरूपणमिति साक्षात्कारणता बोध्या।

यद्वा सर्वमिदं सतीत्याद्यवतारणग्रन्थेन व्याप्तिग्रहोपायप्रतिपादने प्रामाण्यव्यवस्थापनकारणत्वलाभसंभवेऽपि व्याप्तिस्वरूपनिरूपणस्य केवलव्याप्तिग्रहोपायप्रतिपादननिदानत्वलाभेऽपि, न कथमपि व्याप्तिस्वरूपनिरूपणे प्रामाण्यव्यवस्थापकत्वं विशिष्टव्याप्तिग्रहोपायप्रतिपादननिदानत्वस्य लाभः संभवति। एवंच प्रामाण्यव्यवस्थापकत्वविशिष्टोपायप्रतिपादननिदानीभूतं व्याप्तिस्वरूपादन्यस्यैव निरूपणमकृत्वा केवलव्याप्तिग्रहोपायप्रतिपादननिदानीभूतव्याप्तिस्वरूप[निरूपणारम्भोऽर्थान्तरग्रस्त[1] इत्याशङ्कायां तादृशनिदानमपि व्याप्तिस्वरूपनिरूपण] एवेति मन्तव्यम्। तच्च कारणीभूतान्तविशेषणाल्लभ्यत इति कारणीभूतान्तविशेषणसार्थक्यमित्याशयेनाह—**तथापीति**। **तदिति**। प्रामाण्यव्यवस्थापकत्वविशिष्टव्याप्तिग्रहोपायप्रतिपादनमित्यर्थः। **व्याप्तीति**। धूमव्यापकवह्निसमानाधिकरणधूमत्वादिकं व्याप्तिः। व्यापकत्व-

न्यायरत्नं।

सूचनाय स्वानुमतिसूचनमेवाभिप्रेतं। तच्च न पूर्वग्रन्थतात्पर्यविषय इत्याह— **तथापीति**। भवत्वित्यादिनाऽकाङ्क्षितत्वमित्यन्तेन भूतान्तोत्कीर्तनफलं स्वानुमतिसूचनं स्पष्टीकृतमित्याहुः॥

प्रथमतस्तदेवोचितमिति। विशेषणविशिष्टविशेष्यजनकत्वग्रहे धर्मपारतन्त्र्येण विशेषणजनकत्वस्यापि ग्रहादुभयजनके निरूपणीये विशेष्यमात्रजनकव्याप्तिस्वरूपनिरूपणस्य प्राथम्यमनुचितमित्याशङ्काविरहाद्व्याप्तिस्वरूपनिरूपणस्यैव

---

१ मै. पु. अ.।

पाद्याशक्यत्वादिति भावः। प्रथमतः पूर्वपक्षस्यैव अभिधानेन निरूपयतीत्यसंगतम्। अत आरभत इत्युक्तम्। निरूपणस्य परमतनि-

कृष्णंभट्टीयं।

ग्रहं प्रति व्यभिचारग्रहो हेतुः सहचारविशिष्टधूमत्वादिग्रहो हेतुरित्याकारकोपायनिरूपणे सिद्धान्तसिद्धव्याप्तिस्वरूपनिरूपणस्य स्वतन्त्रान्वयव्यतिरेकसत्त्वादज्ञातव्याप्तिस्वरूपकशिष्यं प्रत्युपायनिरूपणस्य दुष्करत्वादिति भावः। एतल्लाभार्थमेव व्याप्तिघटकीभूतेत्युक्तं। नतु निरूपणस्यापि घटकताविषयकत्वलाभार्थं, प्रयोजनाभावात्। नन्वत्र व्याप्तिस्वरूपनिरूपणमारभत इति कथनमयुक्तम्। तादृशव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपं निरूपयतीत्यस्यैव सम्यक्त्वात्। निदानमिति चाभेदसंबन्धेन निरूपणक्रियाविशेषणमित्यत आह—**प्रथमत इति**। धात्वर्थो निरूपणं, केवलज्ञानानुकूलव्यापारः शब्दप्रयोगलक्षणः। द्वितीयार्थो विषयित्वं तदेकदेशज्ञानेऽन्वेति। आख्यातार्थः कृतिः, तस्यां धात्वर्थान्वयः। आख्यातार्थपर्यवसानत्वस्य कृतावन्वयः। नन्वित्यादिनेति तृतीयार्थो भेदः, धान्येन धनवानितिवत्। तथाच निरुक्तपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानाभिन्नं नन्वनुमितिहेतुव्याप्तिज्ञानेत्यादिग्रन्थाभिन्नं यद्व्याप्तिस्वरूपनिरूपणं तदनुकूलेदानींतनकृतिमान्मणिकार इति बोधः। तथाचेदानीं नन्वित्यादिना पूर्वपक्षस्यैवाविधानादिदानींतनकृतेर्नन्वित्यादिग्रन्थाभिन्ननिरूपणानुकूलतया [[1]प्रतियोग्यसमानाधिकरणेत्यादिव्याप्तिस्वरूपविषयकनिरूपणाननुकूलतया व्याप्तिस्वरूपनिरूपणानुकूलवर्तमानकृतिमत्त्वस्य मणिकारे बोधादसंगतिरित्यर्थः] **आरभत इत्युक्तमिति**। द्वितीयार्थो विषयित्वम्। आङ्पूर्वकरभधातोराद्यकृतिरर्थः। प्राग्वत्तद्विषयकधातुयोगादाश्रयत्वमाख्यातार्थः। शेषं प्राग्वत्। एवंच तादृशनिदानाभिन्नं यत्तादृशग्रन्थाभिन्नं व्याप्तिस्वरूपनिरूपणं तद्विषयकाद्यकृत्याश्रयो मणिकार इति बोधः।

नन्वेवमपीदानींतनाद्यकृतेः सिद्धान्तसिद्धव्याप्तिस्वरूपनिरूपणाननुकूलतयाऽसंगतिर्दुर्वारैवेत्यत आह—**निरूपणस्येति**।

न्यायरत्नं।

प्राथम्यमुचितमिति भावः। ननु व्याप्तिस्वरूपं निरूपयतीत्येव वक्तव्ये व्याप्तिस्वरूपनिरूपणमारभत इति किमर्थमुक्तं अर्थाबाधेऽप्यधिकलेखनस्यायुक्तत्वादित्यत आह—**प्रथम इति**। **निरूपयतीत्यसंगतमिति**। निरूपयतीत्यत्राख्यातार्थकृतौ निरूपणस्य साध्यत्वाख्यविषयतासंबन्धेनान्वयस्य शब्दखण्डे मिश्रैर्व्यवस्थापितत्वात्पूर्वपक्षाभिधानजनककृतेः सिद्धान्तकथनपर्यवसितनिरूपणसाध्यकत्वाभावादिति भाव इति केचित्।

अपरेतु व्याप्तिस्वरूपं निरूपयतीत्यत्र व्याप्तिस्वरूपविषयकज्ञानानुकूलव्यापारानुकूलवर्तमानकृतेरेव वाक्यार्थतया अत्रोच्यत इत्यादिना प्रतिपादित-

१ [] एतदन्तर्गतं क्वचिद्दृश्यते.

राकरणपूर्वकसिद्धान्तकथनरूपतया पूर्वपक्षाभिधानतत्खण्डनयोरपि तदारम्भणरूपतेति ध्येयम् ॥

कृष्णंभट्टीयं ।

तदारम्भणरूपतेति । तद्विषयकाद्यकृतिविषयतेत्यर्थः। तथाच निरूपणस्य परमतेत्यादिरूपत्वोपगमे नन्वित्यादिग्रन्थस्यापि निरूपणपदार्थतया तद्विषयकाद्यकृतेर्निरूपणविषयकत्वमक्षतमेवेति आरभत इत्युक्तिसंगतिः । नचैवं निरूपयतीत्याद्युक्तिपक्षेऽपि धात्वर्थनिरूपणस्य परमतनिराकरणपूर्वकस्वमतव्यवस्थितिरूपत्वस्वीकारे बाधकाभावादुक्तरीत्या नन्वित्यादिग्रन्थानुकूलेदानींतनकृतेर्निरूपणविषयकत्वमनपवादमिति वाच्यम् । आरभत इत्युक्तावाद्यकृतेः सर्वविषयकत्वस्वीकारेण निरूपणपदस्य यथाश्रुतार्थपरत्वेप्यनुपपत्त्यभावात् । नच निरूपयतीत्युक्तिपक्षेऽपि आख्यातेन कृतित्वेनाद्यकृतेरेव बोधनस्वीकारादारभत इति व्यर्थमेवेति वाच्यम् । निरूपयतीत्यनेन नियमत आद्यकृतिबोधने मानाभावात् । आरभत इत्युच्यमाने आङ्पूर्वकरभधातुना आद्यकृतेरेव बोधनादनुपपत्त्यभावात् । नचैवमाद्यकृतेः सविषयकत्वस्वीकारस्यावश्यकतया निरूपणपदस्य परमतेत्याद्यर्थकत्वकथनं व्यर्थमिति वाच्यम् । निरूपणपदस्य प्रतियोग्यसमानाधिकरणेत्यादिनिरूपणमात्रपरत्वे तस्य नन्वित्यादिनेति तृतीयार्थाभेदस्य वक्तव्यतया तदसंगतिः स्यादतस्तत्प-

न्यायरत्नं ।

स्यैव स्वमते व्याप्तिस्वरूपात्तद्विषयकनिरूपणानुकूलकृतेर्वर्तमानकालीनत्वाभावेन निरूपयतीति वाक्यार्थबाधादिति भाव **इत्याहुः** ॥

आरभत इत्युक्तमिति व्याप्तिस्वरूपनिरूपणमित्यादिः । परमतनिराकरणपूर्वकव्याप्तिस्वरूपविषयकज्ञानानुकूलव्यापारो व्याप्तिस्वरूपनिरूपणपदार्थः द्वितीयार्थो विषयत्वं आङ्पूर्वकरभधातोश्चाद्यकृतिरर्थः आख्यातार्थश्चाश्रयत्वं वर्तमानकालश्च, कालस्य धात्वर्थेऽन्वयः । थाच परमतनिराकरणपूर्वकस्वमतसिद्धव्याप्तिस्वरूपविषयकज्ञानानुकूलव्यापारानुकूलवर्तमानाद्यकृतिमान्मणिकार इति वाक्यार्थः । आद्यकृतेश्च स्वरूपनिरूपणविषयकत्वनियमात्सिद्धान्तसिद्धव्याप्तिनिरूपणस्याद्यकृतिविषयत्वं, तथाचोक्तं "पूर्वपक्षाभिधानतत्खण्डनयोस्तदारम्भकत्वमि"ति । आरम्भकत्वमाद्यकृतिविषयत्वमिति भावः ॥

केचित्तु व्याप्तिस्वरूपनिरूपणमारभत इत्यत्र निरूपणपदार्थः पूर्ववदेव । द्वितीयार्थ उद्देश्यत्वं सामग्रीमेलनसाध्यककृतिदशायामपि घटमारभत इति व्यवहारात् । तच्च सिद्धान्तकथनसाध्यकत्वाभाववत्यामपि पूर्वपक्षाभिधानकृतौ सिद्धान्तसाध्यकतत्कथनजनककृतौ चाव्याहतं । परमतनिराकरणपूर्वकत्वविशिष्टसिद्धान्तकथनमुद्दिश्यैव पूर्वपक्षाभिधानतत्खण्डनयोरारब्धत्वात् । **तदारम्भणरूपतेति** । व्याप्तिनिरूपणोद्देश्यककृतिविषयतेत्यर्थ इत्याहुः ॥

---

१ स्व सिद्ध का. पाठः.　　२ स्तंभेति का. पाठः.

मूले न तावदव्यभिचरितत्वमिति ॥ व्याप्तिरिति प्रश्नस्थम-

कृष्णंभट्टीयं।

दस्य पूर्वपक्षतत्खण्डनपरत्वोक्तिरिति। ननु न तावदिति प्रतियोगिपदासत्वा-दनर्थकमित्यत आह—व्याप्तिरिति।

अत्र केवलान्वयिन्यभावादिति मणिकारोक्तहेतुना व्याप्तावव्यभिचरित-त्वशब्दप्रतिपाद्यसाध्याभाववदवृत्तित्वादिनिष्ठतत्तद्व्यक्तित्वाद्यवच्छिन्नभेदकूटः साधनीयः। नचैवं संभवति। केवलान्वयिहेतुनिरूपितवृत्तित्वाभावरूपहेतोः सिद्धान्तसिद्धव्याप्तावसत्वादित्यतः। अव्यभिचरितत्वं पक्षः। व्याप्तिभेदः

न्यायरत्नं।

अथ परमतनिराकरणपूर्वकसिद्धान्तकथनं यदि निरूपणं तदा नन्वित्यादिपूर्वपक्षाभिधानस्य निरूपणत्वानुपपत्त्या व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिनेत्यत्र तृतीयार्थाभेदान्वयस्य क्लेशेनैवोपपाद्यतापत्तिः। एवं पक्षधर्मतानिरूप्यत इत्यत्रापि पक्षधर्मतानिरूपणमारभ्यत इत्यस्यैव वक्तव्यतापत्तिः। पक्षताग्रन्थेपि प्रथमतः पूर्वपक्षस्यैवाभिधानात्। यदिच निरूपणत्वं पूर्वपक्षनिरूपणसिद्धान्तनिरूपणसाधारणं कथंचिन्निरुच्य पक्षतामणिः सङ्गम्यते, तदा प्रकृतेपि निरूपयतीति कथं नोक्तं दीधितिकृतेति चेन्न। अपठितपूर्वग्रन्थानामेकमपि समग्रं पठनीयमितीच्छावतां झटिति नन्वित्यादिग्रन्थाध्ययने प्रवृत्त्यर्थं निरूपणमारभत इत्युक्तं, निरूपयतीत्युक्त्या तु नारम्भो लभ्यते कतिपयलक्षणविचारोत्तरमपि निरूपयतीति व्यवहारसंभवात्। पक्षताग्रन्थे तु व्याप्तिनिरूपणानन्तरमित्यभिधानादेव पक्षतानिरूपणारम्भलाभादारभ्यत इति नोक्तमिति **विभावनीयं सूक्ष्मबुद्धिभिः**। **नन्वित्यादिमूले** व्याप्तिज्ञान इत्यत्र सप्तम्यर्थो विषयत्वं तत्रानुमितिजनकताविशिष्टज्ञानस्यान्वये जनकताया अप्यवच्छेदकतयाऽन्वयः। व्याप्तिपदार्थश्च पक्षातावच्छेदकावच्छिन्नविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितप्रकारतारूपविलक्षणविषयताश्रयः। व्याप्तिपदं च व्याप्तिपदार्थत्वावच्छिन्ने लाक्षणिकं तत्र सप्तम्यर्थविषयताया अन्वयः। किंशब्दार्थः समभिव्याहृतपदार्थविशेषणधर्मव्याप्यधर्मप्रकारकजिज्ञासाविषयः। तथाचानुमितिजनकतावच्छेदकनिरुक्तविषयताश्रयज्ञानीयविषयताश्रयव्याप्तिपदार्थत्वव्याप्यधर्मप्रकारकजिज्ञासाविषयाभिन्नो व्याप्तिपदार्थ इति बोधो ज्ञेयः। न तावदित्यत्र भेदबोधोपयुक्तप्रतियोग्यनुयोगिवाचकपदाभावादाह—**गादाधर्यां व्याप्तिरिति**। तथाच व्याप्तिपदाव्यभिचरितत्वपदयोः सत्वान्न काचित्क्षतिः। अत्र व्याप्तिपदार्थस्य पक्षत्वेऽव्यभिचरितत्वभेदस्य साध्यत्वे कूटरूपहेतुर्वक्तव्यस्तत्र च केवलान्वयिन्यभावादित्यभिहितकेवलान्वयिवृत्त्यभावप्रतियोगित्वरूपहेतुरसिद्धः स्यादपि च व्याप्तिपदस्यान्ते निविष्टत्वात्तदर्थस्य पक्षत्वमनुपपन्नमुद्देश्यवाचकपदस्य पूर्ववृत्तित्वनियमाद्योजनायाश्चायुक्तत्वादित्याश-

नुषज्यते । तथाचाव्यभिचारपदार्थो नानुमितिजनकज्ञानविषय इ-

कृष्णंभट्टीयं ।

साध्य इत्याह—**तथाचेति** । उक्तभेदकूटसाधने न तावदिति नञुत्कीर्तनमप्यधिकमित्यपि दूषणं द्रष्टव्यम्[१] । **ननु** अव्यभिचरितस्यैव पक्षत्वे पञ्चानुगतं पक्षतावच्छेदकं निर्वक्तुमशक्यमित्यतः सामान्यतः अव्यभिचारपदार्थत्वेन अव्यभिचारपदजन्यप्रतीतिविषयत्वात्मकेन पक्षत्वं दर्शयति[२]—**तथाचेति** ।

न्यायरत्नं ।

क्काव्यभिचरितत्वपदार्थस्य पक्षत्वमाह—**तथाचेति** । **अव्यभिचरित्वपदार्थ इति** । अत्राव्यभिचरितत्वस्यानुगतत्वेन पक्षतावच्छेदकत्वासंभवादव्यभिचरितत्वपदस्य तत्प्रतिपाद्यत्वरूपानुगतधर्मावच्छिन्नपरत्वमङ्गीकृत्याव्यभिचरितत्वपदार्थस्य पक्षत्वानुसरणम् । नचाननुगतमेव पक्षतावच्छेदकमस्त्विति वाच्यम् । एकधर्मावच्छिन्नस्य व्याप्तित्वनिराकरणेऽप्यन्यधर्मावच्छिन्नस्य व्याप्तित्वशङ्काऽनिराकरणात्तत्तद्धर्मावच्छिन्नरूपार्थपञ्चकपरतायास्तत्पदस्य वक्तव्यतया "सकृदुच्चरित" इति न्यायातिक्रमापत्तेर्वाक्यभेदापत्तेश्च । "नन्वत्रोच्यत" इत्यादिना वक्ष्यमाणव्याप्तिभेदसाधने सिद्धसाधनं । साध्याभाववदवृत्तित्वादिभेदसाधने बाध इत्यत आह—**नानुमितिजनकज्ञानविषय इति** । तथाचानुमितिजनकज्ञानविषयत्वस्याव्यभिचरितत्वपदार्थे परैः स्वीकारान्न सिद्धसाधनबाधाविति भावः । अथैवमपि वह्न्यभाववदवृत्तित्वकालीनपर्वतो वह्निमानित्यादावनुमितिजनकज्ञानविषयत्वस्यानुमितिजनकतावच्छेदकविषयत्वस्य चाव्यभिचरितत्वपदार्थे सत्वाद्बाधो दुर्वारः । नच धर्मितावच्छेदकतानात्मकत्वस्य विषयताविशेषणत्वान्न बाध इति वाच्यम् । तथापि साध्याभाववदवृत्तिहेतुकेऽनुमितिजनकज्ञानीयधर्मितावच्छेदकतानात्मकविषयताया अपि तत्र सत्वेन बाधस्य दुर्वारत्वात् । नच तत्रापि व्याप्तिपदार्थधर्मितावच्छेदकतयैव साध्याभाववदवृत्तित्वस्य भावान्न बाध इति वाच्यम् । एवमपि सामानाधिकरण्यत्वेन तादृशवृत्तित्वाभावावगाहिज्ञानमादाय बाधस्य दुर्वारत्वात् ।

अथ भ्रमान्यवृत्तित्वस्य तादृशविषयतायां निवेशान्न दोष इति चेत्सत्यम् । तथापि साध्याभाववदवृत्तित्वकालीनपक्षकस्थले धर्मितावच्छेदकप्रकारकज्ञानविषयानुमितिजनकज्ञानीयतादृशविषयत्वस्य तत्र सत्वाद्बाधस्यानिराकरणात् । नन्वनुमितित्वावच्छिन्नजन्यतानिरूपितजनकतापर्यन्तनिवेशान्न दोष इति चेत्तथा सति सिद्धसाधनापत्तेः । तथाहि अनुमितिं प्रति परामर्शानामनेकलिङ्गकानां हेतुत्वे परस्परजन्यानुमितौ व्यभिचारापत्त्या तत्तल्लिङ्गकपरामर्शविशिष्टानुमितिं प्रति तस्य तस्य हेतुताया वक्तव्यतया तत्र चानुमितित्वस्य जन्यतावच्छेदके निवेशस्य निष्प्रयोजनकतयाऽनुमितित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयत्वस्य मतद्वयेऽप्यव्यभिचरितत्वपदार्थेऽसत्वात् । नचैवमनुमितित्वावच्छिन्नजन्यताया अप्रसिद्धत्वादेव न सिद्धसाधनावकाश इति वाच्यम् । तथा सत्यनुमितित्वाव-

---

१ बोध्यम्. २ दर्शितम्.

कृष्णंभट्टीयं।

नचानुगतं पक्षतावच्छेदकं किमर्थं प्रत्येकमपि पक्षत्वसंभवादिति वाच्यम्। तथासति नानाप्रतिज्ञाकरणापत्तेः। यस्य न पक्षत्वं तस्य व्याप्तित्वशङ्कासंभवात्। (अतः सामान्यतोऽव्यभिचारपदाजन्यप्रतीतिविषयत्वेन पक्षत्वं दर्शितम्)। व्याप्तेः पृष्टतया व्याप्तिरव्यभिचारपदार्थो नेत्युक्तिसंभवात्तथा नोक्तम्। एतेन व्याप्तावव्यभिचारपदार्थभेदसाधने विशेषभेदकूटस्य हेतुत्वं, परंतु तत्र केवलान्वयिन्यभावादिति न हेतुरित्याशङ्क्य विशेषेषु केवलान्वयिन्यभावरूपहेतुना प्रथमतो व्याप्तिभेद एव साध्यः। ततः स्वनिष्ठभेदप्रतियोगित्वसंबन्धेन

न्यायरत्नं।

च्छिन्नस्याकस्मिकत्वापत्तेः। नचैतद्दोषवारणायैवानुमितित्वस्य जन्यतावच्छेदके निवेश इति शङ्क्यम्। एतद्दोषवारणायानुमितिग्रन्थे ज्ञानत्वेन कारणताया ग्रन्थकृताभ्युपेतत्वात्। अस्तु वा सिद्धसाधनाभावस्तथापि बाधोस्त्येव अनुमितित्वावच्छिन्नजनकतावच्छेदकविषयत्वाप्रसिद्धेः। नच ज्ञानत्वविषयत्वयोरवच्छेदकत्वे विनिगमकाभावः ज्ञानत्वस्य स्वरूपतोऽवच्छेदकतायां लाघवस्यैव तत्वात्। अत्रोच्यते। कार्यतावच्छेदककोटावनुमितित्वनिवेश आवश्यकोऽन्यथापरामर्शकालीनानामनन्तानामनुमित्यनात्मकानामेव परामर्शजन्यत्वकल्पनापत्तेः। नचानुमितित्वस्य जन्यतावच्छेदकत्वकल्पनया तौल्यमिति वाच्यम्। अनन्तानुमितिभिन्नज्ञानेषु जन्यत्वसंबन्धकल्पनापेक्षयाऽनुमितित्वस्य तदवच्छेदकत्वकल्पनायां लाघवात्। अथानुमितित्वं न कार्यतावच्छेदककोटौ निवेशयितुं शक्यं तथा सत्यनुमितित्वे तदवच्छेदकत्वस्य समवायतदवच्छेदकतावच्छेदकत्वस्य च कल्पनाप्रसङ्गात्। नचानन्तज्ञानेषु जन्यत्वकल्पनं तदपेक्षयापि गुरुभूतमिति वाच्यम्। अनुमितित्वाव्यवहितोत्तरत्वयोर्धर्मधर्मितावच्छेदकभावे विनिगमनाविरहेण गुरुतरकार्यकारणभावद्वयकल्पनापत्तेः। मैवम्। फलमुखगौरवस्यादोषत्वात्। यद्वा अनुमितित्वावच्छिन्नत्वस्थाने ज्ञानत्वानवच्छिन्नत्वस्यैव निवेशनीयतया न पूर्वोक्तदोषः। धर्मितावच्छेदकप्रकारकज्ञानीयजन्यताया ज्ञानत्वेनैवावच्छेदात्।

अथैवमपि हेत्वधिकरणवृत्त्यभावत्वेन तादृशवृत्तित्वाभावस्य भानसंभवेनोक्तविषयताया मतद्वय एव तत्र सत्वेन बाध इति चेन्न। पक्षविषयतानिरूपितहेतुविषयतानिरूपितत्वस्यापि तत्र निवेशात्। नन्वेवमपि यत्रावृत्तिभेदः साध्यते आधेयत्वं हेतुः तत्र पक्षविषयतानिरूपितहेतुविषयतानिरूपितविषयताया अपि सत्वेन बाधो वर्तत एव। नचाव्यभिचारपदार्थत्वसामानाधिकरण्येनैव साध्यसिद्धिरुद्देश्येति सांप्रतम्। तथा सति साध्यवद्भिन्नेत्यादेर्व्याप्तित्वानिराकरणापत्तेः। यादृशाङ्कुरविशेषानुमितिः कस्यापि नाभूत्तदभाववदवृत्तित्वस्याप्यव्यभिचरितत्वपदार्थतया तत्र साध्यस्य मतद्वयसिद्धेः सिद्धसाधनापत्तेश्च। मैवम्। पक्षविषयतानिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नविषयतानिरूपितानुमितिजनकतावच्छेदकविषयतानाश्रयत्वस्य साध्यत्वात्। नच हेतुमद्वृत्तित्वस्य

त्यर्थः ।। अनुमितिजनकत्वं नाव्यभिचारपदार्थावच्छिन्नहेतुविषयता-

कृष्णंभट्टीयं ।

विशेषणवत्त्वाद्याप्तौ विशेषभेदकूट इति त्वनादेयं गौरवात् । अग्रिमरीत्या सिद्धिभेदसाधने बाधाच्च । नन्वत्रानुमितिजनकज्ञानविषयस्य सिद्धान्तसिद्ध-व्याप्तेर्भेदसाधने सिद्धसाधनम् । तादृशस्य साध्याभाववदवृत्तित्वादिरूप-व्याप्तेर्भेदसाधने बाधः । पक्षः स्वव्यापकसाध्याव्यापकसाध्यसमानाधिकरण-हेतुमान् हेतुश्च साध्याव्यभिचारीति समूहालम्बनस्यानुमितिजनकत्वात् । एवं साध्याभाववदवृत्तित्वादिरूपतदव्यभिचारपदार्थाभावो हेतुः स्यात्तत्र प्रत्येकं हेतुत्वे भागासिद्धिः । कूटस्य हेतुत्वे स्वरूपासिद्धिः । अनुमिति-जनकतायामव्यभिचारविषयकज्ञानावृत्तित्वसाधने अनुमितिजनकज्ञानत्वा-[वच्छेदका]वच्छेदेनाव्यभिचाराविषयकत्वसाधने बाधः । सामानाधिकर-ण्येन तत्साधने सिद्धसाधनमित्यत आह—**अनुमितिजनकत्वमिति** । लक्षणया[यैव] एतल्लाभो बोध्यः ।

अत्र साध्ये हेतौ वा हेत्वनिवेशे अव्यभिचारपदार्थविषयिताघटितधर्मावच्छिन्नत्वाभावसाधने वह्न्यभाववदवृत्ति पर्वतो वह्निमान्धूमादित्यादौ वह्नि-

न्यायरत्नं ।

स्वरूपसंबन्धेनाभावांशे भानाद्वृत्तित्वविषयताहेतुतावच्छेदकस्वरूपसंबन्धावच्छि-न्नेति साम्प्रतं । पक्षविषयतानिरूपितत्वावच्छेदकहेतुतावच्छेदकसंबन्धावच्छिन्न-विषयतात्ववद्विषयतानिरूपितत्वपर्यन्तस्य विवक्षणीयतया पक्षस्यात्र प्रकारत्वेन हेतोश्च तदंशे विशेष्यत्वेन हेतुविषयतायां तादृशसंबन्धावच्छिन्नविषयतात्वेन पक्षविषयतानिरूपितत्वविरहात् । अथवा चरमविषयतायां स्वरूपसंबन्धाव-च्छिन्नत्वनिवेशेन सर्वोऽप्ययं दोषो वारणीयः ॥

अथैवमपि वह्न्यभाववदवृत्तिहेतुकेऽनुमितिजनकज्ञानीयतादृशविषयताया अपि तत्र सत्वाद्बाध इति चेन्न । हेतुतावच्छेदकावच्छिन्नविषयतानिरूपितत्वस्यापि विषयतायां विशेषणदानात् ।

अथैवमपि साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकस्य व्याप्तित्वमते हेतुता-वच्छेदकावच्छिन्नविषयतानिरूपितविषयताया अपि तत्र सत्वाद्बाध इति चेन्न । तादृशविषयत्वपर्याप्त्यभावस्य विवक्षितत्वात् ।

इत्थंच अनुमितिनिष्ठज्ञानत्वानवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूत-धर्मितावच्छेदकतानात्मकपक्षविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नहेतुताव-च्छेदकसंबन्धावच्छिन्नविषयतानिरूपितस्वरूपसंबन्धावच्छिन्नविषयताश्रयभेदः साध्य इति न कश्चिद्दोष इति संक्षेपः ॥ निरुक्तपक्षे निरुक्तसाध्यस्य साध्यतायां तद्धि नेत्यादिना प्रतिपादितसाध्याभाववदवृत्तित्वादिभेदपञ्चकस्य हेतोरसिद्धिरतः पर्यवसितमाह—**अनुमितिजनकत्वमिति । अव्यभिचारपदार्थाव-च्छिन्नहेतुविषयता** अव्यभिचारपदजन्यप्रतीतिविषयत्वेन संकेतविषयध-र्मावच्छिन्नहेतुविषयतेत्यर्थः ।

कृष्णंभट्टीयं।

व्याप्यधूमवान्वह्न्यभाववदवृत्तिपर्वत इत्याकारकपरामर्शनिष्ठानुमितिजनकतायां धर्मितावच्छेदकावच्छिन्नविषयताविधया अव्यभिचारपदार्थावच्छिन्नविषयत्वावच्छिन्नत्वसत्वेन बाधः कूटरूपहेतौ स्वरूपासिद्धिश्चेति हेतुनिवेशः। एवंच तादृशजनकतायामव्यभिचारपदार्थावच्छिन्नविषयता[त्वा]वच्छिन्नत्वसत्वेपि तादृशपदार्थावच्छिन्नहेतुविषयता[त्वा]वच्छिन्नत्वाभावसत्वान्न बाधादिः। नच तथापि वह्न्यभाववदवृत्तिधूमवन्महानससदृशः पर्वतो वह्निमान्धूमादित्यादिस्थलीयपरामर्शजनकतायां बाधादिर्दुर्वार एवेति वाच्यम्। अव्यभिचारपदार्थावच्छिन्नहेतुविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नत्वाभावस्यैव साध्यत्वादिविवक्षणेनादोषात्। नच तथापि पर्वतो वह्निमान्वह्न्यभाववदवृत्तेरित्यादौ हेतुतावच्छेदकपर्यन्तस्य व्याप्तित्वमते हेतुव्यापकवह्निसमानाधिकरणवृत्तिवह्न्यभाववदवृत्तित्वरूपहेतुतावच्छेदकवत्वात् 'पर्वत' इत्याकारकनिर्धर्मितावच्छेदकपरामर्शजनकतायां बाधादिर्दुर्वारः। तस्यां तादृशहेतुतावच्छेदकरूपाव्यभिचारपदार्थावच्छिन्नहेतुविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयत्वावच्छिन्नत्वसत्वादिति वाच्यम्। पर्याप्तिं निवेश्याव्यभिचारपदार्थपर्याप्तविषयतानिरूपितहेतुविषयतानिरूपितप्रकृतपक्षविषयताघटितधर्मानवच्छिन्नत्वविवक्षणात्। नचोक्तस्थल एव हेतुव्यापकवह्निसमानाधिकरणवृत्तिवह्न्यभाववदवृत्तित्ववद्वह्न्यभाववदवृत्तिमान्पर्वत इत्यन्तरा सधर्मितावच्छेदकपरामर्शजनकतायां व्याप्तिधर्मितावच्छेदकीभूताव्यभिचारपदार्थमात्रपर्याप्तधर्मितावच्छेदकतात्मकविषयतानिरूपितहेतुविषयतानिरूपितप्रकृतपक्षविषयताघटितधर्मावच्छिन्नत्वसत्वाद्बाधादिर्दुर्वार एवेति वाच्यम्। अव्यभिचारपदार्थनिष्ठाविषयतायां धर्मितावच्छेदकताभिन्नत्वरूपविशेषणदानात्। नचैवं हेतुपदमनर्थकं वह्न्यभाववदवृत्तिपर्वतपक्षकपरामर्शे वह्न्यभाववदवृत्तित्वविषयताया धर्मितावच्छेदकत्वरूपत्वेनादोषादिति वाच्यम्। पर्वतो वह्निमान्वह्न्यभाववदवृत्तेरित्यादौ वह्न्यभाववदवृत्तिव्यापकसाध्यसमानाधिकरणहेतुमान्पर्वत इति परामर्शजनकतायां वह्न्यभाववदवृत्तिव्यापकेत्यंशमादाय बाधादिवारणाय हेतुतावच्छेदकावच्छिन्नविषयतालाभार्थं हेतुपदम्। वह्न्यभाववदवृत्तिमतस्तादात्म्येन हेतुतास्थलेऽपि हेतुपदप्रयोजनं बोध्यम्।

अत्रानुमितिजनकज्ञान इत्यनुवृत्तम्। तत्र सप्तम्यर्थो निष्ठत्वम्। तथाच तादृशज्ञाननिष्ठजनकतालाभ इति केचित्। एवमपि निष्ठालाभात् अव्यभिचारविशिष्टविषयत्वं तु न निवेशितम्। अव्यभिचरितत्वेन धूलीपटलादिभ्रमव्यावृत्तत्वादिति। अव्यभिचारपदार्थो हेतुविषयतावच्छेदकत्वेन विशेषितः। व्यापकसामानाधिकरण्यत्वेनाव्यभिचारपदार्थावच्छिन्नहेतुविषयता-

न्यायरत्नं।

अत्र केचिज्ज्ञेयत्वं वाच्यत्वाव्यभिचारीति व्यवहारानुरोधेन साध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्याप्यव्यभिचारपदार्थ-

घटितधर्मावच्छिन्नमिति पर्यवसितम् । अत्र हेतुमाह—तद्धि न साध्याभाववदवृत्तित्वमित्यादि(ना) । हि=यतः । साध्याभावव-

कृष्णंभट्टीयं ।

मादाय बाधवारणाय निरूप्यनिरूपकभावापन्नविलक्षणावच्छेदकतायाः प्रमीयावच्छेदकताया वा निवेशः । नचैतत्साधनमधिकं तत्तदव्यभिचारपदार्थावच्छिन्नेत्यादिक्रमेण च साधनादेवेष्टसिद्धिरिति वाच्यम् । अव्यभिचारपदार्थावच्छिन्नेत्यादिक्रमेण अनौपाधिकत्वपदार्थावच्छिन्नेत्यादिक्रमेण च साधनादिकमेव पूर्वपक्षशरीरमित्याशयेन तथोक्तिरिति । नन्वत्राव्यभिचारपदार्थोऽनुमितिजनकतावच्छेदकहेतुविषयतावच्छेदक इत्येवास्तु । नच वह्न्यभाववदवृत्तिपर्वतो वह्निमान्धूमादित्यादौ अव्यभिचारे परामर्शनिष्ठजनकतावच्छेदकीभूतपक्षविषयतामादाय बाधस्य हेतुपदनिवेशनवारणेपि वह्न्यभाववदवृत्ति[धूमवन्]महानसधर्मपर्वतपक्षकोक्तस्थले परामर्शनिष्ठजनकतावच्छेदकहेतुविषयतावच्छेदकत्वसत्वेन बाध इति वाच्यम् । पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितत्वेन हेतुविषयताया विशेषणीयत्वात् । नचैवमपि वह्निमान्वह्न्यभाववदवृत्तेरित्यादौ हेतुतावच्छेदकपर्यन्तव्याप्तित्वकल्पे हेतुव्यापकसाध्यसमानाधिकरणवृत्तिवह्न्यभाववदवृत्तित्ववद्वानिति निर्धर्मितावच्छेदकपरामर्शमादाय बाध एवेति वाच्यम् । तादृशहेतुविषयतावच्छेदकतापर्याप्त्यभावस्य वाच्यत्वात् । नच तत्रैव हेतुव्यापकवह्निसमानाधिकरणवह्न्यभाववदवृत्तित्वाद्वह्न्यभाववदवृत्तिमानिति अन्तराधर्मितावच्छेदकपरामर्शीयहेतुविषयतावच्छेदकतापर्याप्तिसत्वेन बाधो दुर्वारः । एवं हेतुपदानुपादाने पर्वतो वह्निमान्वह्न्यभाववदवृत्तिमत इत्यादौ तादात्म्येन हेतुत्वस्थले हेतुव्यापकसाध्यसमानाधिकरणवृत्तिवह्न्यभाववदवृत्तिमद्वान्पर्वत इत्यादिज्ञानीयजनकतायां हेतुसमानाधिकरणेत्यंशमादाय बाधः । तादृशहेतुतावच्छेदकविषयतायाः परंपरया प्रकृतपक्षविषयतानिरूपितत्वादिति वाच्यम् । तादृशहेतुतावच्छेदकावच्छिन्नहेतुविषयतानिरूपितधर्मितावच्छेदकतानात्मकावच्छेदकतापर्याप्त्यभावस्य विवक्षणीयत्वादिति चेन्मैवम् । तथासति साध्यहेत्वोरभेदप्रसङ्गात् । तद्धि नेति । तदव्यभिचरितत्वं साध्याभाववृत्तित्वादि-

न्यायरत्नं ।

त्वावश्यकत्वाद्धेतुपदानुपादानेऽव्यभिचारपदार्थावच्छिन्नसाध्यतावच्छेदकनिष्ठविषयताघटितधर्मावच्छिन्नत्वाभावस्य सिद्धान्तिमतेऽनुमितिजनकतायामभावाद्बाध इति तदुपात्तमित्याहुः ॥

अथैवमपि हेतुत्वस्य सामान्यतः केवलान्वयित्वेन साध्यतावच्छेदकविषयताव्यावृत्तिर्दुर्घटा । विशिष्य धूमत्वादिना हेतुनिवेशेऽपि धूमसाध्यतावच्छेदकानुमितिजनकतायां बाधो दुर्वार एव । अनुमितिजनकतात्वसामानाधिकरण्येन

---

१ इति त्वनुपादेयम् । पर्याप्तिसत्वादेवादोषात्. इति मै. पा. अधिकम्.

दवृत्तित्वादिरूपम्। तत् अव्यभिचरितत्वम्। न व्याप्तिरित्यनुषङ्गे-

कृष्णंभट्टीयं।

भिन्नमिति नार्थः। अपार्थकत्वापत्तेः। अतस्तत्पदं साध्याभाववदवृत्तित्वादि-शब्देन योजितम्। नेत्याकारकप्रतीत्यभावादाह—व्याप्तिरिति। नचाव्यभिचारपदार्थे व्याप्तिभेदसाधने केवलान्वयिन्यभावादित्येकहेतुः। तत्र साध्याभाववदवृत्तित्वाद्यन्यतमरूपत्वमिति वाच्यम्। उक्तरीत्या बाधात्। तद्धि नेति नञो वैयर्थ्याच्च। नच यथा रूपं न द्रव्यं रसो न द्रव्यमिति रीत्या विशेषेषु द्रव्यभेदसिद्धौ तत्सामान्ये तत्सिद्धिः तथा प्रत्येकं साध्याभाववदवृत्तित्वादौ व्याप्तिभेदसिद्धौ सामान्यतोऽव्यभिचारपदार्थेऽपि तद्भेदसिद्धिरिति वाच्यम्। अव्यभिचारपदार्थ इव विशेषेषु व्याप्तिभेदबाधेन स्वविशेषनिष्ठव्याप्तिभेदकत्वरूपसाधनाप्रसिद्धेर्दुर्वारत्वात्। ननु व्याप्तित्वाभावः व्याप्तिपदानुषङ्गलभ्यतत्तदव्यभिचाराविषयकत्वं तदवच्छिन्नाविषयकत्वं वा न हेतुः। विशिष्टवैशिष्ट्यबोधजनकत्वे व्यभिचारात्। तत्तदव्यभिचार-

न्यायरत्नं।

साध्यसिद्धेरुद्देश्यत्वे आलोकादिलिङ्गकानुमितिजनकतायां धूमविषयताघटितसाध्यस्य मतद्वयेपि सत्त्वात्सिद्धसाधनं। लिङ्गभेदेपि कारणतैक्यमते व्यापकसामानाधिकरण्यज्ञानस्य पृथक् हेतुतामादायार्थान्तरं। पक्षतानिष्ठजनकतायां निरुक्तसाध्यपर्यवसानमादायार्थान्तरं चेति चेन्न। हेतुविषयतेत्यनेन मुख्यविशेष्यविशेषणतापन्नधर्मप्रकारत्वस्य विवक्षितत्वात्। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वाच्च न दर्शितदोषावकाशः। तच्च प्रकारत्वं धर्मितावच्छेदकतानापन्नपदार्थीयत्वेन सामानाधिकरण्यविशेषणतापन्नपदार्थीयत्वेन च विशेषणीयं। तेन वह्न्यभाववदवृत्तिधर्मत्वावच्छिन्नपक्षकानुमितिजनकतायां वह्न्यभाववदवृत्तिधूमत्वावच्छिन्नहेतुकानुमितिजनकतायां च न बाधः। नचैवमपि सामानाधिकरण्यत्वेन साध्याभाववद्वृत्तित्वाभावावगाहिज्ञाननिष्ठजनकतायां बाध इति वाच्यम्। अव्यभिचार्यपदार्थावच्छिन्नहेतुविषयताया भ्रमान्यवृत्तित्वेन विशेषणीयत्वात्। यद्वा अव्यभिचारपदार्थतावच्छेदकावच्छिन्ना या अव्यभिचारपदार्थमात्रवृत्तिविषयता तन्निरूपितत्वं हेतुविषयतायां निवेश्यं। मात्रपदार्थान्तर्भावाच्च न साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकपर्यन्तस्य व्याप्तित्वमते वह्न्यभाववदवृत्तिहेतुकानुमितिजनकतायां बाधः॥

अथ निरुक्तपक्षसाध्यरूपार्थः कथं मूलवाक्याल्लभ्यत इति चेल्लक्षणयैवेति ब्रूमः। ननु तद्धि नेति मूलमपार्थकं तत्पदे सन्निहितपूर्वाव्यभिचरितत्वबोधसाधनात्तत्र च साध्याभाववदवृत्तित्वादिभेदस्य बाधादित्याशङ्क्याह—**तदव्यभिचरितत्वमिति**। तथाच साध्याभाववृत्तित्वस्य तत्पदार्थो विशेषणमतो न बाध इति भावः। नचैवमपि तत्पदं व्यर्थमिति शङ्क्यम्। तथा सति साध्याभाववदवृत्तित्वावादीनां विशेषधर्मत्वालाभेन तदवच्छिन्नभेदकूटस्य हेतोरप्रयोजकतालाभान्न्यूनतापत्तेरिति दिक्॥

१ दिकं इति त. पु. अधिक. पा.

णान्वयः। तथाच साध्याभाववदवृत्तित्वादिरूपा [1]येऽव्यभिचारपदार्थाः[2]स्तदवच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नत्वाभावकूटवत्त्वादिति निरुक्तपर्यवसितसामान्याभावसाधकः फलितो हेतुः। नचाप्रयोजकत्वम्। विशेषाभावकूटस्य सामान्याभावव्याप्यतायाम[3]विवादात्। तत्र[6] साध्याभाववदवृत्तित्वादिरूपाः ये, पञ्चाव्यभिचारपदार्थाः, तदवच्छिन्न[5]विषयताघटितधर्मावच्छिन्नत्वाभाव[4]स्य प्रत्येकसाधकं हेतुं वक्ष्यति—**केवलान्वयिन्यभावादिति**। साध्येऽत्यन्ताभावाप्रतियोगित्वान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वग्रह-

कृष्णंभट्टीयं।

विषयकत्वानवच्छिन्नत्वोक्तौ वह्न्यभाववदवृत्तिपर्वतादिपक्षकपरामर्शजनकतायां स्वरूपासिद्धिश्चेत्यत आह—**तथाचेति**। देशः साध्याभाववदवृत्तिधूमवत्पर्वतवानिति विशिष्टवैशिष्ट्यबोधीयजनकतायां प्रतियोगिप्रसिद्धिघटितपदपर्याप्त्यनिवेशस्फोरकं तन्निवेशस्य निष्प्रयोजनत्वात्। तेन विशेषणतावच्छेदकप्रकारकगुणत्वेन हेतुतामतेपि न तदप्रसिद्धिः। अव्यभिचारपदार्था इति सामान्यविशेषलाभाय नतु हेतुघटकं। वैयर्थ्यात्। **अविवादादिति**। अव्याप्यवृत्तितत्तत्संयोगाभावकूटस्य संयोगसामान्याभावव्यभिचारित्वस्य विवादोपि तदतिरिक्तविशेषाभावकूटस्य सामान्याभावव्यभिचारित्वस्य केनाप्यनभ्युपगमादित्यर्थः। तथाच विशेषाभावकूटवान्यदि सामान्याभाववान्न स्यात्तदा सामान्याभावविरोधिमान्स्यादित्येवानुकूलतर्कः। सच पक्षतावच्छेदकसामानाधिकरण्येनापादकवत्ताज्ञानजन्यतया तदवच्छेदेन सामान्याभाववत्तानिश्चये उपयुज्यते। केवलान्वयिसाध्यकानुमितिजनकपरामर्शावृत्तित्वस्य हेतुत्वे स्वरूपासिद्धिरत आह—**साध्य इति**। केवलान्वयित्व-

न्यायरत्नं।

स्यादेतद्भेदानुयोगिवाचकं पदान्तरमुपलभ्येत तदेव न। तथाच तत्पदस्यैव तथात्वं वक्तव्यं तथाच कथं न पूर्वोक्तदोषावकाश इत्यत आह—**व्याप्तिरिति**। तथाच तादृशव्याप्तिपदसत्वान्न दोष इति भावः। **अनुषङ्गेणेति**। अनुषङ्गो वाक्यान्तरे स्वस्मात्पूर्वपठिते श्रुतस्य पदस्य स्वघटकत्वेनानुसन्धानम्। अतादृशपदानुसंधानमध्याहार इति विवेकः। नन्वत्र साध्याभाववदवृत्तित्वादिभेदकूटस्य हेतुत्वेऽव्यभिचारविशिष्टवैशिष्ट्यावगाहिबोधजनकतायां तादृशहेतुमत्यां निरुक्तसाध्यासत्वाद्यभिचार इत्यतः पर्यवसितहेतुमाह—**तथाचेति**। अत्रापि हेतुपदप्रयोजनं पूर्ववदेव। अन्यत्रापि पूर्ववद्बोध्यम्॥ **घटितेति**। एतच्च

---

१ ये ये. का. पाठः. २ तत्त इ० का. पा. पंचेति त. पाठे० अ. ३ तायाः का. पाठः. ४ कूटस्येति त. पा. ५ तत्तदवच्छिन्न का. पाठः. ६ अत्र का. पाठः.

दशायां अत्यन्ता(भावा)न्योन्याभावयोः साध्यतद्वत्त्वावच्छिन्नप्रतियोगिताकत्वभानासंभवेन प्रतियोगितया साध्यतदाश्रयविशेषितात्यन्तान्योन्याभाववदवृत्तित्वावच्छिन्नविषयतायास्तादृशविशेषदर्श्यनुमितिजनकज्ञानेऽभावादित्यर्थः । एवंच तादृशविषयतया शून्यवृत्तित्वमेव अनुमितिजनकतायां दर्शितसाध्यसाधको हेतुरभिमत इति

कृष्णंभट्टीयं ।

ज्ञानकालीनतादृशानुमितिजनकज्ञानेऽव्यभिचारपदार्थावच्छिन्नहेतुविषयताकत्वाभावादित्यर्थः । तद्विरहकालीने ज्ञाने हेत्वसिद्धिवारणाय कालीनान्तम् । व्यतिरेकिण्यपि केवलान्वयित्वज्ञानदशायामव्यभिचाराभानं द्रष्टव्यम् ॥

अत्राभावे प्रतियोगितासंबन्धेन वाच्यत्वज्ञानंप्रति तद्विषयकतत्संबन्धावच्छिन्नवाच्यत्वाभावज्ञानं प्रतिबन्धकमित्यादिकमूह्यम् । साध्यवद्भेदादिघटितलक्षणानुरोधेन द्वितीयकेवलान्वयित्वोपादानम् । नन्वत्रानुमितिजनकज्ञाने तादृशविषयताकत्वाभावो न हेतुः । स्वरूपासिद्धेस्तादृशज्ञानस्यापक्षत्वाच्च । नापि तादृशविषयताशून्यानुमितिजनकत्वम् तद्विशिष्टज्ञानत्वं वा । स्वरूपासिद्धेः । अतएव न तादृशविषयताशालिज्ञानावृत्तित्वं । अव्यभिचरितत्वहेतुव्याप्यसाध्यसामानाधिकरण्योभयज्ञानमादायोक्तदोषात् । नचाभावस्तादृशविषयताशून्यत्वं स इति वाच्यम् । विशिष्टवैशिष्ट्यबोधजनकत्वे वा व्यभिचारादित्यत आह—**एवंचेति । तादृशविषयता** तत्तदव्यभिचारि-

न्यायरत्नं ।

पर्याप्त्यनिवेशसूचनाय । तन्निवेशे साध्यहेत्वोरप्रसिद्ध्यापत्तेः । **विशेषेत्यादि** । ननु संयोगविशेषभावकूटस्य तत्सामान्याभावसाधकत्वं न सर्वानुमतं । प्राचीनमते तदभावात् । मैवं । व्याप्यवृत्तिप्रतियोगिकाभावकूटस्य तत्वे विवादाभावात् । ननु कूटरूपहेतुरसिद्ध इत्याशङ्क्याह—**तत्रेति** । केवलान्वयीत्यादिमूले केवलान्वयिपदं न वास्तवकेवलान्वयिपरम् । अभावादित्यस्य साध्याभाववदवृत्तित्वाभावपरतया तत्र तादृशाभावाद्यसंभवात् । यदि तत्त्वेन ज्ञातपरं तदा तादृशकेवलान्वयित्वाक्रान्ते धूमादौ तादृशाभावासत्त्वाज्ज्ञेयत्वादावसत्त्वाच्च व्याहतिर्नितरामिति केवलान्वयिपदस्य केवलान्वयित्वग्रहकालीनानुमितिजनकज्ञानपरत्वमभावपदस्य च साध्याभाववदवृत्तित्वविषयत्वाभावपरत्वं चावलम्ब्य व्याचष्टे—**साध्येति** । इत्थं च केवलान्वयिनि निरूप्यनिरूपकभावापन्नतादृशविषयत्वग्रहसंभवान्न व्याहतिरिति भावः । अत्रात्यन्तान्योन्याभावघटितद्विविधव्याप्त्यभिप्रायेणात्यन्तान्योन्याभावघटितद्विविधकेवलान्वयित्वग्रहोपन्यासः ।

अथात्यन्ताभावाप्रतियोगित्वान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वग्रहौ नात्यन्तान्योन्याभावघटितव्याप्तिग्रहे प्रतिबन्धकौ भवितुमर्हतस्तत्संसर्गकविशिष्टबुद्धौ तदभावप्रकारकज्ञानस्याप्रतिबन्धकत्वात् । साध्यप्रतियोगि-

---

१ हेतुविषतेति त. पा. २ दशाविशेषीया का. पाठः

नासिध्यादिः । ईदृशदिशाऽग्रिमहेतवोऽपि परिष्करणीयाः ॥

कृष्णंभट्टीयं ।

त्वविषयता । दर्शितसाध्यं कूटघटकीभूतप्रत्येकाभावरूपं नासिद्ध्यादिरित्यादिना नन्वद्वयवैयर्थ्यपरिग्रहः । अग्रिमेति । नापीत्यादिग्रन्थदूषणरूपाः केवलान्वयिन्यभावादयः परिष्करणीयाः। साध्यनिष्ठाधेयत्वानिरूपकेत्यादिक्रमेण तादृशप्रतियोग्यधिकरणतासामान्यकत्वावच्छिन्नहेतुविषयताघटितधर्मानवच्छिन्नत्वादिसाधकाः तादृशहेत्वविषयकज्ञानवृत्तित्वादय इत्यर्थः । यद्यपीदृशरीत्या अव्याप्तिदर्शनस्य इतरभेदानुमितौ व्यभिचारवारकतयाऽतिव्याप्तिप्रदर्शनस्य च सार्थकत्वेऽपि असंभवप्रदर्शनवैयर्थ्यम्, तथापि विरुद्धत्वग्रहणेतरभेदानुमित्यनुपपत्तिः स्यादिति तत्प्रदर्शनम् । यद्वा व्याप्तौ सामानाधिकरण्येन लक्षणग्रहादवच्छेदकावच्छेदेनेतरत्वसंशयनिवृत्तिसत्वेपि सामानाधिकरण्येन तत्संशयोऽनुवर्तते, असंभवे तु तद्द्वयमपीति विशेषव्युत्पादनाय पृथक् तदुभयोपादानम् । एवंच सामानाधिकरण्येनेतरत्वसंशयवारणावच्छेदकावच्छेदेन लक्षणग्रहोऽव्याप्तिनिरासफलमिति ।

अव्याप्यवृत्तिसाधके दीधितौ अवच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकतया अव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेन लक्षणासत्वमिति नियमोऽभिप्रेतः । नचाव्याप्यवृत्तिसाध्यं यस्य सः अव्याप्यवृत्तिसाध्यकः तादृशश्चासौ सद्धेतुश्चेति व्युत्पत्त्या कपिसंयोगी गगनादित्यादौ व्यभिचार इति वाच्यम् । सत्पदस्य वृत्तिमदर्थकत्वात् । नन्वेवमपि कपिसंयोगाभाववान्गुणत्वादित्यादौ व्यभिचारः। नचाव्याप्यवृत्तिसाध्यं यत्र तदव्याप्यवृत्तिसाध्यकं तत्र सन् वर्तमानो यो हेतुरिति व्युत्पत्तेः साध्यनिष्ठाव्याप्यवृत्तितानिरूपकाधिकारवृत्तिहेतुतावच्छेदेनाव्याप्तिरिति निष्कर्षे न दोष इति वाच्यम् । तथासति सत्पदवैयर्थ्यापातात् । सत्पदबलादेव तादृशार्थलाभ इत्युक्तौ च कपिसंयोगीसत्वादित्यादौ निरुक्तोद्देश्यतावच्छेदकविधेयोभयाक्रान्तहेतौ अव्याप्तेऽपरलक्षणेन दुर्वारत्वादसंगतिः । हेतुपदस्य व्याप्तिमदर्थकत्वेपि कपिसंयोगाभाववान्द्रव्यत्वादित्यादेर्नियमविषयस्य साध्यवद्भेदाप्रसिद्ध्या परक्षणेनासंग्रहादसंगतिरितिचेन्न । न व्याप्यवृत्तिरव्याप्यवृत्तिरिति व्युत्पत्त्या निरवच्छिन्नवृत्तिकान्यत्वमव्याप्यवृत्तित्वमित्यदोषात् । गगनवान्वह्नेरित्यादौ साध्ये निरुक्तव्याप्यवृत्तित्वसत्वेपि तदधिकरणाप्रसिद्धेर्नोत्तरलक्षणासत्वेपि क्षतिः । हेतुत्वस्य तत्रा-

न्यायरत्नं ।

त्वतदवच्छिन्नप्रतियोगित्वसंसर्गकव्याप्तिज्ञानस्यैव लाघवेनानुमितिहेतुतया तादृशप्रतियोगितासंसर्गकव्याप्तिज्ञाने निरुक्तकेवलान्वयित्वग्रहयोरप्रतिबन्धकत्वादिति चेन्न । साध्येत्यन्ताभावाप्रतियोगित्वज्ञानेऽभावेऽपि प्रतियोगितया साध्याभावावगाहनस्य तुल्यवित्तिवेद्यतामतसिद्धत्वात्तदवगाहिज्ञानस्य व्याप्तिग्रहप्रतिबन्धक-

कृष्णंभट्टीयं।

भावात्। नच यत्किंचिज्जन्यज्ञानविषयतावान् वाच्यत्वादित्यादौ तथात्वेपि उत्तरलक्षणेन तदव्याप्तेरवारणमिति वाच्यम्। देशनिष्ठावच्छेदकत्वातिरूपकत्वस्य प्रकृते व्याप्यवृत्तित्वात्।

वस्तुतस्तु—केवलान्वयिनि पृथग्दोषस्य दर्शनीयतया केवलान्वयिभिन्नाव्याप्यवृत्तिमध्ये तु सामान्येव्याप्तिरित्येव नियमः। केवलान्वयिभिन्नत्वमन्योन्याभावप्रतियोगितावच्छेदकत्वमिति न कोऽपि दोषः। अव्याप्यवृत्तित्वं स्वाभावसामानाधिकरण्यं नतु निरवच्छिन्नवृत्तिकान्यत्वं। संयोगी द्रव्यत्वादित्यादौ नियमभङ्गापत्तेः। प्राचांमते द्रव्ये संयोगसामान्याभावासत्वेनोद्देश्यतावच्छेदकाक्रान्ते तत्राव्याप्त्यभावात्।

केचित्तु स्वप्रतियोगित्वस्वसमानाधिकरणत्वस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वैतत्रितयसंबन्धेन यत्किंचिदभावविशिष्टत्वमव्याप्यवृत्तित्वं। तृतीयसंबन्धनिवेशात्कपिसंयोगभाववान्गुणत्वादित्यादेर्न संग्रहः। प्रथमसंबन्धनिवेशादाकाशाभावमादाय द्वितीयसंबन्धनिवेशाद्द्रव्यत्वाभावमादाय च द्रव्यत्वस्याव्याप्यवृत्तित्वेपि च द्रव्यत्वसाध्यकपृथिवीत्वादेर्न संग्रहः। कपिसंयोगी एतत्वादित्यादौ साध्यस्य द्रव्यान्तर्भावेन कपिसंयोगाभावसामानाधिकरण्यस्य गुणान्तर्भावेण तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्य प्रतियोगित्वस्य च सत्वेनोक्तत्रितयसंबन्धेन कपिसंयोगाभावरूपयत्किंचिदभावविशिष्टत्वासंग्रहः। एतेन सर्वं प्रमेयमिति यत्किंचिज्ज्ञानव्यक्तेर्विषयतासंबन्धेन साध्यतायां घटत्वादिहेतोर्निरवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वकल्पे व्याप्यवृत्तित्वसाध्यकसद्धेतुत्वेन संग्रहादुत्तरलक्षणस्या-[त्वात्]सत्वेन तद्दोषतादवस्थ्यम्। विषयतासंबन्धेन तादृशज्ञानव्यक्तेः केवलान्वयित्वादिति दूषणमनवकाशमित्याहुः॥

अत्र भेदाव्याप्यवृत्तित्वमते कपिसंयोगाभावसाध्यकगुणत्वादेः संग्रहवारणाय संबन्धघटकभेदप्रतियोगितायां केवलान्वयिधर्मानवच्छिन्नत्वं स्वाधिकरणे निरवच्छिन्नवृत्तित्वं वा भेदे निवेश्यम्। पूर्वमते तु भेदे निरवच्छिन्नवृत्तिकत्वमिति। एतेनानवच्छिन्नवृत्तिकान्योन्याभावसाध्यकवृत्तिमत्सद्धेतुसामान्येऽव्याप्तिरिति कपिसंयोगाभावसाध्यकवारकनियमोप्यपास्तः। तथापि जन्य[ज्ञानादि]साध्यके उक्तदोषात्॥

न्यायरत्नं।

त्वावश्यकत्वमित्यभिप्रायात्। यद्वा प्रतियोगितासंसर्गावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकावच्छिन्नाभावप्रकारकाभावत्वावच्छिन्नविशेष्यकग्रहदशायां स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकाभावप्रकारकाभावत्वावच्छिन्नविशेष्यकग्रहदशायां वेत्यस्यैव विवक्षितत्वात्तयोश्च तादृश-

१ कीर्तनीयतया मै. पाठः.

कृष्णंभट्टीयं ।

परेतु स्वसमानाधिकरणाभावप्रतियोगिसाध्यकसद्धेताविल्यर्थः । स्वं हेतुः । अभावो भावभिन्नः । स्वसामानाधिकरण्ये च कालानवच्छिन्नत्वं देयम् । यद्वा निरवच्छिन्नवृत्तिकान्यसाध्यसमानाधिकरणसद्धेताविल्यर्थः । तेन गगनादिसाध्यके न दोषः । जन्यज्ञानसाधकवारणं प्राग्वदित्याहुः । तन्न । रूपवान्पृथिवीत्वादित्यादौ अव्याप्तेरकथनेन न्यूनतोपात्तेन ग्रन्थस्थकालपदविरोधात् । अत्र घटत्वतद्यधिकरणसंयोगाद्योरन्यतरत्वेन साध्यतायां तद्यक्तित्वा[दित्या]दावव्याप्तिविरहेण सप्तमीतत्पुरुषपक्षमेव बहवोऽरोचयन्ते । अतएव गुणवाञ्जलपरमाणुरूपादित्यादावव्याह्यसत्वेऽपि न क्षतिरिति दिक् । इति अवतरणिका ॥

न्यायरत्नं ।

व्याप्तिग्रहप्रतिबन्धकत्वात् । नच दर्शितग्रहयोरभावत्वसामानाधिकरण्येन तादृशभावप्रकारकत्वे तादृशग्रहयोर्न व्याप्तिग्रहविरोधित्वं । सामानाधिकरण्येन ग्राह्यबुद्धौ सामानाधिकरण्येन तदभावग्रहस्याविरोधित्वात् । अभावत्वावच्छेदेन तादृशाभावप्रकारकत्वे चाहार्यत्वापत्तिरभावांशे साध्यस्यैव भानादिति वाच्यम् । साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताया एव प्रतियोगितावच्छेदकसंबन्धतया तेन संबन्धेनाभावांशे साध्यस्याभानेनाहार्यत्वानवकाशात् । ननु केवलान्वयिन्यभावादित्यनेन केवलान्वयित्वग्रहकालीनानुमितिजनकज्ञानवृत्तित्वमभावे लब्धं तत्र विशिष्टस्योपलक्षितस्य वा हेतुत्वं विशिष्टत्वहेतुत्वे स्वरूपासिद्धिर्ज्ञानवृत्तित्वविशिष्टस्यानुमितिजनकतायामभावादुपलक्षितस्य हेतुत्वे साध्याभाववदवृत्तित्वविशिष्टवैशिष्ट्यबोधजनकतायां तादृशज्ञानवृत्तित्वोपलक्षितसाध्याभाववदवृत्तित्वविषयत्वाभावसत्त्वेन साध्यस्य चासत्त्वेन व्यभिचार इत्यतः पर्यवसितहेतुमाह—एवंचेति । आदिपदेन व्यभिचारपरिग्रहः । इति अवतरणिका समाप्ता ।

इति अवतरणिका समाप्ता ॥

अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह—साध्यवद्भिन्नेति।

दीधितौ—अव्याप्येति ॥ कपिसंयोग्येतद्वृक्षत्वादित्यादावि-

कृष्णंभट्टीयं।

दीधितावव्याप्तिमिति। ननु गुरुधर्मावच्छिन्नसाध्यके साध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्या अव्याप्तिवारणाय साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावः साध्याभावपदेन विवक्षणीयः। व्यापकत्वं च प्रतियोगिवैयधिकरण्याघटितमिति न कपिसंयोगित्वावच्छिन्नाभावसंग्रहः। किंतु द्रव्यत्वत्वाद्यवच्छिन्नाभाव एवेति नाव्याप्तिरिति चेन्न। गुरोरपि प्रतियोगितावच्छे-

न्यायरत्नं।

दीधितावव्याप्यवृत्तिसाध्यकसद्धेताविति। अथात्र सत्पदं व्यर्थम्। नच तदनुपादाने संयोगसाध्यकगगनहेतोरप्यव्याप्यवृत्तिसाध्यकहेतुत्वाक्रान्ततयोत्सर्गसिद्धस्य तदवच्छेदेनाव्याप्तिरूपविधेयान्वयस्य बाधः स्यादतो-वृत्तिमदर्थकं तदुपात्तमिति वाच्यम्। द्रव्यत्वादीनां संयोगेन पृथिवीत्वादिव्याप्य-

---

१ अव्याप्यवृत्तिसाध्यकसद्धेताविति शिरोमणिः। कपिसंयोगी गगनात् इत्यादावव्याप्तिविरहात् वृत्तिमद्धेतावव्याप्त्यर्थं सत्पदं। अथैवमपि कपिसंयोगाभाववान् गुणत्वादित्यादौ अव्याप्तिर्न संभवतीति कथम्? अव्याप्यवृत्तिसाध्यकहेतुत्वावच्छेदेन अव्याप्तिरुक्ता, नच अव्याप्यवृत्ति साध्यं यत्रेति व्युत्पत्त्या तत्र सन् वर्तमानो यो हेतुः तत्राव्याप्तिरिति वाच्यं। तथा सति अव्याप्यवृत्तिसाध्यके हेतुरिति समासेनैव गगनहेतुनिराकरणे सत्पदवैयर्थ्यापत्तेः। किंच संयोगाभावसाध्यकद्रव्यत्वहेतावव्याप्तिसंभवे द्वितीयलक्षणेऽपि तद्वारणं न स्यात्। तस्मात् केवलान्वयिभिन्नअव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेन अव्याप्तिवारणाय द्वितीयलक्षणमिति युक्तमनुचिन्तयामः॥

प्रथमलक्षणे वृत्तं वृत्तिः भावे निष्ठाप्रत्ययात् वृत्तस्याभावो अवृत्तं वृत्त्यभाव इति यावत्। साध्याभाववतो अवृत्तं साध्याभाववदवृत्तम्। साध्याभाववद्वृत्त्यभाव इति यावत्। तत् यत्रास्ति साध्याभाववदवृत्ती। मत्वर्थे येन् प्रत्ययात् तस्य भावः साध्याभाववदवृत्तित्वम्। तथाच साध्याभाववदवृत्त्यभाववत्त्वमिति फलितमिति प्राञ्चः। तदसत् "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः" इत्यनुशासनविरोधात्। तत्र कर्मधारयपदस्य बहुव्रीहीतरसमासपदत्वात् तच्च अगुणत्वमिति साधर्म्ये व्याख्यानावसरे गुणप्रकाररहस्ये, दीधिति रहस्ये च स्फुटम्। अव्ययीभावोत्तरपदार्थेन समं तत्समासनिष्ठपदार्थान्तराऽन्वयस्य अव्युत्पन्नत्वाच्च। भूतले उपघटम् भूतले अघटम् इत्यादौ भूतलवृत्तिघटसमीपतदत्यन्ताभावयोरप्रतीतेः। एतेन वृत्तेरभावो अवृत्तीत्यव्ययीभावानन्तरं साध्याभाववतो अवृत्ती यत्रेति बहुव्रीहिरित्यपि प्रत्युक्तम्.

२ एतत्वादि का. पाठः

कृष्णंभट्टीयं ।

दकत्वोपगमेनैतादृशविवक्षाया निष्प्रयोजनकत्वेनाव्याप्तिसंगतेः । गुरोः प्रतियोगितानवच्छेदकत्वमतेऽपि नैतद्विवक्षणमावश्यकम् । गुरुधर्मावच्छिन्नसाध्यकहेतोः केवलान्वयिसाध्यकत्वाक्रान्ततया तत्राव्याप्तेर्वक्ष्यमाण[तया]त्वेन तद्वारणानपेक्षणात् । नच गुरुधर्माश्रयस्य कथं केवलान्वयित्वमिति वाच्यम् । हेतुतावच्छेदकसंबन्धानुयोगिनिष्ठाभावप्रतियोगितानवच्छेदकत्वस्य गुरुधर्मसाधारण्यात् । अस्तुवा गुरोः प्रतियोगितानवच्छेदकत्वमतमवलम्ब्य साध्याभावपदेनोक्ताभावविवक्षा । तथापि साध्यतावच्छेदकसंबन्धेनैव साध्यव्यापकताविवक्षणेन कपिसंयोगाद्यव्याप्यवृत्तिसाध्यकाव्याप्तिपरिहारेऽपि प्रतियोगिवैयधिकरण्यप्रवेशासत्त्वेन संयोगेन द्रव्याव्याप्यवृत्तितापक्षे संयोगेन साध्यतास्थले तेन संबन्धेन साध्यव्यापकत्वाप्रसिद्धिः । तद्वारणाय प्रतियोगिवैयधिकरण्यघटितव्यापकतानिवेशे च कपिसंयोगादिसाध्यकाव्याप्तिः । तादृशसाध्यव्यापकतावच्छेदकरूपावच्छिन्नयत्किंचित्साध्याभावनिवेशे तु कपिसंयोगी द्रव्यत्वादित्यादौ तादृशद्रव्यमात्रसमवेताभावमादायातिव्याप्तिरित्याशयेन दीधितिकृतोऽव्याप्तिकथनं युक्तमेव । नचैकसंबन्धावच्छिन्नत्वस्य विशेषणाविशेषतावच्छिन्नत्वस्य वा व्यापक(ता)त्वरूपावच्छिन्नप्रतियोगितयोर्दानान्नाव्याप्यवृत्तिसाध्यके क्वाप्यव्याप्तिरिति वाच्यम् । सकलदोषोद्धारानावश्यकत्वस्यावेदनीयत्वात् ।

न्यायरत्नं ।

तावारणाय हेतुतावच्छेदकसंबन्धेन वृत्तिमत्त्वस्योक्तयुक्त्याऽवश्यकतया तद्घटितलक्षणाव्याप्तेरपरिहारात्तदघटितलक्षणाव्याप्तेरेव विवक्षितत्वात्संयोगीसत्त्वादित्यादावव्याप्यवृत्तिसाध्यकत्वरूपोद्देश्यतावच्छेदकाक्रान्ते द्वितीयलक्षणेनाव्याप्तेरवारणात्सत्पदस्य व्याप्तिमदर्थकस्यावश्यकत्वाच्च । नच तथापि संयोगाभावसाध्यकगुणत्वहेतावुद्देश्यतावच्छेदकाक्रान्ते लक्षणासत्त्वविरहादसंगतिरिति वाच्यम् । अव्याप्यवृत्तिसाध्यकेत्यस्याव्याप्यवृत्ति साध्यं यस्मिंस्तदव्याप्यवृत्तिसाध्यकं तस्मिन्सन् वृत्तिमान्यो हेतुरित्यर्थकरणाद्गुणत्वादेश्च साध्यनिष्ठाव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वविरहात् ।

अथैवमपि संयोगाभावसाध्यकद्रव्यत्वहेतौ तादृशे द्वितीयलक्षणासत्त्वादसंगतिर्दुर्वारैवेति चेदत्र केचित् । अव्याप्यवृत्तिसाध्यकेत्यस्य न व्याप्यवृत्तिरव्याप्यवृत्तिरिति व्युत्पत्त्या निरवच्छिन्नवृत्तिकान्यसाध्यकहेतावित्यर्थः । तथाच संयोगाभावस्य गुणादौ निरवच्छिन्नवृत्तिकत्वेन तदन्यत्वविरहान्न तत्साध्यकहेतोरुद्देश्यतावच्छेदकाक्रान्तत्वमिति वदन्ति । तदसत् । जन्यज्ञानविषयत्वस्य विषयतासंबन्धेन जन्यज्ञानस्य वा साध्यतायां हेतौ निरुक्ताव्याप्यवृत्तिसाध्यके द्वितीयलक्षणासत्त्वेनासंगतेस्तथापि दुर्वारत्वात् ।

वस्तुतस्तु—अव्याप्यवृत्तिसाध्यकेत्यत्राव्याप्यवृत्तित्वं स्वसमानाधिकरणत्व-स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्व-स्वप्रतियोगिकत्व-एतत्त्रितयसंब-

त्यर्थः ॥ **अव्याप्तिमिति** ॥ तत्र हेत्वधिकरणे एतद्वृक्षादावन्यदेश-

कृष्णंभट्टीयं ।

अत्र साध्याभावनिष्ठव्याप्यवृत्तितानिरूपकत्वनिवेशेन कपिसंयोगादि-साध्यकाव्याप्तिनिरासेऽपि कपिसंयोगिभिन्नं (गुणत्वा)मेयत्वादित्यादौ साध्या-भावे कपिसंयोगे अतिरिक्ते वा व्याप्यवृत्तित्वासत्त्वेनाव्याप्तिर्द्रष्टव्या ।

न्यायरत्नं ।

न्धेन किंचिदभावविशिष्टत्वरूपं विवक्षितम् । संयोगाभावस्य स्वसमानाधिकर-णत्व-स्वप्रतियोगिकत्व-तदुभयसंबन्धेन संयोगरूपाभावविशिष्टत्वात्तत्साध्यक-हेतोरव्यावृत्तेः । स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वनिवेशः । तच्चा-वच्छेदकत्वं साध्यतावच्छेदकसंबन्धावच्छिन्नं ग्राह्यं । तेन संयोगाभावादेरपि संयोगसमानाधिकरणाभावप्रतियोगितानिरूपितकालिकसंबन्धावच्छिन्नावच्छेद-कत्वेपि न क्षतिः । स्वप्रतियोगि[क]त्वानिवेशे आकाशाभावविशिष्टद्रव्यत्वसा-ध्यकपृथिवीत्वहेतोः संग्रहः स्यादतस्तन्निवेशः । स्वसमानाधिकरणत्वानिवेशे द्रव्यत्वाभावमादाय तद्विशिष्टद्रव्यत्वसाध्यकपृथिवीत्वहेतोः संग्रहः स्यात्तत्र चाव्याप्तिविरहादतस्तन्निवेशः । उक्ताव्याप्यवृत्तित्वविशिष्टाधिकरणवृत्तित्वमेवा-व्याप्यवृत्तिसाध्यकत्वमतो रूपवाञ्जलपरमाणुत्वादित्यादौ यथाश्रुतेऽव्याप्यवृत्ति-साध्यकत्वरूपोद्देश्यतावच्छेदकाक्रान्ते अव्याप्तेरसत्वेऽपि न क्षतिस्तल्लाभश्च अव्या-प्यवृत्ति साध्यं यस्मिंस्तदव्याप्यवृत्तिसाध्यकं तस्मिन्सन्नित्यादिविग्रहाज्ज्ञेयः । उक्ताव्याप्यवृत्तित्वशरीरघटकसामानाधिकरण्यसंबन्धेन स्वविशिष्टस्य स्वाधिकरण एव सत्वेन तत्र जलपरमाणुत्वादेरसत्वान्न क्षतिः । अथ वादिवाक्यार्थविकल्प-स्थले यथाकाममेव विकल्पितार्थोपन्यासः संभवति नच तत्पौर्वापर्योपन्यासे नियोगपर्यनुयोगोऽस्ति । तथाच दीधितिकृतां पूर्वपूर्वलक्षणपरित्यागबीजकथनं किमिति चेत्,

अत्र वदन्ति । दीधितिकृतां पौर्वापर्ये लक्षणानां बीजकथने न तात्पर्यं येन भवदीयशङ्कावकाशः स्यात् । किंतु प्रथमादिलक्षणेऽव्याप्यवृत्तिसाध्यकादिस्थले-ष्वव्याप्त्यादिदोषानभिधानेन मणिकारीयन्यूनताया अवतरणव्याजेन परिहार एवेति । तेन च प्रथमलक्षण एवाव्याप्यवृत्तिसाध्यकाव्याप्तिर्न द्वितीयादि-लक्षणेऽपीत्यपि सूचितं भवति ।

केचित्तु लक्षणपञ्चकस्यैककर्तृकत्वाभावेन लक्षणपञ्चकस्यावतरणासंगतिमा-शङ्क्य मणिकृता व्युत्क्रमेण लक्षणोपन्यासः किमर्थं न कृत इति शङ्कायां "मधुरेण समापये"दिति न्यायेन परिजिहीर्षया लक्षणचतुष्टये दोषं प्रदर्श्य साध्यवदन्या-वृत्तित्वलक्षणस्य मधुरत्वमेव दर्शितं न लक्षणपञ्चकं पूर्वपूर्वदूषणेनावतारितमिति समाधानमाहुस्तदसत् । एवंसति तृतीयलक्षणस्य प्रथमत उपन्यासे बीजाभाव-स्तदवस्थ एव । **अव्याप्तिमिति** । अथ व्याप्यवृत्तिसाध्यकद्रव्यं पृथिवीत्वा-

१ वप्यन्य का. पा. त. पा. २ एतादृशानर्थभिया अवच्छेदकावच्छेदेनाव्या-प्त्यन्वयो न भट्टाचार्येण दर्शितः। वा. पुस्तके अधिकम् ।

कालावच्छेदेन कपिसंयोगाद्यभावसत्त्वादिति भावः। (प्रथमलक्षणं समाप्तम्)

कृष्णंभट्टीयं।

नन्वेतल्लक्षणपञ्चकस्य भिन्नपुरुषकर्तृकत्वादवतारणदानं दीधितिकृतामशुद्धं। एककर्तृकत्व एव तदपेक्षणादिति चेत्सत्यम्। दीधितिकृता अवतारणं न दत्तं। किंतु मणिकृता साध्यवदन्यावृत्तित्वमित्यारभ्य किं न कृतमित्याशङ्का स्यात्तामपनिनीषु"र्मधुरेण समापये"दिति न्यायमनुसृत्य मधुरत्वं पञ्चमलक्षणस्य प्रदर्शयितुं लक्षणचतुष्टयस्य दोषग्रस्तत्वं दर्शितमिति। **कालेति।** वह्निमान्धूमादित्यादावुत्पत्तिकालावच्छेदेन वह्न्यभावस्य हेत्वधिकरणपर्वतादौ सत्वादित्यपि बोध्यम्। [इति प्रथमलक्षणं]

न्यायरत्नं।

दित्यादावपि विशिष्टाभावमादायाव्याप्तिसंभवेनासंभव एव वक्तुमुचितो नाव्याप्तिः। नच घटवान्नित्यज्ञानत्वादित्यादौ लक्षणसमन्वयान्नासंभव इति वाच्यम्। तत्रापि नित्यज्ञानान्यत्वविशिष्टाभावमादायाव्याप्तेः। यदिच नित्यज्ञानान्यत्वविशिष्टघटोऽपि नित्यज्ञाने स्वीक्रियते, तथापि व्याप्यवृत्तिसाध्यकेऽपि क्वचिदव्याप्तिसंभवेन तदुपेक्षा निर्बीजा। नच साध्याभावपदस्य साध्यतावच्छेदकावच्छिन्नाभावपरतया न विशिष्टाभावमादाय दोष इति वाच्यम्। तथा सति साध्याभाववत्पदस्य साध्याभावीयनिरवच्छिन्नाधिकरणपरतां स्वीकृत्याव्याप्तेरपि शक्यवारणत्वात्। नच यथाश्रुताभिप्रायकता शक्यते वक्तुमसंभवस्यैव प्रसङ्गात्। (**अत्रेदं समाधानं**) प्रतियोगितासंसर्गकव्याप्तिज्ञानस्यैवानुमितिहेतुतयाऽभावांशे साध्यस्य प्रतियोगितासंसर्ग एव निवेशनीयः। तत्रच स्वलक्षणोक्तरीत्या साध्यविशेषणीभूतसाध्यतावच्छेदकावच्छिन्नप्रतियोगितात्वेनैव प्रतियोगिता भासत इति किंचिद्धर्मविशिष्टसाध्यस्याभावमादाय न दोषः। एतेनाथात्र नाव्याप्तिसंभवो गुरुधर्मावच्छिन्नसाध्यकाव्याप्तिवारणाय साध्याभावपदेन साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्यैवाभावस्य विवक्षणीयतया तत्र व्यापकतायां प्रतियोगिवैयधिकरण्यानिवेशेन संयोगाभावस्य लक्षणाघटकत्वात्तादृशद्रव्यत्वाभावमादाय लक्षणसंगमनादित्याशङ्क्य तादृशस्थलस्य हेतुतावच्छेदकसंबन्धानुयोगिनिष्ठाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकत्वरूपकेवलान्वयिसाध्यकत्वेन तत्राव्याप्तेरिष्टत्वात्साध्याभावपदेन तादृशाभावविवक्षाया निष्प्रयोजनकत्वात्। तथा विवक्षणेऽपि मिश्रलक्षणोक्तदिशाऽव्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशावश्यकतया संयोगाभावस्य लक्षणघटकत्वादव्याप्तिरस्त्येवेति समाधानं हेयं। यथाश्रुतलक्षणवाक्यलभ्य एवार्थे दूषणदानात्। **आशङ्क्येति।** साध्यवत्ताग्रहविरोधितानियामकसंबन्धेनैव साध्याभाववत्ताया निवेशनीयतया निरवच्छिन्नदैशिकविशेषणतायास्तथात्वे व्याप्तिविरहादव्याप्तेराहेत्यनुक्ताऽव्याप्तिमाशङ्क्येत्युक्तिरिति केचित्। **गादाधर्यां कपिसंयोगीति।** संयोगसामान्याभावस्य द्रव्ये सविवादतया कपिपदम्। [इति प्रथमलक्षणम्।]

(अथ द्वितीयलक्षणं) साध्यवद्भिन्नो यः साध्याभाववा[1]निति कर्मधारये अभेदसंबन्धेन साध्यवद्भिन्नीयं यत्साध्याभावाधिकरणं, तदवृत्तित्वम[2]र्थः स्यात्। तथा सति तद्घटकीभूतस्य अभेदसंबन्धेन सा-

कृष्णंभट्टीयं।

[अथ द्वितीयलक्षणं] कर्मधारय इति । तत्पुरुषमपेक्ष्य लाघवं, अधिकरणभेदेनाभावभेदमतानाश्रयणं चेत्याशयः । **अभेदेति ।** एतच्च

न्यायरत्नं।

[अथ द्वितीयलक्षणम्।] ननु दीधित्युक्ततत्पुरुषपक्षोऽसंगतः कर्मधारयपक्षे लाघवादधिकरणभेदेनाभावभेदानभ्युपगमाच्चेत्याशङ्कायामाह—**साध्यवद्भिन्नो यः साध्याभाववानित्यादि। अभेदेति।** एतच्च गुरुधर्मस्या-

---

१ **अत्र केचित्।** तत्पुरुषस्य स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यवद्भिन्नवृत्तित्व, स्वतादात्म्य, एतदुभयसंबन्धेन साध्याभावविशिष्टो योऽभावः तदधिकरणावृत्तित्वमर्थः पर्यवस्यति । कर्मधारयपक्षेऽपि स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यवद्भिन्नत्व, स्वाधिकरणत्व, एतदुभयसंबन्धेन साध्याभाववत्वरूपार्थः पर्यवस्यति । स्वपदेन विशेष्यविधया समासे यो बोध्यते, तत्प्रतियोगितावच्छेदकसंबन्धेन साध्यवद्भिन्न एव स्वरतो बोध्यते । अतः साध्याभावः तत्पुरुषपक्षे विशेष्यः स्वपदेन तस्यैव बोधनात्। कर्मधारयपक्षे तु साध्याभाववतो विशेष्यतया स्वपदेन साध्याभावोपादानं न संभवति । साध्याभावस्य कर्मधारये विशेष्यविधया अनुपस्थानात्। अतः कर्मधारयं परित्यज्य तत्पुरुषमादृत इत्याहुः ॥

साध्याभावश्चात्र साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताको ग्राह्यः । प्रतियोगितायां तादृशरूपवृत्तित्वं च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन बोध्यः । साध्यतावच्छेदकताप्रतियोगिकेत्यादिकथने विषयितया प्रतियोगितया वा महानसीयवह्नेः साध्यत्वे तद्व्यक्तित्वहेतौ अव्याप्त्यापत्तिरतः साध्यतावच्छेदकतत्त्वावच्छिन्नत्वं तादृशप्रतियोगितायां विशेषणमुपात्तम्। एवं संबन्धदले तादृशप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नत्वविशेषणस्यापि फलम् । वह्निमान्धूमादित्यादौ महानसीयवह्न्याद्यभावमादाय प्रसंजिताया अव्याप्तेर्वारणमिति विभावनीयम् सर्वत्र सामान्याभावनिवेशे एष एव प्रकारः समाश्रयणीयः ।

क्रोडपत्रशब्दार्थः । क्रोडे (उपचारात्) मध्ये स्थितं पत्रं । ग्रन्थलेखने भ्रमात् त्रुटितस्य ग्रन्थस्य परिपूरणाय वा व्याख्यानादिना न्यूनतापूरणाय ग्रन्थस्थपत्रमध्ये चिह्नविशेषेण लिखित्वा स्थापितं पत्रं ।

२ मित्यर्थः का. पा.

साध्यवद्भिन्ने यः साध्याभावस्तद्वदवृत्तित्वमित्यर्थः ।

ध्यवद्भिन्नीयं यत्तदवृत्तित्वस्यैव लक्षणत्वसंभवात्साध्याभाववत्त्वांशस्य वैयर्थ्यापत्तिरतः[1] साध्याभावपदेन साध्यवद्भिन्नपदस्य सप्तमीतत्पुरुषं[2] व्याचष्टे—**साध्यवद्भिन्न इति** ॥ तथाच साध्यवद्भिन्नवृत्तिर्यः साध्याभावः तद्वदवृत्तित्वमर्थः । तत्र पूर्ववदभेदेन साध्यवद्भिन्नपदार्थ[3]विशेषितधर्म्यवृत्तित्वादेर्न[4] घटकता, वृत्त्यादिविशेषणतयैव साध्यवद्भिन्नस्य निवेशादिति न साध्याभावांशवैयर्थ्यमिति भावः । अभावे

कृष्णंभट्टीयं ।

गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमङ्गीकृत्य । तेन साध्यवद्भिन्नवृत्तितात्वस्यैव लघुत्वेऽपि न क्षतिः। **वैयर्थ्यापत्तिरिति** । प्रकृतलक्षणघटकस्येति न्यायात् मतुप्पदस्थाने संबन्धिपदं योज्यम् । तेन प्रकृत्यसमभिव्याहारेऽपि न दोषः । नच साध्याभावांशनिवेशेन यथासंनिवेशोऽस्त्विति वाच्यम् । प्राचां गुरोरिवाव्यावर्तकस्य सर्वमते स्वभाव एवानवच्छेदकत्वात् योगतः साध्याभावघटितस्यैव वाऽव्यभिचरितत्वशब्दबोध्यत्वसंभवात् । तद्घटितस्य न बोध्यत इति केचित् । व्याचष्टे विवृणोति । तत्समानार्थकवाक्यरूपविवरणैकदेशेऽर्थत्वघटकज्ञानजन्यत्वरूपद्वितीयार्थान्वयः । **साध्यवदिति** ।

न्यायरत्नं ।

भावप्रतियोगितावच्छेदकत्वमङ्गीकृत्य तेन साध्यवद्भिन्नवृत्तित्वापेक्षयाऽभेदेन साध्यवद्भिन्नविशिष्टसाध्याभाववद्वृत्तित्वस्य गुरुत्वेनानवच्छेदकतया न तदवच्छिन्नाभावरूपलक्षणवाक्यार्थाप्रसिद्धिः । **साध्याभावांशवैयर्थ्यमिति** । तद्वैयर्थ्ये च तद्घटितधर्मस्य व्याप्यतावच्छेदकत्वासंभवादितरभेदानुमानासंभवेनानुमितिलक्षणघटकत्वासंभवात्तदुपोद्धातसङ्गत्या तन्निरूपणासंभवादिति भावः । अथात्र व्याप्यतावच्छेदकत्वप्रयोजकव्यर्थविशेषणघटितत्वं न संभवति स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितस्यैव तस्य नीलधूमत्वादौ दृष्टत्वात् । प्रकृते च साध्यवद्भिन्नाधिकरणवृत्तित्वत्वपर्याप्तावच्छेदकताकाभावादन्य एव साध्याभावघटितरूपपर्याप्तावच्छेदकताको भव इति । तच्छरीरे साध्याभावाघटितरूपावच्छिन्नाभावस्यानिवेशादेतल्लक्षणे गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वावश्यकत्वाच्च । नच स्वसमानाधिकरणेत्या-

---

१ वैयर्थ्येत्यारभ्य पदस्येत्यन्तं व. पा. नास्ति. २ षेणेति त. पा. ३ भिन्नीयावृत्तित्वादेरिति व. पा. ४ तादृशपदार्थस्य धर्मिण्यविशेषणत्वात्. का. त. पा. अ.

साध्यीयत्वानिवेशे, ह्रदादिवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेर्वृत्तेरसंभव इति तद्वारणाय[1] साध्यपदम्[2]। नचाधिकरणभेदेनाभावभेदमतएवैतल्लक्षणकरणात्पर्वतादेर्न ह्रदादिवृत्त्यभाववत्त्वमिति वाच्यम्।

कृष्णंभट्टीयं।

उपलक्षणस्याप्यवच्छेदकत्वात्। साध्यवह्निन्नीयवृत्तित्वनिष्ठविलक्षणावच्छेदकतानिरूपकसाध्याभावनिष्ठावच्छेदकतानिरूपकधर्मिनिष्ठावच्छेदकताघटितावच्छेदकताकाभावस्य लक्षणत्वं। तत्र साध्यवह्निन्नत्वेनाविशेषितधर्मिनिवेशात्साध्यवह्निन्नीयत्वविशिष्टसंबन्धिनिष्ठविलक्षणावच्छेदकताघटितप्रतियोगितावच्छेदकताकाभावाद्वैलक्षण्यमिति। मतएवेति। अन्यथा व्याप्यवृत्तिसा-

न्यायरत्नं।

दिनियमस्य निर्बीजत्वं शङ्क्यं। प्राचीनमते साध्यसामानाधिकरण्यावच्छेदकहेतुतावच्छेदकस्यैव व्याप्तित्वाद्गुरोस्तादृशसामानाधिकरण्यावच्छेदकत्वाभावात्। नवीनमते च हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वघटितव्याप्तेर्गुरुधर्मघटिततादृशावच्छेदकत्वत्वावच्छिन्नाभावाप्रसिद्धेरेव बीजत्वादिति चेन्न। साध्याभावांशस्याव्याप्तिवारकत्वरूपसार्थकत्वाभाव एव वैयर्थ्यपदेन विवक्षितः। यद्यव्याप्त्याद्यवारकस्यापि लक्षणघटकताऽभ्युपेयते तदाऽभावाधिकरणविशेषणतया प्रमेयत्वादिति निवेशेऽपि वैयर्थ्याभावः प्रसज्येत। यदपि साध्यसामानाधिकरण्यावच्छेदकरूपस्य व्याप्तित्वासंभवरूपं स्वसमानाधिकरणेत्यादिनियमे बीजमुपन्यस्तं तदपि न संभवति। तत्र स्वरूपसंबन्धरूपावच्छेदकत्वनिवेशस्य दूष्यत्वात्। गुरुत्वमेव तादृशावच्छेदकत्वाभावे बीजं। ननु स्वसमानाधिकरणेत्यादिव्यर्थविशेषणघटितत्वमित्यस्यैव वक्तुमुचितत्वाच्च। अन्यथा कम्बुग्रीवादिमत्त्वस्यापि व्याप्यतावच्छेदकत्वापत्तेर्दुर्वारता तदभावप्रयोजकस्वसमानाधिकरणेत्यादिव्यर्थविशेषणघटितत्वस्य तत्राभावात्। स्वसमानाधिकरणव्याप्यतावच्छेदकधर्माघटितस्यैव व्याप्यतावच्छेदकतोक्तिस्तु तस्य सार्थक्यव्यापकताभिप्राया। यच्च नवीनमते बीजमुक्तं तदपि न विचारसहं। तन्मते हेतुसमानाधिकरणाभावप्रतियोगितायामुभयाभावस्यैव निवेशनीयतया अप्रसिद्धिसंपादकस्य गुरुधर्मघटितरूपावच्छिन्नाभावस्य व्याप्तिशरीरेऽनिवेशात्।

केचित्तु व्यभिचारस्याभावो ह्यव्यभिचरितत्वशब्दप्रतिपाद्यः। तथा चाव्यावर्तकसाध्याभावघटितस्य व्यभिचारपदार्थत्वसंभव एव तदभावस्याव्यभिचारपदार्थत्वं संभवति तदेव तु न, व्यभिचारशरीरे साध्याभावांशस्य व्यर्थत्वेन तद्घटितस्य व्यभिचारपदार्थत्वासंभवात्। नच साकल्यलक्षणमिवैतस्यापि परिभाषयाऽव्यभिचरितत्वपदप्रतिपाद्यत्वमास्तां कृतं तत्पुरुषाश्रयणेनेति वाच्यम्। यौगिकत्वसंभवे परिभाषानुसरणस्यान्याय्यत्वादिति वदन्ति।

---

१ वारकतया त. पा. २ सार्थक्यं का. पा.

न्यायरत्नं ।

तदपरे न क्षमन्ते । तद्बीजं तु सिद्धान्तेऽपि क्वचित्साध्याभाववद्वृत्तित्वस्य व्यभिचारपदार्थत्वसंभवात्तादृशस्थले साध्यवद्भिन्नांशवैयर्थ्यं दुर्वारं । क्वचित्साध्याभावत्वांशवैयर्थ्यं, यथा घटत्वाभावादौ साध्ये क्वचित्साध्याभावान्तवैयर्थ्यं, यथा घटत्वभेदादौ साध्ये । एवंच सति व्याप्तेरपि स्थलभेदेन नानात्वापत्तिः । न चेष्टापत्तिः केवलान्वयिनि साध्यसामानाधिकरण्यस्य व्याप्तित्वसंभवेन केवलान्वयिन्यभावादिति ग्रन्थसङ्गतेः । अपिच द्रव्यं विशिष्टसत्वात्सत्तावान्जातेरित्यादावव्याप्तिवारणाय साध्यवद्भिन्नवृत्तिसाध्याभाववन्निरूपिताधेयतासामान्ये यत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावनिवेशस्यावश्यकतया तादृशोभयवत्तादृशाधेयतासामान्यमेव व्यभिचारपदार्थो वाच्यस्तत्र वृत्तिसाध्याभाववत्वांशवैयर्थ्यं दुर्वारमुक्तोभयरूपवत्साध्यवद्भिन्ननिरूपिताधेयत्वसामान्यस्यैव व्यभिचारपदार्थत्वसंभवात् ।

अत्र केचित् । साध्यवद्भिन्नश्चासौ साध्याभावश्च साध्यवद्भिन्नसाध्याभाव इति कर्मधारय एवोचितस्तत्र च साध्यवत्वं स्वप्रतियोगिकत्व-स्वसामानाधिकरण्य उभयसंबन्धेन । केवलसामानाधिकरण्यसंबन्धेन साध्यवत्वनिवेशे घटाभावादीनां साध्यवदन्यत्वविरहेणैव लक्षणाघटकतया साध्यपदं व्यर्थं स्यादिति स्वप्रतियोगिकत्वनिवेशः । अथ "प्रक्षालनाद्धी"ति न्यायग्रासात्तन्न देयमेवेति चेन्न । स्वसामानाधिकरण्यमात्रस्य परंपरात्वेन संबन्धत्वविरहात्स्वसामानाधिकरण्यविशिष्टप्रतियोगित्वस्यैव संबन्धतया तत्सार्थक्यात् । नचासमवायिकारणताद्वैविध्यानुरोधेन सामानाधिकरण्यस्य संबन्धताया आवश्यकत्वमिति वाच्यम् । स्वसमवायिसमवेतत्वात्मकसामानाधिकरण्यस्य तदनुरोधेन संबन्धत्वस्वीकारेऽपि सकलसामानाधिकरण्यानां तथात्वे मानाभावात् । अथवाऽभावभिन्नं भावत्वादित्यादावभावमात्राधिकरणकाभावस्याधिकरणस्वरूपत्वपक्षे सर्वस्यैवाभावस्य सामानाधिकरण्यसंबन्धेन साध्यवत्वात्तदन्याभावाप्रसिद्धेः । स्वप्रतियोगिकत्वनिवेशस्तन्निवेशेऽप्यप्रसिद्धिरिति तु न शङ्क्यम् । तन्निवेशस्य साध्यसामानाधिकरण्यावच्छेदकस्वप्रतियोगिकत्वस्य संसर्गतया निवेशफलकत्वात् । अभावभेदाभावस्याभावस्वरूपत्वेऽप्यभावभेदप्रतियोगिकत्वावच्छेदेन तत्सामानाधिकरण्यानभ्युपगमात्तस्य निरुक्तसंबन्धेन साध्यवद्भिन्नत्वाक्षतेः । एतेन साध्यसामानाधिकरण्यघटकवृत्तित्वं यदि येनकेनचित्संबन्धेन निवेश्यते तदा वह्निमान्धूमादित्यादौ वह्न्यभावादेरपि कालिकसंबन्धेन साध्यवद्वृत्तितया साध्यवदन्याभावाप्रसिद्धिरतः स्वरूपसंबन्धेनैव तन्निवेश्यं । तथाच पर्वतत्वात्मकाभावमादाय साध्यपदसार्थक्यसंभवे स्वप्रतियोगिकत्वं व्यर्थम् । नच स्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेनैव साध्यवद्वृत्तित्वं वक्तव्यमिति वाच्यं कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादौ तादृशेन कालिकेन साध्यवद्वृत्तित्वाप्रसिद्धेरिति निरस्तम् । अखण्डाभावघटकतया

अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपविरुद्धधर्माध्यासेन भेदस्य लक्षणकर्तुः संमतत्वादाकाशाभावादेर्भेदकाभावेन तस्यैक्यात्। अतएवोक्तधर्माणां भेदकत्वम्। एतानि च न

कृष्णंभट्टीयं।

ध्यकाव्यासितादवस्थ्येन साध्यवद्भिन्नवृत्तित्ववैयर्थ्यात्। **अव्याप्यवृत्तीति।** विरुद्धधर्माध्यासेन भेदाभिमानस्तु अव्याप्यवृत्तिप्रतियोगिकाना[भावभिन्नाना]मेव। प्रतियोगिसामानाधिकरण्यादेरेव भेदकत्वात्। तेन द्रव्यत्वादेरपि कथंचिद्विरुद्धधर्माध्याससंभवेऽपि न भेदः। विरुद्धधर्माध्यासेन विरुद्धधर्मद्वयप्रतीत्योः प्रमात्वानुरोधेन अव्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोरविरोधेऽप्रेवक्तव्यं तन्निरासं संवदति---**अतएवेति।** व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादीना-

न्यायरत्नं।

सार्थक्यसंभवाच्च। साध्यसामानाधिकरण्यं च साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं। तेन विशिष्टसत्तावाञ्जात्यधिकरणत्वादित्यादौ सत्ताभावस्यैव साध्यवदन्यत्वेऽपि न क्षतिः। संयोगी द्रव्यत्वादित्यादौ द्रव्यवृत्तित्वविशिष्टाभावमादायैव लक्षणं सङ्गमनीयम्।

यत्तु स्वप्रतियोगिकत्व-स्वसामानाधिकरण्य-उभयसंबन्धेन साध्यवदन्याभावनिवेशे महानसीयवह्न्यभावस्य यादृशसाध्यप्रतियोगिकत्वं न तत्सामानाधिकरण्यं यादृशसाध्यसामानाधिकरण्यं न तत्प्रतियोगिकत्वमित्युक्तोभयसंबन्धेन साध्यवद्भिन्नत्वेन लक्षणघटकतापत्तिः। नच स्वाश्रयप्रतियोगिकत्व-स्वावच्छिन्नसामानाधिकरण्य-उभयसंबन्धेन साध्यतावच्छेदकवदन्यत्वस्यैव निवेशनीयतया न तस्य लक्षणघटकतेति वाच्यम्। तथा सति साध्यवदन्याभावस्य लक्षणाघटकतया मूलास्वारस्यं स्यादिति। तन्न। साध्यसामानाधिकरण्यावच्छेदकस्वप्रतियोगिकत्वस्य संसर्गतया निवेशे उक्तदोषाभावादित्याहुः। तदसत्। संयोगेन द्रव्यस्याव्याप्यवृत्तितापक्षे निरुक्तसंबन्धेन साध्यवदन्याभावाप्रसिद्ध्यापत्तेः।

विरुद्धधर्माध्यासेनेति । अध्यासो वर्तमानता। अयं भावः। कपिसंयोगाभावत्वं स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकव्यासज्यवृत्तिधर्मसमानाधिकरणं व्याप्यवृत्तित्वाव्याप्यवृत्तित्वसमानाधिकरणत्वाद्यन्नैवं तन्नैवमित्येवं व्यतिरेक्यनुमानेन भेदसिद्धिरिति। यद्वा यो व्याप्यवृत्तिताऽव्याप्यवृत्तितावच्छेदकयद्धर्मवान् स स्ववृत्तिभेदप्रतियोगितावच्छेदकधर्मसमानाधिकरणतद्धर्मवान् यथा रूपादिरित्येवमनुमानं द्रष्टव्यम्। यद्यपि व्याप्यवृत्तिताऽव्याप्यवृत्तितावच्छेदकसत्तात्ववत्वं सत्तायामस्ति तत्र साध्यस्याभावाद्व्यभिचारस्तथापि यद्धर्मे भावावृत्तित्वस्य विवक्षितत्वान्न दोषः। **भेदकाभावेनेति।** उक्तहेतोराकाशा-

---

१ ग्रे वस्तुगत्या तद्विरोधं निरस्यति—बा. पाठः.

भेदकानीत्यनेन दीधितिकृन्निराकरिष्यति[1]। अथवा साध्याभावपदं अनुयोगित(विशेष)संबन्धेन साध्यीयपरम् । अभावीयविलक्षणानुयोगितालाभायैवाभावपदम्। नतु अभावत्वमपि निवेश्यं[2] [3] प्रयोजनाभावात् ।

कृष्णंभट्टीयं ।

मेव भेदकत्वस्य लक्षणकर्तृसंमतत्वादेवेत्यर्थः । अग्रिमग्रन्थवशाद्यद्भेदकत्वेन प्रसक्तं तस्य गगनाभावादावसत्त्वान्न भेद इति भावः । ननु हृदत्वसामानाधिकरण्यतद्वैयधिकरण्यादीनामप्यभावभेदकत्वं लक्षणकर्तृसंमतं । अतएवाग्रे दीधितौ अभाव एव न सिद्ध्येदिति वक्ष्यते । अन्यथाऽव्याप्यवृत्त्यभाव एवेति ब्रूयादिति । भावभिन्नमात्रस्यैवाधिकरणभेदाद्भेदमनुसृत्य साध्यभेदमनुसृत्य साध्यपदवैयर्थ्यमुद्धरति—**अथवेति**। **साध्याभावपदं** साध्याभावेत्यत्र साध्यपदम्। **अनुयोगितेति**। संबन्धसाधारणानुयोगिताप्रवेशे साध्यवह्निन्नवृत्तिप्रतियोगिकसमवायवृत्तिधूमस्य वृत्तेरव्याप्तिरतो विशेषपदम् । भावभिन्नत्वरूपानुयोगितानिवेशे घटत्वाभावसाध्यकाव्याप्तेः । **विलक्षणेति** । भावाभावसाधारणाभावत्वरूपसंबन्धव्यावृत्तेरित्यर्थः । तादृशविलक्षणसंबन्धेनान्यत्र साध्यीयत्वाभावादेव नाप्रसङ्गः । एतेन

न्यायरत्नं ।

भावत्ववृत्तित्वाभावेनेत्यर्थः । तथाच हेतोः पक्षधर्मताविरहान्न भेदसिद्धिरिति भावः । ननूक्तहेतोः पक्षवृत्तित्वाभावेऽपि गगनाभावत्वं व्यक्तिद्वयवृत्तिघटवृत्तिवृत्तित्वे सति घटान्यवृत्तिवृत्तिभावावृत्तिधर्मत्वात्पटत्वाभावघटत्वाभावान्यतरत्ववदित्यनुमानेनाकाशाभावस्याप्यधिकरणभेदेन भेदसिद्धिरित्याशङ्क्याह—**अत एवेति**। अभावे साध्यीयत्वं न येनकेनचित्संबन्धेन। अतिप्रसङ्गात् किंत्वनुयोगिताख्यविलक्षणसंबन्धेन । तथाचाभावत्वनिवेशो व्यर्थ इत्यगत्याऽभावपदमेव तादृशानुयोगिताख्यसंबन्धलाभायेति वक्तव्यं । तथाच विलक्षणानुयोगितासंबन्धेन साध्यीयत्वनिवेशव्यावृत्तिरभावमात्रस्याधिकरणभेदेन भेदपक्षेऽपि सुघटैवेत्याशयेनाह—**अथवेति** ।**साध्यीयपदम्**। लक्षणया साध्यविशिष्टबोधकम् । यद्यप्यनुयोगिताविशेषरूपाभावत्वस्य भावाभावसाधारणत्वमवश्यं वक्तव्यम्।अन्यथा घटाभावाभावो घट इति घटेऽभावत्वव्यवहारो न स्यात् । इत्थं चाभावपदस्यानुयोगिताविशेषविशिष्टे शक्तत्वाद्यथाश्रुतार्थकत्वेऽपि साध्यपदार्थैक्यसंभवाल्लाक्षणिकत्वमनुचितम् । **तथापि साध्याभावेत्यत्र** तत्पुरुषत्वात्पूर्वपदे लक्षणाया आवश्यकत्वात्साध्यपदस्य विलक्षणानुयोगितासंबन्धेन साध्यविशिष्टे लक्षणाया आवश्यकत्वे, तेनैव निर्वाहेऽभावपदार्थविवक्षाया अनुपयोग इति भावः । **अभावीयविलक्षणानुयोगितेति** । केवलानुयोगिता-

---

१ निरस्यति त. पा. २ निविशते ब. पा. ३ निवेश्यते का. पा. ४ अतएव तथासत्यभाव एव न सिद्ध्येदिति तन्निरस्यति—बा. पाठः.

इत्थंच[1] तादृशविलक्षणसंबन्धेन यः साध्यीयः तद्वद्वृत्तित्वमित्ये-वार्थः। तत्रच साध्यस्य[2] यत्पदार्थाविशेषणत्वे ह्रदादिवृत्तिप्रमेयत्वा-

कृष्णंभट्टीयं।

भावाभावसाधारणाभावत्वप्रवेशे अव्यावर्तकता। सप्तमपदार्थमात्रवृत्तित-त्प्रवेशेऽभावसाध्यकाव्याप्तेरिति निरस्तम्। प्रमेयत्वादिति। नचात्र साध्यवद्भिन्नवृत्तित्वं न संबन्धसामान्येन यत्किंचित्संबन्धेन वा। तथासति कपिसंयोगी एतत्वादित्यादौ कपिसंयोगाभावस्य कालिकादिसंबन्धेन साध्य-वद्भिन्नगुणादिवृत्तितयाऽव्याप्तेः। नापि विशेषणताविशेषसंबन्धेनाभावसाध्य-काव्याप्तेः। अपि तु साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन तथाच प्रमे-यत्वादिकमादाय कथमव्याप्तिः। एतत्कल्पे अभावमात्रभेदाच्च गगनाभावा-दिकमादाय न सेति वाच्यम्। जलत्वप्रकारकप्रमाविशेष्यत्वाभाववान्धू-मादित्यादावव्याप्तेः।

केचित्तु उक्तलाघवादिना साध्यवद्भिन्नश्चासौ साध्याभाववांश्चेति कर्म-धारय एवोचितः। साध्यवत्वं च स्वप्रतियोगिकत्वस्वसामानाधिकरण्योभय-संबन्धेन। एवंच प्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वं साध्यता-वच्छेदकसंबन्धावच्छिन्नत्वं च न देयमिति लाघवम्। एवंच साध्यवद्भिन्न-साध्याभावाप्रसिद्धैव केवलान्वयिन्यभावादिति मूलसंगतिः। ननु साध्य-तावच्छेदकीभूतधर्मसंबन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्येति। घटाद्य-भाववारणाय साध्यो[पदो]पादानम्। नचैवं साध्यपदसार्थक्याय स्वप्रति-योगिकत्वनिवेशे "प्रक्षालनाद्धी"ति न्यायेन ग्रासः। सामानाधिकरण्यस्य विशिष्टप्रतीत्यनियामकतया तद्विशिष्टानुयोगिताविशेषस्यैव संबन्धतया

न्यायरत्नं।

संबन्धेन साध्यीयपरत्वे वह्निमान्धूमादित्यादौ तादृशसमवायवद्वृत्तित्वस्य धूमे सत्वादव्याप्तिः स्यादतो विलक्षणेति। साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यता-वच्छेदकावच्छिन्नप्रतियोगितानिरूपितेति तदर्थः। अथाभावपदात्कथं तादृशवि-लक्षणानुयोगितालाभ इति चेत्, अभावपदसमभिव्याहृतपदान्तरस्य विलक्षणानु-योगितया स्वार्थविशिष्टबोधकत्वस्य व्युत्पत्तिसिद्धत्वात्। अन्यथा संयोगो घटाभाव इति व्यवहारापत्तेः। नच भाववाचकपदसमभिव्याहृताभावपदस्य भावभिन्ना-र्थकत्वान्नायमतिप्रसङ्ग इति वाच्यम्। तथापि विषयिताघटत्वाभावाभाव इति व्यवहारापत्तेर्दुर्वारत्वात्॥

ह्रदादिवृत्तिप्रमेयत्वादिमतीति॥ **अथा**स्मिन्लक्षणे साध्यवत्ताग्रह-विरोधितानियामकसम्बन्धेनैव साध्यवद्भिन्नवृत्तिसाध्याभाववत्ताया अग्रे निवे-

---

१ साध्यवद्भिन्नवृत्तिर्यः इति का. अधिकं. २ साध्यपदस्य त. पा. ३ वृत्त्यनिया-मकतया वा. पाठः.

कृष्णंभट्टीयं ।

स्वप्रतियोगिकत्वनि[प्र]वेशात् । तावन्मात्रोक्तौ च साध्यवद्भिन्नसाध्याभावाप्रसिद्धिरतः सामानाधिकरण्यमुपात्तम् ।

वस्तुतस्तु—स्वसमानाधिकरणत्वमात्रसंबन्धः । नतु स्वप्रतियोगिकत्वमपि । वैयर्थ्यात् । साध्यपदोपादानं च तत्संबन्धलाभार्थमेवेति स्ववृत्तिसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं तदर्थः । तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः । साध्यादिवारणाय अभावपदम् । एवंचात्राभावभेदमतादरणं निरर्थकमेव । नचाव्याप्यवृत्तिसाध्यके उक्तसंबन्धेन साध्यवतो द्रव्यवृत्तिसंयोगाद्यभावादन्य एव साध्याभावः । एवं कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादौ तादृशानित्यवृत्तेराकाशाभावादन्य एव नित्यवृत्तिः साध्याभाव इति लक्षणसमन्वयो वाच्यः । एवंच कालिकसंबन्धावच्छिन्नतद्वत्तायाः साध्याभावत्वोपगमेऽप्यनावश्यक इति वाच्यम् । तदनादरेऽपि प्रथमे गुणासमवेताभावं द्वितीये जन्यावृत्त्यभावं चादाय लक्षणसमन्वयसंभवात् । यत्तु सर्वत्र गगनघटितोभयाभावं व्यधिकरणसंबन्धेन साध्याभावं च विपक्षमात्रवृत्तिमादाय नाव्याहृत्यतिव्याप्ती । अधिकरणभेदेनाभावभेदादभावभेद इति कथनं तत्किमर्थमिति पृच्छामः ।

न्यायरत्नं ।

शनीयतया वह्निसाध्यके तादृशेन दैशिकविशेषणतासंबन्धेन प्रमेयत्ववतोऽप्रसिद्धत्वेन न तदादायासंभव इति चेन्न । दैशिकविशेषणतायाः स्वरूपत्वेनैव संसर्गत्वात्स्वरूपसंबन्धेन तादृशेन प्रमेयत्ववत्वमादायासंभवसङ्गतेः । न च तथापि नासंभवः । संभवति विषयितासंबन्धावच्छिन्नप्रतियोगिताके घटाभावादौ साध्ये पटत्वादौ तादृशेन विषयितासंबन्धेन साध्यवद्भिन्नवृत्तिनः तस्यापि हेत्वधिकरणेऽसत्त्वाल्लक्षणसमन्वयसंभवादिति वाच्यम् । विषयितासंबन्धावच्छिन्नप्रतियोगिताकाभावस्य विषयिताया वृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वेनाप्रसिद्ध्या तत्साध्यकानुमानासंभवादित्यभिप्रयात् । न च तथापि कालि-

---

(पड्विंशतिपत्रस्थविषयोपरितनोयं विषयः) वृत्तौ साध्याभाववतोऽन्वयानुपपत्तेः । अव्ययीभावसमासस्य अव्ययतया तेन समं समासान्तरासंभवाच्च । ननुपाध्यादिरूपाव्यये विशेषाणामेव समस्यमानत्वेन परिगणितत्वात् । वस्तुतस्तु साध्याभाववतो न वृत्तिर्यत्रेति त्रिपदव्यधिकरणबहुव्रीह्यनन्तरं त्वप्रत्ययः । साध्याभाववत इत्यत्र निरूपितत्वं षष्ठ्यर्थः अन्वयश्चास्य वृत्तौ । तथाच साध्याभावाधिकरणनिरूपितवृत्त्यभावत्वं अव्यभिचरितत्वफलितम् । नच व्यधिकरणबहुव्रीहिः सर्वत्र न साधुरिति वाच्यम् । अयंच हेतुः यत्र व्यधिकरणं विनापि संगमयितुं शक्यते तत्रैव । साध्याभाववदवृत्तिरित्यादौ बहुव्रीहिं विना गत्यन्तराभावेनात्रापि व्यधिकरणबहुव्रीहेः साधुत्वात् ।

१ अनुरोधात्तद्भेदो दुर्वारः इति मै. पाठः.

कृष्णंभट्टीयं ।

अभावभेदमते सर्वत्रैव साध्यसामान्याभावादिकमादाय लक्षणसमन्वयसंभवाच्च । कालिकसंबन्धवारणाय साध्याभावाधिकरणत्वं साध्यसामानाधिकरण्यघटकवृत्तित्वं चाभावीयविशेषणतासंबन्धेन निवेश्यम् । एतदर्थमेव चाभावपदम् । तद्घटकसाध्यवत्त्वं साध्यतावच्छेदकसंबन्धेन । अभावसाध्यके च विपक्षावृत्त्यभावः साध्यवत्त्वप्रकारकप्रमाद्यभाव एव वा लक्षणघटकः । साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन तन्निवेशे तु तादृशाकाशाभावाभावसाध्यकेऽव्याप्तिः । साध्यवति तेन संबन्धेन वृत्तेरप्रसिद्धेः । एवंच घटत्वघटाकाशसंयोगान्यतराभावसाध्यके घटाकाशसंयोगात्मकसाध्याभावमादायाव्याप्तिर्न शङ्क्या । घटत्वादिरूपसाध्याभावस्य निरुक्तसंबन्धेन साध्यवद्भिन्नस्य विशेषणतयाऽधिकरणाप्रसिद्धावपि घटवृत्त्यभावमादायैव लक्षणसंगतेरित्याहुः ।

अन्येतु स्वप्रतियोगिकत्वस्वसामानाधिकरण्योभयसंबन्धेन साध्यवद्भिन्नत्वं न युक्तम् । सामानाधिकरण्ये यदि वृत्तित्वं[1] येन केनचित्संबन्धेन तदा वह्न्यभावस्य कालिकसंबन्धेन साध्यवृत्तित्वादव्याप्तेः । यदि स्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेन तदा कालिकसंबन्धावच्छिन्नाकाशाभावाभावसाध्यके तथाविधकालिकसंबन्धेन साध्यवद्वृत्तित्वाप्रसिद्धेरव्याप्तिः । यदि विशेषणतासंबन्धेन[2] साध्यवति दैशिकविशेषणतया वृत्तित्वेऽपि साध्यप्रतियोगिकं नित्यवृत्तित्वावच्छिन्नाभावमादाय लक्षणसङ्गतिः, तदा द्रव्यत्वपर्वतत्वादिकमादायाव्याप्तिवारणाय साध्यपदावश्यकतया स्वप्रतियोगिकत्ववैयर्थ्यात्[3] । दर्शिता[4]काशाभावाभावसाध्यके आकाशाभावस्य साध्यतावच्छेदकसंबन्धेन साध्यवति दैशिकविशेषणतया वृत्तित्वेऽपि साध्यप्रतियोगिकमात्मवृत्तित्वावच्छिन्नाभावमादाय लक्षणसङ्गतेश्च । नच स्वप्रतियोगिकत्वं त्याज्यमेवेति वाच्यम् । तथापि पर्वतावृत्त्यभावं लाघवेन पर्वतत्वात्मकं साध्यप्रतियोगिकमादाय प्रसिद्धानुमानाव्याप्तेः । एतादृशरीत्या गौरवाच्च । वस्तुतस्तु—महानसीयवह्न्यभावस्य कथं व्यावृत्तिः । यादृशसाध्यप्रतियोगिकत्वं न तादृशसाध्यवद्वृत्तित्वं यादृशसाध्यवद्वृत्तित्वं न तादृशसाध्यप्रतियोगिकत्वमित्युभयसंबन्धेन साध्यवदन्यत्वात् । यदिच साध्यतावच्छेदकविशिष्टान्यत्वं तत्र निवेश्यम् । वैशिष्ट्यं च स्वाश्रयप्रतियोगिकत्व-स्वाश्रयवद्वृत्तित्वोभयसंबन्धेन तदा साध्यतावच्छेदकवद्भेदघटितस्य साध्यवद्भिन्नसाध्याभाववदवृत्तित्वरूपमूलोक्तलक्षणपरिष्कारत्वासंभवाद्दीधितिकृता तदनादृतमित्याहुः ।

---

१ वृत्तितया मै. पाठः. २ विशेष मै. पु. अधिकम्. ३ पातात् इति मै. पाठः. ४ दर्शितेति लक्षणसंगतेरित्यन्तं वाक्यं मै. पुस्तके न दृश्यते.

दिमति पर्वतादौ[1] हेतोर्वृत्तेरसंभवः स्यादिति तन्निवेशः[2]। अत्रच साध्याभावः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः। अन्यथा वह्निमान्धूमादित्यादौ ह्रदादिनिष्ठमहानसीयवह्नित्वाद्यवच्छिन्न-

कृष्णंभट्टीयं।

परेतु, उक्तयुक्तिभ्यां साध्यवद्भिन्नश्चासौ साध्याभाववांश्चेत्येव कर्मधारयः। साध्यवद्भिन्नत्वं च स्वप्रतियोगिमद्भिन्नत्वम्। नच घटत्वकपिसंयोगान्यतराभाववानात्मत्वादित्यादौ कपिसंयोगरूपसाध्याभावस्याधिकरणे आत्मनि गुणसामान्याभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वसत्वादव्याप्तिरिति वाच्यम्। यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं साध्यतावच्छेदकावच्छिन्नतादृशप्रतियोगिताकाभावाधिकरणमिति विवक्षितत्वात्। तार्णातार्णोभयाभावादिवारणाय साध्यतावच्छेदकावच्छिन्नत्वनिवेशः। साध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकभेदवान्दलद्वयार्थः। तथाच साध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकभेदघटितपञ्चमावतारेऽतिलाघवमित्याहुः। **महानसीयेति**। महान-

न्यायरत्नं।

कसंबन्धावच्छिन्नप्रतियोगिताकघटाभावे साध्ये आत्मत्वादौ लक्षणसमन्वयः तादृशेन कालिकेन साध्यवद्भिन्नवृत्तेः कस्यापि हेत्वधिकरणेऽभावादिति कथमसंभव इति वाच्यम्। विषयित्वकालिकादिसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य तत्संबन्धावच्छिन्नाधिकरणत्वाभावरूपत्वात्स्वरूपसंबन्धस्यैव साध्यवत्ताग्रहविरोधिज्ञानविषयतया प्रमेयत्वादिकमादायासंभवसङ्गमात्। वस्तुतस्तु अभाववत्ताग्रहेऽभावाभाववत्ताज्ञानस्य स्वरूपसंबन्धेनैव विरोधित्वमिति कूटघटिते ग्रन्थकृदुक्तमताभिप्रायेणेदमिति तत्त्वम्। **अन्यथेति**। अथ प्रतियोगितयाऽनुयोगितया वा साध्यविशिष्टस्यैवाभावस्य लक्षणे निवेशनीयतया केवलप्रतियोगितायास्तन्निरूपितानुयोगिताया वा संसर्गत्वे वह्निमति महानसीयवह्न्यभावविषयिण्या वह्नि-

---

१ पर्वतादाविति का. पु. नास्ति.

२ साध्यवद्भिन्नश्चासौ साध्याभाववांश्चेति कर्मधारये साध्याभावपदवैयर्थ्यापत्तेः। अतः सप्तमीसमासः कृतः। नच तत्रापि साध्यवद्भिन्नेऽभाव इत्यास्तां किं साध्यपदेन अधिकरणभेदेन अभावभेदवादिनां मत एतल्लक्षणकरणात्। गगनाभावादिकमादायाव्याप्तिविरहादिति वाच्यम्। स्वप्रतियोगितावच्छेदकसंन्बधेन साध्यवद्भिन्ने वर्तते यः समवायसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावः तद्वति हेतोर्वृत्तितयाऽव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितालाभाय साध्यपदमिति जगदीशः। अत्रेयनाशङ्का। एवं सति स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारयः कथं परित्यक्त इति विभावनीयम्।

प्रतियोगिताकवह्न्यभावस्य धूमवति सत्वेन, पृथिवीत्वाभावद्रव्यत्वाभावान्यतरवान् जलत्वादित्यादौ साध्यवद्भिन्नपृथिव्यादिनिष्ठद्रव्यत्वाद्यात्मकसाध्यप्रतियोगिकाभावस्य जलादौ सत्वेन चाव्याप्त्यापत्तेः। साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेनापि, प्रतियोगिता विशेषणीया। अन्यथा ह्रदादिवृत्तिसमवायादिसंबन्धावच्छिन्नप्रतियोगि-

कृष्णंभट्टीयं।

सीयविशिष्टं यद्वह्नित्वं तदवच्छिन्नाभावस्तु नास्त्येवेत्यवच्छेदकतापर्याप्त्युपादानेऽपि कथंतानवकाशः। द्वितीयलक्षणानुरोधेन ह्रदादिनिष्ठेति। एवमग्रेऽपि। साध्यतावच्छेदकातिरिक्तवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगितानिवेशे, अभावमात्रभेदमते चाह—**पृथिवीत्वेति**। अन्यतरत्वावच्छिन्नाभावस्य पृथिवीत्वरूपत्वादतिरिक्तत्वाद्वा नाव्याप्तिः। अथ

न्यायरत्नं।

नास्तीति प्रतीत्यापत्तेर्वह्नित्वावच्छिन्नप्रतियोगितायास्तन्निरूपितानुयोगिताया वा संसर्गतया भानमावश्यकमिति प्रयोजनान्तरान्वेषणं कुत इति चेत्। अत्र केचित्। साध्यत्वस्य प्रतियोगितावच्छेदकत्वसंभवात्साध्यतावच्छेदकनिवेशनमनुचितमित्यभिप्रेत्य तन्निवेशस्य प्रयोजनान्तरान्वेषणमित्याहुः। तदसत् साध्यत्वस्य प्रकृतानुमितिविधेयत्वरूपस्यानुपस्थितिदशायामप्यनुमितेरानुभविकतया साध्यत्वनिवेशासंभवान्महानसीयवह्न्यभावमादाय लक्षणासत्वप्रसङ्गाच्च। नच साध्यतावच्छेदकत्वनिवेशेऽपि पूर्वदोषतादवस्थ्यं शङ्क्यम्। तत्परिचितवह्नित्वादीनां विशिष्यैव निवेशात्॥ अपिच विशिष्टसत्तावान्जात्यधिकरणत्वादित्यादौ साध्यत्वावच्छिन्नाभावस्य जात्यादावेव वर्तमानतयाऽतिव्याप्तेः। नच प्रमात्मकानुमितिविधेयत्वमेव साध्यत्वमिति वाच्यम्। एवं सति साध्यतावच्छेदकावच्छिन्नत्वनिवेशापेक्षया गौरवापत्तेः। वस्तुतस्तु प्रतियोगितायाः प्रकारतया निवेशेऽपि साध्यतावच्छेदकावच्छिन्नत्वं निवेश्यमित्यभिप्रेत्याव्याप्तिवारकतयापि तस्य सार्थक्यप्रकाशनमभिप्रेत्य वा प्रयोजनान्तराभिधानमिति ध्येयम्॥

अधिकरणभेदेनाभावभेदेत्याह—**पृथिवीत्वाभावद्रव्यत्वाभावान्यतरेति**। एवमुत्तरत्रापि स्थलान्तरानुसरणे बीजं बोध्यम्। **अव्याप्त्यापत्तेरिति**। अथात्राभावाभेदपक्षेऽसंभव एव वक्तव्यः। कुत्रापि लक्षणगमनाभावात्। नचैतद्रूपवानेतत्वादित्यादौ तद्गमनं शङ्क्यम्। तत्रापि विशिष्टाभावोभयाभावमादायाव्याप्तेः सत्वात्। नच विषयितया घटसाध्यके नित्यज्ञानत्वहेतौ लक्षणसमन्वयः संभवतीति वाच्यम्। तत्रापि नित्यज्ञानान्यत्वविशिष्टघटाभावमादायाव्याप्तेः। नच नित्यज्ञानान्यत्वविशिष्टघटोऽपि नित्यज्ञाने वर्तते घटांशे

१ पृथिवीत्वद्रव्यत्वोभयभाववान् इति बा. पा. २ स्य का. पा.

ताकवह्न्याद्यभावस्य धूमादिमत्यपि वृत्तेरसंभवस्य, कालिकसंबन्धेन द्रव्यत्वाभावादौ साध्ये कालत्वादिहेतौ साध्यवद्भिन्नपरमाणुगगनादिवृत्तिदैशिकविशेषणतासंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावात्मकद्रव्यत्वादेर्हेत्वधिकरणवृत्तित्वेन, अव्याप्तेर्वा प्रसङ्गात् ।

अत्रच साध्याभाववत्तायां संबन्धविशेषावच्छिन्नत्वानिवेशे, वह्नि-

कृष्णंभट्टीयं ।

वा भेदमतेऽप्याह—**कालिकेति** । ननु समवायावच्छिन्नप्रतियोगिताके

न्यायरत्नं ।

नित्यज्ञानान्यत्ववैशिष्ट्यप्रकारकत्वस्यैव तत्र प्रयोजकत्वादिति वाच्यम् । तथापि घटपदजन्यबोधविषयताविशिष्टघटाभावस्य हेत्वधिकरणेऽबाधात्, नहि तादृशोऽपि घटस्तत्र वर्तत इति शक्यं वदितुं, तथा सति घटस्य घटपदवाच्यताप्रसङ्गात् । नचेच्छायास्तादृशघटवत्त्व एवेयमापत्तिर्न ज्ञानस्येति वाच्यम् । ज्ञानेच्छयोः समानविषयकत्वनियमाज्ज्ञानस्य तद्वत्वे इच्छायास्तद्वत्वनियमात् । ज्ञानत्वेन कृतित्वेन वा ज्ञानकृत्योः शक्तित्वस्येच्छावद्विनिगमनाविरहेण वक्तव्यत्वाच्चेति चेन्न । सङ्केतस्य लोके पदार्थोपस्थितिप्रयोजकतया दृष्टत्वेन तत्सजातीयेच्छैव शक्तिपदार्थो नतु ज्ञानमिति ज्ञानस्य तादृशघटवत्त्वेऽपि बाधकाभावादित्यभिप्रायात् । वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताविशेषणत्वे एकव्यक्तिसाध्यके लक्षणसमन्वयान्नासंभव इति केचित् । अथ साध्यतावच्छेदकावच्छिन्नाभावनिवेशेऽपि महानसीयवह्न्यभाववारणमशक्यं । तस्य साध्यतावच्छेदकवह्नित्वावच्छिन्नप्रतियोगिताकत्वात् । नच साध्यतावच्छेदकपर्याप्तावच्छेदकताकत्वनिवेशात्तादृशाभाववारणसंभव इति वाच्यम् । तथापि महानसीयत्वविशिष्टवह्नित्ववतोऽभावमादाय दोषवारणात् । नच तादृशाभावो गुरुधर्मावच्छिन्नप्रतियोगिताकतयाऽप्रसिद्ध इति वाच्यम् । एतल्लक्षणे गुरुधर्मस्य प्रतियोगितावच्छेदकत्वावश्यकत्वात् । अन्यथा साध्यवद्भिन्नवृत्तिसाध्याभाववद्वृत्तित्वस्य साध्यवद्भिन्नवृत्तित्वत्वापेक्षया गुरुतया तदवच्छिन्नाभावरूपलक्षणवाक्यार्थाप्रसिद्ध्यापत्तेरिति **चेत्** । **अत्र वदन्ति** । उपलक्षितधर्मावच्छिन्नाभावविशिष्टधर्मावच्छिन्नाभावयोर्वैलक्षण्याय विशिष्टधर्मावच्छिन्नाभावीयप्रतियोगितावच्छेदकता, विशिष्टप्रतियोगिकसंबन्धावच्छिन्ना विशेषणविशेष्योभयपर्याप्ता वा उपलक्षितधर्मावच्छिन्नप्रतियोगितावच्छेदकता केवलसंबन्धावच्छिन्ना विशेष्यमात्रपर्याप्ता वेत्यवश्यमुपगन्तव्यं । तथा च प्रकृते महानसीयत्वोपलक्षितधर्मावच्छिन्नाभावस्य हेतुमत्यसत्वेन तद्विशिष्टावच्छिन्नाभावस्य हेतुमति सत्वेऽपि तस्य विवक्षणीयसाध्यतावच्छेदकताघटकसंबन्धावच्छिन्नसाध्यतावच्छेदकपर्याप्तावच्छेदकताकत्वविरहेणानुपपत्त्यभावादिति दिक् ॥

कालिकसंबन्धेन द्रव्यत्वाभावेति । अत्र द्रव्यत्वपदं तदधिकरणत्वपरं

कृष्णंभट्टीयं।

(कालिकसंबन्धावच्छिन्नप्रतियोगिताके वा) द्रव्यत्वाभावे साध्ये कथमव्याप्तिः। साध्यतावच्छेदकसंबन्धेन साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन साध्याभाववत्वस्याग्रे वाच्यतया साध्यतावच्छेदकीभूतकालिकसंबन्धेन साध्यवत्ताबुद्धिंप्रति तत्संबन्धावच्छिन्नसाध्याभावस्य स्वरूपसंबन्धेन तद्वत्ताज्ञानस्यैव विरोधितया द्रव्यत्वस्य तेन संबन्धेन साध्यवत्ताया असंभावितया साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभावस्यैव लक्षणघटकत्वात्। द्वितीयलक्षणे च सुतरां तत्र साध्यतावच्छेदकसंबन्धेन साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन साध्यवद्भिन्नवृत्तित्वस्य निवेशनीयत्वात्। नच प्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेन तदुभयं निवेश्याव्याप्तिः संगमनीया। तथासति कपिसंयोगाभावस्य यः कालिकसंबन्धावच्छिन्नाभावस्तस्यापि प्रतियोगितया प्रतियोगिमत्ताग्रहविरोधितानियामककालिकसंबन्धमादाय व्याप्यवृत्तिसाध्यकाव्याप्तेः। प्रतियोगितावच्छेदकसंबन्धेन साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन तदुभयनिवेशपक्षे तत्संगतिरित्यपि न। तथासति स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यवत्वघटितसाध्यवद्भिन्नवृत्तित्वस्य धूमवान्धूमकालीनवह्नेरित्यादौ संबन्धसामान्येन साध्यवद्भिन्ने हेतुशून्ये धूमकालीने साध्याभावसत्वादतिव्याप्तिवारणायावश्यनिवेश्यतया साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारयोपेक्षया निर्बीजत्वापातात् प्रतियोगितावच्छेदकीभूतसमवायेन वह्निमद्भिन्नवृत्तिः समवायसंबन्धावच्छिन्नवह्न्यभावस्य वारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभावसार्थक्यसंभवादिति चेन्न। द्रव्यत्वाभावशब्देन द्रव्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्य विवक्षितत्वात्। एवंच साध्यवद्भिन्नवृत्तित्वघटकसाध्यत्वमपि साध्यतावच्छेदकसंबन्धेनैव निवेश्यमिति न कर्मधारयोपेक्षा निर्बीजेति। ननु कपिसंयोगी एतत्वादित्यादौ द्रव्यवृत्तिकपिसंयोगाभावस्य साध्यवद्भिन्ने कालिकसंबन्धेन वृत्तित्वादव्याप्तिः। दैशिकविशेषणतया तद्वृत्तित्वनिवेशे च घटत्वाभावादौ कालिकसंबन्धावच्छिन्नप्रतियोगिताकात्मत्वाभावादौ च साध्ये आत्मत्वादावव्याप्तिः। प्रतियोगिमत्ताग्रहविरोधितानियामकसंबन्धेन तन्निवेशे च कपिसंयोगादिसाध्यके कालिकसंबन्धेन कालिकसंबन्धावच्छिन्नप्रतियोगिताकवृक्षवृत्तिकपिसंयोगाभावाभावरूपप्रतियोगिमत्ताग्रहविरोधितानियामकसत्वादव्याप्तिरिति चेन्न। साध्यतावच्छेदकसंबन्धेन साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन तन्निवेशात्। ननु साध्यवद्भिन्नवृत्तित्वनिवेशकल्पे साध्याभावपदसार्थक्यार्थं अभावत्वविलक्षणानुयोगितालाभार्थमित्युक्तं तदपेक्ष्य साध्यवद्भिन्नवृत्तित्वस्य प्रतियोग्यनधिकरणवृत्तित्वरूपव्याख्यानमेवोचितं। वस्तुतस्तु प्रतियोग्यनधिकरणं यत्साध्याभावाधिकरणं तदेवोचितनिवेशनमिति चेन्नैवम्। विरुद्धग्रन्थे कण्ठत एव भट्टाचार्यैः समाधास्यमानत्वात्। गगनाभावस्याधिकरणभेदेन भिन्नत्वपक्षे तदैक्यपक्षे आत्मादीनां साध्या-

मान् धूमादित्यादौ ह्रदादिवृत्तिवह्न्याद्यभावस्य कालिकसंबन्धेन पर्वतादौ वृत्तेरव्याप्तिः। दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादौ दैशिकविशेषणतया साध्ये आत्मत्वादिहेतौ साध्यवद्भिन्नकालादिवृत्तेराकाशाभावात्मकसाध्याभावस्य आत्मादिषु वृत्तेः। घटत्वाभावादिसाध्यके[1]सद्धेतौ घटत्वादेर्दैशिकविशेषणतासंबन्धेनाधिकरणतायां[2] मानाभावेन चाव्याप्तिः। अतः साध्यतावच्छेदकसंबन्धेन साध्यवत्ताज्ञानं प्रति यादृशसंबन्धेन स्वप्रकारकनिश्चयः प्रतिबन्धकः, तेन संबन्धेन अभावत्वं निवेश्यं। संयोगेन वह्न्यादौ साध्ये तादृशसंबन्धो दैशिकविशेषणता। कालिक[3]संबन्धेन आकाशाभावाभावे दैशिकविशेषणतया साध्ये कालिकसंबन्ध एव तथा, समवायादिना घटत्वादेरभावे

कृष्णंभट्टीयं।

भावत्वविशिष्टानधिकरणत्वे चाह—घटत्वाभावेति। साध्यतेत्यादि। साध्यताघटकधर्मसंबन्धावच्छिन्नप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतस्वनिष्ठप्रकारतावच्छेदकसंबन्धेनेत्यर्थः। कालिकसंबन्धावच्छिन्नघटत्वाभावसमवायसंबन्धावच्छिन्नघटत्वाभावान्यतरवान्पटत्वादित्यादौ विशेषणतया कालिकसंबन्धावच्छिन्नघटत्वाभावग्रहंप्रति कालिकसंबन्धेन घटत्वग्रहस्य प्रतिबन्धकतया तेन संबन्धेन घटत्वरूपसाध्याभाववति पटत्वादिरूपहेतुसत्वादव्याप्तिः। नच घटत्वस्य न स्वपदेन धर्तुं शक्यते। साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नाभावत्वाभावादिति वाच्यम्। तथापि कालिकसंबन्धावच्छिन्नप्रतियोगिताकात्मत्वाभावसाध्यके समवायेनात्मत्वग्रहस्य समवायावच्छिन्नात्मत्वाभावत्वेन साध्यग्रहप्रतिबन्धकतयाऽव्याप्तिरित्यतः साध्यतावच्छेदकधर्मानिवेशः। साध्यतावच्छे-

न्यायरत्नं।

तेन कालिकसंबन्धेन द्रव्यत्वाभाववत्ताबुद्धौ स्वरूपसंबन्धेनैव तदभाववत्ताज्ञानस्य विरोधितया तेन संबन्धेन द्रव्यत्ववतोऽप्रसिद्धत्वेऽपि न क्षतिः। अथवा भावाभावसाधारणदैशिकविशेषणत्वाभिप्रायकमिदम्। नचैवं साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन साध्याभाववत्वनिवेशो व्यर्थ इति वाच्यम्। मतद्वयसाधारण्यानुरोधेन तन्निवेशात्। साध्यतावच्छेदकसंबन्धेन साध्यवत्ताज्ञानं प्रतीत्यादि। साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकध-

---

१ स्थले का. पा. २ वृत्तित्वे का. पा. वृत्तितायां त. पा. ३ विशेषणतेति का. अधिकं.

दैशिकविशेषणतया साध्ये समवायादिरेवेति न दोषः। नचैवं वृक्षनिष्ठा या कपिसंयोगाभावीयमूलावच्छिन्नविशेषणता तादृशसंबन्धेन वृक्षादौ तादृशाभाववत्ताज्ञानेऽपि कपिसंयोगवत्ताज्ञानोत्पत्तेः तादृशसंबन्धो न लक्षणघटक इति साध्यवद्भिन्नवृत्तित्वविशेषणं व्यर्थमिति वाच्यम्। संयोगतदभावयोरविरुद्धत्वज्ञानाभावदशायां वृक्षः कपिसंयोगाभाववानिति ज्ञानस्यापि वृक्षे कपिसंयोगवत्ताज्ञानविरोधितया वृक्षनिष्ठतदभावीयविशेषणताया अपि साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूतसंसर्गताश्रयत्वात्॥

कृष्णंभट्टीयं।

दकसंबन्धावच्छिन्नेत्यनुक्त्वा यत्किंचित्संबन्धेन साध्यवत्ताग्रहं प्रतीत्युक्तौ कालिकसंबन्धावच्छिन्नद्रव्यत्वाभावे कालिकसंबन्धेन साध्येऽव्याप्तिः। स्वरूपसंबन्धेन साध्यवत्ताग्रहंप्रति स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य द्रव्यत्वरूपतया कालिकसंबन्धेन तद्वत्ताज्ञानस्यापि प्रतिबन्धकतया कालिकसंबन्धस्यापि तथात्वापत्त्या कालस्यापि(स्यैव) तत्संबन्धेन साध्याभावाधिकरणत्वादित्यतः साध्यतावच्छेदकसंबन्धेनेत्युक्तम्। नच संयोगी एतद्वृक्षत्वादित्यादौ द्रव्यवृत्तिसंयोगाभावस्यैव कालिकसंबन्धेन साध्यवद्भिन्नगुणादिवृत्तितयाऽव्याप्तिरतः साध्यवद्भिन्नवृत्तित्वमपि साध्यतावच्छेदकसंबन्धेन साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन वाच्यम्। एवं[च] साध्यवत्ताग्रहविरोधितानियामकीभूतयादृशसंबन्धेनाभावस्य साध्यवद्भिन्नवृत्तित्वं (तथाविध) तादृशसंबन्धेन साध्याभावत्वमिति संबन्धैक्यविवक्षणादुक्तस्थले साध्याभाववदधिकरणतावच्छेदकीभूतकालिकसंबन्धस्य साध्य-

न्यायरत्नं।

र्मावच्छिन्नप्रकारताशाल्यनाहार्यज्ञानसामान्यं प्रति, यादृशसंबन्धेन साध्यतावच्छेदकधर्मावच्छिन्नसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नवत्तावगाह्यनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयसामान्यं प्रतिबन्धकं, तादृशसंबन्धेनेत्यर्थः। तेन पर्वतः संयोगेन वह्निमान्कालिकसंबन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रतियोगिताकाभाववांश्चेति समूहालंबनात्मकसाध्यवत्ताज्ञानविशेषं प्रति, कालिकसंबन्धेन वह्न्यभाववत्ताज्ञानस्य कालिकसंबन्धेन प्रतिबन्धकत्वेऽपि, वह्निमान्धूमादित्यादौ नाव्याप्तिः। एवंच साध्यतावच्छेदकसंबन्धनिवेशस्यापि सार्थक्यं। अन्यथा स्वरूपसंबन्धेन संयोगसंबन्धावच्छिन्नवह्न्यभाववत्ताज्ञानस्य साध्यवत्ताज्ञानसामान्यान्तर्गतं यत्समवायेन साध्यवत्ताज्ञानं तं प्रत्यप्रतिबन्धक-

१ अभाव त. पु. अधिकम्.

कृष्णंभट्टीयं।

वह्निन्नवृत्तितावच्छेदकसंबन्धैक्यासंभवात्स्वरूपसंबन्ध एव तादृश इति तेन संबन्धेन साध्याभावाधिकरणमात्मेति नाव्याप्तिरिति साध्यतावच्छेदकसंबन्धेनेति व्यर्थमेवेति वाच्यम्। तथापि कालिकसंबन्धावच्छिन्नाकाशाभावाभावादौ साध्ये आत्मत्वादावव्याप्तेः। कालिकसंबन्धेनोक्तसाध्यवत्ताज्ञानं प्रति कालिकसंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य स्वरूपसंबन्धेन साध्यवत्ताग्रहस्य[1] प्रतिबन्धकतया स्वरूपसंबन्धस्यापि तथात्वापत्तेः। तत्संबन्धेनाकाशाभावरूपसध्याभाववत्वस्यात्मन्यपि सत्वादिति साध्यतावच्छेदकसंबन्धेनेत्यस्यावश्यकत्वात्। नच साध्यवह्निन्ने जन्ये वर्तमानाद्गगनाभावादन्य एवात्मादिवृत्तिर्गगनाभाव इति व्याप्तिरिति वाच्यम्। तथापि महाकालानुयोगिककालिकसंबन्धेन कालिकसंबन्धावच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावे साध्ये महाकालत्वादावव्याप्तेः। स्वरूपसंबन्धेन साध्यवत्ताग्रहं प्रति कालिकसंबन्धेन स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावग्रहस्य विरोधितया कालिकसंबन्धस्य साध्यतावच्छेदकीभूतमहाकालानुयोगिककालिकसंबन्धेन साध्यवह्निन्नखण्डकालवृत्तितावच्छेदकसंबन्धैक्यसंभवात्। तेन संबन्धेन साध्याभावाधिकरणत्वस्य कालएव सत्वादिति तदावश्यकत्वात्। यदिच स्वप्रकारकनिश्चय इति स्वपदस्य साध्याभावपरत्वात्तत्रापि साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन स्वप्रकारकनिश्चय इत्युच्यते, तदा व्यर्थमेव साध्यतावच्छेदकसंबन्धेनेत्यवधेयम्। घटत्वाभाववान्पटत्वादित्यादौ कालिकसंबन्धावच्छिन्नघटत्वाभावसमवायसंबन्धावच्छिन्नघटत्वाभावोभयवत्ताग्रहं प्रति कालिकसंबन्धेन घटत्वग्रहस्य समवायावच्छिन्नघटत्वाभावग्रहं प्रति कालिकसंबन्धेन समवायेन च घटत्वसमूहालम्बनस्य च प्रतिबन्धकत्वादव्याप्तिरतः प्रतिबध्यताप्रतिबन्धकतावच्छेदकत्वयोर्निवेशः। घटभिन्नं घटत्वाभावादित्यादौ तादृशतादात्म्यसंबन्धेन घटत्वरूपसाध्याभाववति घटत्वे हेतुसत्वादव्याप्तिरतः स्वनिष्ठत्वनिवेशः। अथैवमपि कालिकसंबन्धेन वाह्न्यभाववान् अयंच वह्न्यभाववानिति कालिकसंबन्धेन स्वप्रकारकग्रहस्य प्रतिबन्धकतया कालिकसंबन्धसंग्रहो दुर्वारः। नच निश्चयोपादानस्वरसात्स्वप्रकारकनिश्चयत्वं प्रतिबन्धकतावच्छेदकतापर्याप्त्यधिकरणमिति विवक्षया न दोषः। धर्मितावच्छेदकविषयतान्तर्भावेणैव पर्याप्तेः। नच किंचिदवच्छिन्नधर्मिकस्वप्रकारकनिश्चयत्वनिवेशेऽपि न निस्तारः। ह्रदो वह्न्यभाववान्घटो वह्न्यभाववानिति निश्चयानां वह्नित्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारताशालिह्रदत्वाद्यवच्छिन्नविशेष्यकनिश्चयत्वेनैव प्रतिबन्धकतया तादृशस्वप्रकारकनिश्चयत्वे पर्याप्त्यभावात्। मैवम्। सधर्मिता-

१ वैशिष्ट्यग्रहस्येति. मे. पा.

न्यायरत्नं।

तया दैशिकविशेषणताया अपि संग्रहानुपपत्तेः। नचैवमपि नानाधर्मितावच्छेदककसाध्यवत्ताज्ञानसाधारणैकप्रतिबध्यताया अभावेन दैशिकविशेषणताया असंग्रहस्तदवस्थ एवेति वाच्यम्। सर्वं वह्न्यभाववदिति निश्चयाय प्रतिबध्यताया एव तथाविधायाः प्रसिद्धेः। प्रकृतलक्षणे सर्वत्वावच्छिन्नविशेष्यकत्वेनैव निश्चयस्य विशेषणीयत्वात्। यद्वा स्वसमानधर्मितावच्छेद(क)कत्वेन साध्यवत्ताज्ञानं विशेषणीयं स्वं प्रतिबन्धकनिश्चय इति दिक्॥

यत्तु साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिवेशेनैवोक्तसमूहालम्बनमादाय दोषवारणसंभवात्साध्यवत्ताज्ञानसामान्यनिवेशो गौरवग्रस्तः। प्रकारतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशे पर्वतो वह्न्यभावत्वावच्छिन्नकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभाववानिति ज्ञाननिष्ठायाः कालिकसंबन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारताशालिनिश्चयनिरूपितप्रतिबध्यतायाः प्रतियोगित्वसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारताघटितधर्मावच्छिन्नतया कालिकसंबन्धस्यापि संग्रहापत्त्या वह्निमान्धूमादित्यादावव्याप्त्यापत्तिरतस्तदुपात्तम्। साध्यतावच्छेदकधर्मावच्छिन्नत्वस्य प्रकारतायामनिवेशे वह्निमत्त्वप्रकारकप्रमाविषयो धूमादित्यादौ, साध्याभावत्वावच्छिन्नकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वेन साध्यवत्ताज्ञानं प्रति, कालिकसंबन्धेन साध्याभाववत्ताज्ञानस्य प्रतिबन्धकतया कालिकसंबन्धसंग्रहापत्तिरतस्तन्निवेशः। नचैवमपि संयोगेन वह्निमान्पर्वतो वह्न्यभावत्वावच्छिन्नकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभाववानित्याकारकज्ञानं प्रति, संयोगेन वह्निविशिष्टे पर्वते कालिकसंबन्धेन वह्न्यभाववत्ताज्ञानस्य प्रतिबन्धकतया, कालिकसंबन्धसंग्रहो दुर्वार एव तादृशज्ञानीयप्रतिबध्यतायां धर्मितावच्छेदकविषयिताविधया संयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारिताया अवच्छेदकत्वादिति वाच्यम्। सर्वत्वावच्छिन्नविशेष्यकवह्न्यभावप्रकारताशालिज्ञाननिरूपितप्रतिबध्यतावच्छेदककोटौ धर्मितावच्छेदकविषयिताया अनिवेशेनोक्तदोषाभावात्; निवेशेऽपि वा न वह्नित्वावच्छिन्नप्रकारतात्वेन, किंतु धर्मितावच्छेदकतात्वेनैव विनिवेशतां वा विशिष्यैव फलेच्छानामुत्तेजकत्वपक्षे ग्राह्यधर्मितावच्छेदकभेदेन प्रतिबध्यप्रतिबन्धकभावाभेदस्यावश्यकत्वात्। तथापि न क्षतिः धर्मितावच्छेदकतानात्मकत्वेन प्रकारताया विशेषणीयत्वादिति। तदसत्। एवं सति वृत्त्यनियामकसंबन्धस्याभावप्रतियोगिता[वच्छेदकत्वे प्रतियोगिता]संबन्धेन वह्नेः साध्यतायां वह्निध्वंसत्वहेतावव्याप्तेर्दुर्वारतापत्तेस्तत्र साध्याभावत्वावच्छिन्नकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नसाध्यवत्ताबुद्धिं प्रति, कालिकसंबन्धेन साध्याभाववत्ताज्ञानस्य प्रतिबन्धकतया, कालिकसंबन्धसंग्रहस्य दुर्वारत्वात्तादृशज्ञानीयप्रतिबध्यतायां प्रतियोगितासंबन्धावच्छिन्न[वह्नित्वावच्छिन्न]प्रकारताया अवच्छेदकत्वात्। यदिच साध्यतावच्छेदकसंबन्धता,

कृष्णंभट्टीयं ।

वच्छेदकनिश्चयवृत्तिस्वप्रकारतायामनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं निवेश्यम् । निश्चयत्वमनुपादाय वा स्वप्रकारतायां ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकताया स्वरूपसंबन्धरूपमवच्छेदकत्वं निवेशनीयम् । प्रतिबन्धकताविशेषलाभार्थं च निश्चयत्वोत्कीर्तनमिति । वस्तुतस्तु स्वनिरूपितप्रतिबन्धकताव्याप्यसाध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यवत्तानिश्चयत्वाश्रयग्रहप्रतिबन्धकत्वं निश्चयपदोपसंदानलभ्यम् । एवंच साध्यतावच्छेदकसंबन्धाद्युपादानसंगतिः । समानधर्मिकत्वाद्युपलक्षणमेतत् । इति अतिव्याप्तिमाशङ्क्येत्यादिदीधितेरव्याप्तिसंशयोत्तरकालीनकथनकृतिरर्थस्तत्राव्याप्तेराहेत्यनुक्त्वाऽव्याप्तिमाशङ्क्येत्युक्तम् । तत्र साध्यतावच्छेदकसंबन्धेन संयोगवत्ताज्ञानं प्रति निरवच्छिन्नविशेषणतासंबन्धेन संयोगाभाववत्ताज्ञानं प्रतिबन्धकमिति मते नाव्याप्तिः । गुणादेरेव तेन संबन्धेन साध्याभाववत्वात् । अपितु अव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामते स्वरूपसंबन्धेन संयोगाभावज्ञानस्य प्रतिबन्धकतया तन्मत एवाव्याप्तिरित्याशङ्काबीजभूतं कोटिद्वयं क्रमेण शङ्कासमाधानाभ्यां दर्शयति—**नचेति** । तथाच निरवच्छिन्नविशेषणतैव तादृशीत्यभिप्रायः ॥

अत्र निरवच्छिन्नविशेषणतासंबन्धावच्छिन्नाभावस्यैव साध्यात्मकत्वपक्षे नाव्याप्तिः । किंतु शुद्धविशेषणतासंबन्धावच्छिन्नाभावस्य तथात्वपक्षे इत्या-

न्यायरत्नं ।

यादृशरूपावच्छिन्ने पर्याप्ता, तादृशरूपविशिष्टसाध्यतावच्छेदकसंबन्धपर्याप्तावच्छेदकताकत्वं प्रकारतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं दर्शितप्रतिबध्यतावच्छेदककोटिप्रविष्टप्रकारता च न साध्यतावच्छेदकशुद्धप्रतियोगितात्वविशिष्टप्रतियोगित्वसंबन्धावच्छिन्ना । अपितु प्रतियोगित्वसंबन्धावच्छिन्नत्वविशिष्टप्रतियोगित्वावच्छिन्नेति नोक्तदोषः । एतेन निरवच्छिन्नविशेषणताया एव कपिसंयोगवत्ताधीविरोधिज्ञानविषयतया लक्षणे साध्यवद्भिन्नवृत्तित्वविशेषणं व्यर्थमिति । न चेत्यग्रिमशङ्काया अनुत्थितिर्मूलावच्छिन्नत्वविशिष्टसमवायसंबन्धेन कपिसंयोगवत्ताज्ञानं प्रति मूलावच्छिन्नविशेषणतासंबन्धेन कपिसंयोगाभाववत्ताज्ञानस्य प्रतिबन्धकतया तादृशसंबन्धेन कपिसंयोगाभाववत्ताया वृक्षेऽसत्वात्तद्विशेषणवैयर्थ्यानवकाशादिति परास्तमिति विभाव्यते । तदापि विपरीतज्ञानानुत्तरत्वस्य प्रतिबध्यतावच्छेदकत्वपक्षे प्रतिबध्यतावच्छेदककोटौ प्रकारकत्वनिवेशे प्रयोजनविरहेण दर्शितप्रकारकत्वावच्छिन्नत्वस्य प्रतिबध्यतायां निवेशासंभवात् । कालिकविशेषणतया वह्न्यभाववान्दैशिकविशेषणतया वह्न्यभाववानिति ज्ञानविशिष्टस्य पर्वतः कालिकसंबन्धेन वह्न्यभाववानिति ज्ञानस्य वह्निमत्ताज्ञानं प्रति, अवच्छेदकधर्मदर्शनविधया प्रतिबन्धकत्वात्कालिकसंबन्धग्रहो वह्निसाध्यकस्थले दुर्वार इति प्रतिबन्धकदिशि निश्चयसामान्योपादानम् । एवंच स्वप्रकारकत्वनिश्चयत्वादीनामपि सार्थक्यमित्यलं बहुना ॥

केचित्तु साध्यात्मक[1]ाभावनिरूपितप्रतियोगितावच्छेदकसंबन्धेन साध्याभाववत्त्वं विवक्षितम्। सच संबन्धो यत्संबन्धावच्छिन्नप्रतियोगिताकः स्वाभावः साध्यात्मकः स इति नोक्तानुपपत्तिः। [2]अथ समवायेन प्रमेयत्वावच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविशेष्य[3]त्वादिहेतुकस्थले कालिकसंबन्धस्यापि तत्संबन्धावच्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयनिरूपितप्रतियोगितावच्छेदकत्वात्तेन संबन्धेन साध्याभाववति काले हेतोर्वृत्तेरव्याप्तिः। नच साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबन्धनिवेशान्नायं दोषः। कालिकसंबन्धावच्छिन्न(प्रतियोगिताक)घटाभावादिरूपप्रमेयस्य कालिकसंबन्धावच्छिन्नप्रतियोगितायाः घटादावेव सत्वात्कालिकसंबन्धस्य न समवायसंबन्धावच्छिन्नप्रमेयाभावात्मकस्वनिष्ठप्रतियोगितावच्छेदकसंबन्धत्वविरहादिति वाच्यम्। तादृशप्रमेयाभावस्य कालिकसंबन्धावच्छिन्नप्रतियोगिताको योऽभावः तस्यापि प्रमेयत्वेन साध्यतया तन्निरूपिततादृशप्रमेयाभावरूपस्वनिष्ठप्रतियोगितावच्छेदकत्वस्य कालिकसंबन्धेऽक्षततया व्याप्तेर्दुर्वारत्वात्। नच यावत्साध्यनिरूपितप्रतियोगिता निवेशनीया। तथाचोपदर्शिताभावात्मकयत्किंचित्प्रमेयनिरूपितस्वनिष्ठप्रतियोगितावच्छेदककालिकसंबन्धमादाय न दोष इति वाच्यम्। असमवेतप्रमेयस्य न समवायसंबन्धावच्छिन्नप्रमेयाभावोऽत्र नास्तीति प्रत्ययाविषयतया तादृशप्रमेयाभावाभावत्वे मानाभावात्। तादृशप्र-

कृष्णंभट्टीयं।

शयेनाशङ्क्येत्युक्तमितिमतं दर्शयति—**केचित्त्विति**। **साध्यात्मकाभावनिरूपितेति**। साध्यनिरूपितेत्यर्थः। अभावपदमसंभावनावारणाय।

न्यायरत्नं।

केचित्त्विति। साध्यात्मकस्वाभावनिरूपितेत्यस्य साध्यनिरूपितेत्येवार्थः। साध्ये स्वाभावत्वकथनमसंभावनावारणायेति भ्रमेण शङ्कते—**नचेति**। भ्रमं निराकरोति—**तत्रेत्यादिना**। लाघवमनुरुध्य पूर्वकल्पे वक्ष्यमाणदोषं चावेक्ष्याह—**साध्यतावच्छेदकसंबन्धेन वृत्तिमत्साध्यनिरूपितेति**।

---

१ स्वेति का. पा. अधिकं त. पाठेऽपि. २ नचैवमिति ब. पु. पाठः. ३ विषयत्व का. पा. त. पा.

कृष्णंभट्टीयं ।

नोक्तानुपपत्तिः । घटत्वाभावादिसाध्यकाव्याप्तिः हेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धिभयेन द्रव्यत्वोपेक्षा । सद्धेतुत्वार्थं प्रमेति । घटाभावरूपेति । समवायसंबन्धावच्छिन्नप्रमेयाभावस्य यो विशेषणतासंबन्धावच्छिन्नाभावस्तस्य प्रमेयमात्रस्वरूपत्वेन कालिकसंबन्धावच्छिन्नघटाभावादिरूपत्वमित्याशयेनेदम् । यावत्साध्यनिरूपितेति । साध्यतावच्छेदकव्यापकानुयोगितानिरूपितेत्यर्थः । तेन नैकव्यक्तिसाध्यके यावत्त्वाप्रसिद्धिः । सर्वेति । एकैकसमवेतरूपत्वे । सकलसमवेतरूपत्वे तु महागौरवम् । यत्किंचित्त्वं यावत्त्वानिवेशस्फोरकम् । वह्निमान्धूमादित्यादौ स्वनिष्ठप्रतियोगितावच्छेदककालिकसंबन्धवारणाय साध्यनिरूपितत्वनिवेशः । कालिकसंबन्धावच्छिन्नप्रमेयाभावस्य दैशिकविशेषणतासंबन्धेनाभावोऽपि प्रमेयत्वेन साध्य इति, तादृशेन दैशिकविशेषणतासंबन्धेन साध्यवद्भिन्नवृत्तेः साध्याभावस्य तादृशेन कालिकसंबन्धेनाधिकरणमादायाव्याप्तेरित्यतो यत्पदम् । ननु तथापि महाकालानुयोगिकविशेषणतासंबन्धेन प्रमेयस्य साध्यत्वे महाकालत्वादावव्याप्तिः । साध्यतावच्छेदकसंबन्धावच्छिन्नप्रमेयाभावस्य यः शुद्धकालिकसंबन्धावच्छिन्नाभावस्तस्य प्रमेयत्वेन साध्यतया महाकालानुयोगिककालिकसंबन्धेन वृत्तितया च तत्प्रतियोगितावच्छेदकीभूतकालिकसंबन्धेन साध्यवद्भिन्नवृत्तेः साध्याभावस्य महाकाले तत्संबन्धेन सत्वात् । एवं महाकालानुयोगिककालिकसंबन्धेन द्रव्यवृत्तित्वविशिष्टाभावस्य साध्यतायामुक्तहेतावव्याप्तिः निरुक्तसाध्यस्य यः शुद्धकालिकसंबन्धावच्छिन्नाभावः तस्यापि द्रव्यवृत्तित्वेन साध्यतया महाकालानुयोगिककालिकसंबन्धेन वृत्तितया च तन्निरूपितप्रतियोगितावच्छेदकीभूतशुद्धकालिकसंबन्धस्य साध्यवद्भिन्नखण्डकालनिरूपितवृत्तितावच्छेदकत्वात् । नचैतन्मते विशेषरूपेण न संबन्धत्वम् । अन्यथाग्रे स्वपदार्थस्य द्विधानिवेशानुपपत्तिः, वह्निरूपसाध्यनिरूपितप्रतियोगितावच्छेदकविशेषणताविशेषेणाकाशाभावादेः पर्वतादाववृत्त्या वह्निमान्धूमादित्यादावव्याप्त्यभावेन साध्याभाववैयर्थ्यस्य ध्रुवत्वादिति वाच्यम् । तथापि स्वरूपसंबन्धेन द्रव्यवृत्तित्वविशिष्टाभावे साध्ये द्रव्यत्वादावव्याप्तेः । साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नाभावस्य यः कालिकसंबन्धावच्छिन्नाभावस्तस्यापि नित्यद्रव्यवृत्तित्वेन द्रव्यवृत्तित्वविशिष्टाभावत्वाक्रान्ततया साध्यरूपत्वेन तत्प्रतियोगितावच्छेदकीभूतकालिकसंबन्धेन साध्यवद्भिन्नस्पन्दादिवृत्तिसाध्याभाववति जन्यद्रव्ये हेतोः सत्वात् । एवं विषयितासंबन्धेन प्रमेयस्य साध्यत्वे ज्ञानत्वादावव्याप्तिः । विषयितासंबन्धावच्छिन्नप्रमेयाभावस्य यः कालिकसंबन्धावच्छिन्नाभावस्तस्य प्रमेयत्वेन साध्यतया तत्प्रतियोगितावच्छेदककालिकसंबन्धेन साध्यवद्भिन्नवृत्तित्वस्य

---

१ स्वनिरूपितत्वपदप्रयोजनम्. व. पु. नास्ति. २ विशेष मै. पु. अधिकम्.

मेयाभावनिष्ठयावत्प्रमेयनिरूपितप्रतियोगित्वाप्रसिद्ध्या उक्तस्थलेऽव्याप्तितादवस्थ्यात् । नच साध्यतावच्छेदकसंबन्धेन वृत्तिमद्यावत्साध्यनिरूपितप्रतियोगितायाः निवेशनीयतया नोक्ताप्रसिद्धिरिति वाच्यम् । सर्वत्र समवायस्यैकया सत्तयैव तादृशप्रमेयाभावाभाववत्ताप्रतीतिनिर्वाहे सर्वसमवाय्यसंग्राहकगुणादीनां तादृशप्रमेयाभावाभावत्वे मानाभावेन दर्शिताप्रसिद्धेर्दुर्वारत्वादिति चेन्न । साध्यतावच्छेदकसंबन्धेन वृत्तिमद्यत्किंचित्साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबन्धनिवेशेनोपपत्तेः । कालिकसंबन्धावच्छिन्नप्रतियोगिताकस्य दर्शितसाध्याभावाभावस्य साध्यत्वेऽपि तस्य साध्यतावच्छेदकसमवायसंबन्धेनावृत्तित्वात् । नचैवमपि कालिकसंबन्धेन प्रमेयसाध्यककालत्वादिहेतावव्याप्तिः । कालिकसंबन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य यः कालिकसंबन्धावच्छिन्नप्रतियोगिताकोऽभावः तस्य स्वाभावात्मकस्य प्रमेयत्वेन साध्यस्य प्रतियोगितावच्छेदकीभूतकालिकसंबन्धेन कालिकसंबन्धावच्छिन्नप्रमेयाभावाधिकरणे हेतोर्वृत्तेरिति वाच्यम् । तादृशप्रतियोगितावच्छेदकयत्संबन्धेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्संबन्धेन तद्वत्त्वस्य विवक्षणीयत्वात् ।

कृष्णंभट्टीयं ।

साध्याभावे तद्वत्त्वस्य च जन्यज्ञाने सत्वात् । साध्यतावच्छेदकव्यापकानुयोगितानिरूपितप्रतियोगितां निवेश्य तद्वारणसंभवेपि भट्टाचार्येणैव समवायेन प्रमेयसामान्यसाध्यके साध्याभावाभावस्य लाघवेन सत्तारूपत्वमुपगम्य तथाविधानुयोगित्वाप्रसिद्ध्यावेदनात् । नच साध्यनिरूपितत्वं साध्यवद्यावद्व्यक्तिवृत्तिवृत्त्यनुयोगिताकत्वम् । तच्च साध्यतावच्छेदकसंबन्धेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतानुयोगितानिरूपितत्वम् । तेन एतद्रूपादिसाध्यके न दोषः । तथाच नवद्रव्यवृत्तिसाध्यव्यापकतावच्छेदकत्वस्य नित्यद्रव्यमात्रवृत्त्यभावनिष्ठानुयोगितायामसत्वान्नाव्याप्तिः । एवं विवक्षितासंबन्धेन प्रमेयसाध्यकेप्यव्याप्तिवारणमूह्यम् । अतएव सत्तातिरिक्तप्रमेयस्य समवायेन साध्यत्वे साध्याभावाभावस्य सत्तारूपत्वेपि सत्तानि-

न्यायरत्नं ।

तादृशप्रतियोगितावच्छेदकयत्संबन्धेन साध्यवद्भिन्नवृत्तित्वमभावस्येति । तथाच साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकयत्संबन्धेन, साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तस्य, तेन संबन्धेन, यदधिकरणं, तद्वृत्तित्वा-

कृष्णंभट्टीयं ।

ष्टानुयोगितायां एव साध्यव्यापकतावच्छेदकतया तन्निरूपितप्रतियोगितावच्छेदकीभूतः स्वरूपसंबन्ध एवेति नाव्याप्तिः । अन्यथा प्रतियोगितायाः साध्यनिरूपितत्वदौर्लभ्यप्रसङ्गादिति वाच्यम् । कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादौ स्वरूपसंबन्धावच्छिन्नप्रतियोगिताककालवृत्तित्वविशिष्टगगनाभावाभावस्य साध्यसमनियततया साध्यरूपत्वमेवेति कालवृत्तित्वविशिष्टगगनाभावनिष्ठायाः साध्यनिरूपितप्रतियोगितायाः विशेष्यमात्रनिष्ठत्वेन [विशिष्टस्य शुद्धादनतिरिक्तत्वाद्वा] गगनाभावनिष्ठत्वमिति तदवच्छेदकस्वरूपसंबन्धेन गगनाभावरूपसाध्याभावस्यात्मनि वृत्तेरव्याप्तिः । [[1] साध्यव्यापकतावच्छेदकानुयोगितानिरूपितप्रतियोगितावच्छेदकसंबन्धनिवेशेपि भावात्] । नचोक्तस्थले स्वरूपसंबन्धस्य लक्षणघटकत्वेऽपि अधिकरणभेदेन गगनाभावरूपसाध्याभावभेदोपगमनात् साध्यवद्भिन्नवृत्तिसाध्याभाववत्त्वमात्मनि नास्त्येवेति कथमव्याप्तिर्दीयत इति वाच्यम् । गगनाभावभेदोपगमे स्वनिष्ठप्रतियोगितेत्यत्र स्वनिष्ठत्ववैफल्यापत्तेः । कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावसाध्यकात्मत्वहेतौ आकाशाभावस्याधिकरणभेदेन भेदादेवाव्याहृयनवकाशात् । एवं घटभिन्नत्वादिसाध्यके कालिकसंबन्धावच्छिन्नप्रतियोगिताकस्य घटत्वविशिष्टगगनाभावाभावस्य साध्यसमनियततया तत्प्रतियोगितावच्छेदककालिकसंबन्धेन साध्याभाववति पटत्वादिहेतुसत्त्वेनाव्याप्तेः स्वनिष्ठत्वस्यावश्यकतयाऽथेत्यादिग्रन्थानुत्थितिः । किंवा स्वनिष्ठत्वोपादानेऽपि तादृशघटत्वविशिष्टगगनाभावस्य तथात्वेन कालिकसंबन्धसंग्रहप्रसङ्गेन तत्रैवाव्याप्तेर्दुर्वारत्वा[2]दिति चेन्न । साध्यवद्भिन्नमात्रवृत्तित्वस्य वाच्यत्वात् । नच तादृशप्रतियोगितावच्छेदकीभूतयद्यत्संबन्धेन साध्यवद्भिन्नवृत्तित्वं तत्तत्संबन्धेन साध्याभाववत्त्वं वाच्यमिति सर्वदोषवारणान्मात्रपदं व्यर्थमिति वाच्यम् । विषयितासंबन्धेन प्रमेयसाध्यके गगनज्ञानान्यतरत्वादित्यादावति[3]व्याप्तिः । तत्र कालिकसंबन्धस्वरूपसंबन्धयोरपि संग्रहसंभवात्ताभ्यां साध्याभावाधिकरणे ज्ञानभिन्नजन्ये हेतोरसत्त्वात् । अथ मात्रार्थान्तर्भावापेक्षया लाघवाद्येन संबन्धेन लक्षणसमन्वयो जायते स एव तत्पदेनोपादेयः । आत्मा, कालान्यनित्यत्वादित्यादौ कालिकसंबन्धेन साध्यवद्भिन्नवृत्तेरात्मत्वाभावस्य तत्संबन्धेनाधिकरणे हेतोरवृत्तेरतिव्याप्तिरतः प्रतियोगितावच्छेदकान्तमिति चेन्न । प्रमेयवान् गगनजात्यन्यतरत्वादित्यादौ उज्झित्यैव दैशिकविशेषणतां समवायेन प्रमेयाभावस्य यः कालिकसंबन्धावच्छिन्नाभावस्तस्यापि प्रमेयत्वेन साध्यतया तत्प्रतियोगितावच्छेदककालिकसंबन्धमुपादायातिव्याप्तिप्रसंगात् । सत्तान्यप्रमेयसाध्यके तु पूर्ववदिति । [4]वस्तुतस्तु सत्तान्यप्रमेयाभावा-

---

१ इदंच मै. पु. नास्ति. २ दुर्वारतेति मै. पा. ३ व्याप्तेः इति मै. पाठः.
४ वस्तुतस्तु इत्यादि उत्प्रेक्षन्ते इति पर्यन्तं व. पु. नास्ति.

न्यायरत्नं ।

भावो व्याप्तिरिति समुदितार्थः पर्यवसितः । अथैवमपि कालिकसंबन्धेन सर्ववान्कालत्वादित्यादौ साध्याभावस्य यः कालिकसंबन्धावच्छिन्नाभावस्तस्य सर्वान्तःपातितया साध्यतावच्छेदकसंबन्धेन वृत्तिमत्साध्यस्वरूपतया कालिकसंबन्धस्यापि तथात्वेन तादृशसंबन्धेन साध्यवद्भिन्ने जन्यकाले वर्तमानस्य साध्याभावस्याधिकरणे महाकाले हेतोः सत्वादव्याप्तिः । एवं दिकृतविशेषणतया सर्वसाध्यके महादिक्त्वहेतौ, विषयितासंबन्धेन सर्वसाध्यके नित्यज्ञानत्वहेतौ दिक्कृतविशेषणतां विषयितां चादायाव्याप्तिर्दुर्वारा । नच तादृशयद्यत्संबन्धेनेति वक्तव्यं । प्रकृते तादृशयावदन्तर्गतदैशिकविशेषणतासंबन्धेन हेतुमति साध्याभावासत्वान्नाव्याप्तिरिति शङ्क्यम् । तथा सति ग्रन्थकृ[दभिहित]ता वक्ष्यमाणस्वनिष्ठत्वविशेषणप्रयोजनासङ्गतेरिति चेन्न । जन्यानां महाकालमहादिग्वृत्तितायामवच्छेदकत्वं नतु कालदिक्त्वे । विषयितासंबन्धो नाभावप्रतियोगितावच्छेदको न वा तेन साध्यत्वमिति मतेनैवैतत्परिष्कारकरणात् । अथैवमपि गगनाभावत्वावच्छिन्नकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावे विशेषणताविशेषेण साध्ये आत्मत्वहेतावव्याप्तिः । तादृशसाध्यस्य कालवृत्तित्वविशिष्टगगनाभावाभावसमनियततया, तदभिन्नत्वेन तदभावस्य कालवृत्तित्वविशिष्टगगनाभावरूपतया, दैशिकविशेषणताया अपि, साध्यनिरूपितसाध्याभावनिष्ठप्रतियोगितावच्छेदकसंबन्धतया, तेन संबन्धेन गगनाभावात्मकसाध्याभावस्य, साध्यवद्भिन्ने वर्तमानस्यात्मनि सत्वात् । नच साध्यनिरूपितसाध्याभावनिष्ठप्रतियोगिताव्यक्तिर्येन रूपेण येन संबन्धेनावच्छिन्ना, तेन रूपेण तेन संबन्धेन साध्यवद्भिन्नवृत्तेः साध्याभावस्य तेन रूपेण तेन संबन्धेन यदधिकरणं तद्वृत्तित्वाभावो व्याप्तिरिति विवक्षितम् । कालवृत्तित्वविशिष्टगगनाभावत्वावच्छिन्नायाः साध्यनिरूपितप्रतियोगिताया अवच्छेदकीभूतदैशिकविशेषणतासंबन्धेन कालवृत्तित्वविशिष्टगगनाभावत्वावच्छिन्नाधिकरणत्वस्यात्मन्यसत्वान्नाव्याप्तिरिति वाच्यम् । एवं सति प्रतियोगितायां स्वनिष्ठत्वविशेषणवैयर्थ्यापत्तेः । दर्शितस्थले कालिकसंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावनिष्ठप्रतियोगितायां, दैशिकविशेषणतासंबन्धस्यावच्छेदकत्वेऽपि, तादृशप्रतियोगितावच्छेदकरूपेण तादृशप्रतियोगिताश्रयीभूताभावस्य साध्यवद्भिन्नवृत्तेर्व्यतिरेकिमात्रस्य कालिकसंबन्धावच्छिन्नाभावोऽव्याप्यवृत्तिरिति मते प्रसिद्धावपि, तस्याधिकरणभेदेन भिन्नत्वावश्यकतयात्मन्यवृत्तेरव्याप्त्यनवकाशादिति चेन्न । स्वावच्छेदकावच्छिन्नानधिकरणनिरूपितस्वावच्छेदकसंबन्धावच्छिन्नाधेयतावच्छेदिका या या प्रतियोगिता, तत्तदन्यत्वस्य साध्याभावनिष्ठप्रतियोगितायां निवेशेन सर्वसामञ्जस्यात् । विशिष्टसत्त्वाभावसाध्यके विशिष्टसत्तात्वावच्छिन्नप्रतियोगिताया विशेष्यमात्रवृत्तितया स्वावच्छेदकावच्छिन्नानधिकरणनिरूपितस्वावच्छेदकसमवायसंबन्धावच्छिन्नाधेयतावच्छेदकत्वेऽपि विशिष्टसत्ताधिकरणत्वरूपसाध्याभावनिष्ठप्रतियोगितैव तादृशीति तादृशप्रतियोगितावच्छेदकस्वरूपसंबन्धेन विशिष्टसत्ताधिकरणत्वरूप-

कृष्णंभट्टीयं ।

भावः द्रव्यत्वगुणत्वकर्मत्वान्यतमरूपः तस्य सत्तान्यत्वात् । अन्यथा समवेतप्रमेयस्वरूपत्वे मानाभावादिति ग्रन्थवैयर्थ्यात् । एवंच रूपान्यप्रमेयाभावाभावादेः रूपान्यसमवेतादिरूपतामभिप्रेत्य समवेतरूपतामभिधाय शुद्धप्रमेयाभावाभावमात्रस्य सत्तारूपत्वाभिधानसङ्गतिः । सत्तान्यप्रमेयाभावाभावस्य सत्तारूपत्वे साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभावाभावनिरूपितप्रतियोगितावच्छेदकेत्यादिक्रमेण वा निवेशः । साध्याभावाभावश्च साध्यवत्ताग्रहविरोधितानियामकसंबन्धावच्छिन्नप्रतियोगिताकः । तेन न पूर्वोक्तदोषः । साध्यवद्भिन्नवृत्तित्वं तु यथाश्रुतमेव ॥

परेतु साध्यतावच्छेदकसमानाधिकरणानियोगिता तादृशसाध्याभावत्वावच्छिन्नप्रतियोगिताकानुयोगितान्यतरनिरूपितप्रतियोगितेत्यादिक्रमेण निवेशः । प्रथमानुयोगितायां साध्यवत्ताग्रहविरोधितानियामकसंबन्धावच्छिन्नप्रतियोगिताकत्वनिवेशान्न पूर्वोक्तदोषः । घटत्वाभावसाध्यके घटत्वरूपसाध्याभावस्य कालिकसंबन्धावच्छिन्नाभावमादाय कालिकसंबन्धमादायाव्याप्तिरतः साध्याभावत्वावच्छिन्नप्रतियोगितायां दैशिकविशेषणतासंबन्धावच्छिन्नत्वं निवेश्यं । तथाच तत्रैव घटत्वरूपसाध्याभावनिष्ठप्रतियोगितावच्छेदकस्वरूपसंबन्धेन वैशिष्ट्यस्याप्रसिद्धिरतः समवायसंबन्धग्रहाय साध्योपादानं । कालिकसंबन्धावच्छिन्नाकाशाभावाभावसाध्यके आकाशाभावघटोभयत्वावच्छिन्नप्रतियोगितावच्छेदकस्वरूपसंबन्धमादायाव्याप्तिरतः साध्याभावत्वावच्छिन्नत्वनिवेशः । अथैवमाकाशाभावनिष्ठसाध्याभावत्वावच्छिन्नस्य स्वरूपसंबन्धेन केवलान्वयित्वात् अन्यतरघटकतदभावाप्रसिद्धिः । गगनात्मकसाध्याभावोपगमेन स्वरूपसंबन्धग्रहस्य साध्याभावाभावे वृत्तिमत्त्वविशेषणेन वारणेऽपि तदप्रसिद्धिः । साध्याभावत्वावच्छिन्नप्रतियोगितायां संयोगस्वरूपान्यतरसंबन्धावच्छिन्नत्वदाने तादृशाकाशाभावस्य स्वरूपसंबन्धेन वृत्तेस्तदप्रसिद्धिः । नच स्वरूपसंबन्धावच्छिन्नत्वसंयोगसंबन्धावच्छिन्नत्वान्यतरत्वं तद्विशेषणमिति संयोगसंबन्धावच्छिन्नाकाशाभावाभावस्य तद्घटकस्य प्रसिद्धिः । गगनाभावाभावानुपगमाच्च न स्वरूपसंबन्धमादाय दोष इति वाच्यम् । तथासति समवायाद्यवच्छिन्नघटाभावसाध्यके संयोगसंग्रहापत्त्याऽव्याप्तेः । मैवम् । संयोगविषयतोभयावच्छिन्नत्वस्वरूपसंबन्धा-

न्यायरत्नं ।

साध्याभाववदवृत्तित्वमादायैव तत्साध्यके गुणत्वहेतौ लक्षणसमन्वय इति दिक् (शिवम्) ॥

अथैवमपि कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावे साध्ये आत्मत्वादावव्याप्तिरस्त्येव । तादृशसाध्यस्य यो व्यधिकरणसंयोगसंबन्धावच्छिन्नप्रतियोगिताकाभावो यश्च तादृशसाध्यगगनोभयत्वावच्छिन्नाभावस्तयोर्गगना-

कृष्णंभट्टीयं ।

वच्छिन्नत्वान्यतरत्वेन प्रतियोगिताविशेषणात् उभयत्वावच्छिन्नसंबन्धस्य वृत्त्यनियामकतया तमादाय दोषाभावात् । नच सत्तान्यप्रमेयसाध्यके गुरुतया सत्तान्यप्रमेयत्वावच्छिन्नाभावाप्रसिद्धिः। गुरोरप्यवच्छेदकत्वात् । सत्तान्यस्यैव वा समवायेन साध्यत्वं तदभावाभावस्य लाघवेन सत्तारूपत्वात् । एवंच घटभेदघटत्वाभावयोर्भेदे घटभेदाभावत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नघटत्वनिष्ठप्रतियोगिताकाभावस्य केवलान्वयिनो घटत्वाभावाद्यन्यतया समवायसंग्रहानुपपत्तिरतस्तद्भेदानुधावनमावश्यकम् । ननु साध्याव्यापकनिरूपितेति कल्पे वह्नेर्वह्निव्यापकत्वस्य निर्वाहाय प्रतियोगिवैयधिकरण्यस्य निवेश्यतया समवायावच्छिन्नघटाभावसाध्यके कालिकसंबन्धावच्छिन्नघटत्वाभावस्य व्यापकतया कालिकसंबन्धसंग्रहेणाव्याप्तेश्चेति उत्प्रेक्षन्ते ॥ ननु[1] कालिकसंबन्धावच्छिन्नप्रतियोगिताकात्मत्वप्रकारकप्रमाविशेष्यत्वाभाववानात्मत्वादित्यादौ कालिकसंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य विशेषणतया योऽभावस्तस्यापि साध्यरूपतया तन्निरूपितप्रतियोगितावच्छेदकीभूतविशेषणतासंबन्धेन तादृशप्रमाविशेष्यत्वरूपसाध्याभाववत्यात्मनि हेतोः सत्त्वादव्याप्तिः । एवं घटभिन्नं घटत्ववत्त्वादित्यादौ साध्यनिरूपितप्रतियोगितावच्छेदकीभूततादात्म्यसंबन्धेन घटत्वरूपसाध्याभाववति हेतुमत्त्वादव्याप्तिस्तद्वारणाय स्वनिष्ठत्वं निवेश्यम् । तथा सति घटभेदस्य घटभेदाभावत्वावच्छिन्नप्रतियोगिताकाभावतया घटत्वे तत्प्रतियोगिता स्वीकार्या । अन्यथा साध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छेदकसंबन्धेन साध्याभाववत्त्वं निवेश्यं । निष्ठान्तं चान्यतरविशेषणम् । न चैतत्कल्पे घटभेदसाध्यके अन्यतरान्तर्गततादात्म्यमादायाव्याप्तितादवस्थ्यम् । साध्यीयप्रतियोगितायामत्यन्ताभावत्वनिरूपितत्वनिवेशात् । घटभेदनिरूपितघटप्रतियोगित्वस्यात्यन्ताभावत्वानिरूपितत्वात् । तदवच्छेदकत्वदले चात्यन्ताभावत्वनिरूपितत्वं न निवेश्यम्[2] । अन्यथा साध्यीयघटनिष्ठतादृशप्रतियोगित्वाप्रसिद्ध्या तत्रैवाव्याप्तेः । नचोक्तकल्पयोस्तादात्म्येन घटसाध्यकेऽव्याप्तिः । घटभेदाभावस्य घटत्वरूपतया घटभेदात्मकं यत्त्वं तन्निष्ठप्रतियोगिताया असाध्यीयत्वादिति वाच्यम् । घटत्वस्येव घटस्यापि घटभेदाभावत्वोपगमात् । नन्वेवं कल्पद्वयेऽपि घटाभिन्नं कपालत्वादित्यादावव्याप्तिः घटत्वरूपसाध्याभावादौ घटभेदप्रतियोगित्वस्य तदवच्छेदकत्वस्य वा सत्त्वेन तदवच्छेदकसमवायेन घटात्मकसाध्याभाववति (कपाले) हेतोर्वृत्तेः ।

अत्र केचित् । साध्याभाववदवृत्तित्वघटकसाध्याभावे साध्यनिष्ठात्यन्ताभावत्वनिरूपितप्रतियोगिताश्रयत्वं विशेषणं देयम् । घटभेदघटत्वात्यन्ताभावयोरभेदेऽपि तन्निष्ठात्यन्ताभावत्वनिरूपितप्रतियोगिताश्रयो न घटः

---

१ अत्रेति मै. पाठः. २ न निवेशनीयम् इति मै. पाठः.

उक्तस्थले च साध्याभावस्य कालिकसंबन्धेन साध्यवद्भिन्ने अवृत्तेः। अथैवं तादृशप्रतियोगितायां स्वनिष्ठत्वनिवेशो विफलः। तदनिवेशे

कृष्णंभट्टीयं।

किंतु घटत्वमेवेति नाव्याप्तिः। यद्यपि द्वितीयकल्पे घटत्वस्य घटभेदप्रतियोगिताशून्यत्वान्नेदं निवेशयितुं शक्यते। नच तत्कल्पे साध्यसमव्यापकनिष्ठात्यन्ताभावत्वनिरूपितप्रतियोगिताश्रयत्वं साध्यभावे निवेश्यम्। तथा सति घटभिन्नकपालत्वादित्यादौ घटात्मकसाध्याभावस्य घटानुयोगिककालिकसंबन्धावच्छिन्नप्रतियोगिताकघटसामान्याभावस्य च साध्यसमनियतत्वेन तन्निष्ठात्यन्ताभावत्वनिरूपितप्रतियोगिताश्रयतया साध्यीयप्रतियोगितावच्छेदकतावच्छेदकसमवायेन तद्वृत्तायाः कपाले सत्वादव्याप्तेः। तथापि साध्याभावे साध्याभावत्वावच्छिन्नप्रतियोगिताकाभावनिष्ठात्यन्ताभावत्वनिरूपितप्रतियोगिताश्रयत्वदानान्न दोषः। नच स्ववृत्तिप्रतियोगितावच्छेदकसंबन्धेन साध्याभाववत्वं विवक्षितमिति न दोष इति वाच्यम्। तथा सत्यत्यन्ताभावत्वनिरूपितप्रतियोगित्वनिवेशव्यावृत्त्यसङ्गतेः। प्रागुक्तात्मत्वप्रकारकप्रमाविशेष्यत्वाभावादिसाध्यके स्वनिष्ठत्वघटकसंबन्धव्यावृत्त्यसङ्गतेश्च। अथ साध्याभावे तादात्म्यसंबन्धावच्छिन्नसाध्यीयप्रतियोगितानाश्रयत्वदानान्न घटभिन्नकपालत्वादित्यादावव्याप्तिः। वह्निमान्धूमादित्यादौ वह्निमद्भेदभिन्नस्य वह्निस्वरूपतया वह्निमद्भिन्न एव साध्यीयप्रतियोगिताश्रयत्वप्रसिद्धिरिति चेत्तर्हि वह्न्यभावस्य वह्निमद्भिन्नतया साध्यीयतादृशप्रतियोगिता[1]वत्वेनाव्याप्तेः। नच तादात्म्यसंबन्धानवच्छिन्नप्रतियोगिताश्रयत्वं साध्याभावे देयम्। अथवात्यन्ताभावत्वनिरूपितप्रतियोगिताश्रयत्वमिति न दोष इति वाच्यम्। तथा सति द्वितीयकल्पे घटत्वे घटभेदप्रतियोगित्वविरहेणाव्याप्तेः। यदि च तादात्म्यसंबन्धानवच्छिन्नप्रतियोगित्वतादात्म्यसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वान्यतराश्रयत्वं तत्र दीयते। तथापि घटभिन्नं कपालत्वादि[2]त्यत्राव्याप्तिरेव। घटेपि घटभेदाभावत्वावच्छिन्नप्रतियोगितायाः अत्यन्ताभावत्वनिरूपितत्वात्तादात्म्यसंबन्धानवच्छिन्नत्वाच्चेति चेत्। गुणान्यत्वविशिष्टसत्ताभाववान्गुणत्वादित्यादावव्याप्तिवारणाय साध्याभावत्वविशिष्टाधिकरणत्वनिवेशनमावश्यकम्। तथाच कपाले घटभेदो नास्तीति प्रतीतिभयेन घटभेदाभावत्वविशिष्टाधिकरणत्वानुपगमान्न घटभिन्नं कपालत्वादित्यादौ दोषः। घटत्वं घटभेदाभाव इति प्रतीतिबलेन घटत्वेऽपि घटभेदाभावत्वावच्छिन्नसंबन्धित्वं स्वीकार्यमिति नात्यन्ताभावत्वनिरूपकत्वविशेषणव्यावृत्त्यसङ्गतिः। परंतु घटत्वादौ घटभेदादिप्रतियोगिताङ्गीकर्तृणां प्रथमकल्पस्यैव सम्यक्त्वमिति मनसिकृत्य स्वनिष्ठत्वनिवेशवैयर्थ्यं शङ्कते—अथेति।

---

१ ताश्रयत्वेन इति. मै. पाठः. २ इत्यादौ. इ. मै. पाठः.

घटभिन्नं घटत्वाभावादित्यादौ घटभेदात्मकसाध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसंबन्धेन घटत्वात्मकसाध्याभाववति घटत्वे घटत्वाभावरूपहेतोः वृत्तेरव्याप्तिप्रसक्तावपि, तादृशाऽव्याप्तेरीदृशविवक्षयैव वारणसंभवात्। घटत्वरूपसाध्याभावस्य साध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसंबन्धेन साध्यवद्भिन्ने घटेऽवृत्तेः। नचैवं तादृशसाध्यस्य तादृशसंबन्धेन साध्यवद्भिन्नवृत्तिरभाव एवाप्रसिद्ध इति कथमव्याप्तिपरिहार इति वाच्यम्। घटभेदस्य घटत्वाभावसमनियतत्वेन तद्भिन्नतया घटत्वेऽपि समवायसंबन्धावच्छिन्नायास्तादृशप्रतियोगितायाः सत्त्वेन तादृशप्रतियोगितावच्छेदकसमवायेन साध्यवद्भिन्नवृत्तिघटत्वरूपसाध्याभावस्य प्रसिद्धिसंभवात्। तादृशाभावयोर्भेदे स्वनिष्ठत्वस्य प्रतियोगिताविशेषणत्वेऽपि घटत्वरूपसाध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्या तद्दोषतादवस्थ्यात्। संयोगिभेदस्य व्याप्याव्याप्यवृत्तित्वरूपवैधर्म्येण [संयोगाभावाभेदासंभवेऽपि], संयोगवत्त्वप्रमाविषयत्वाभावाभेदे बाधकाभावात् स्वरूपसंबन्धस्यापि साध्यनिरूपितप्रतियोगितावच्छेदकसंबन्धतया तेन संबन्धेन साध्यवद्भिन्नवृत्तेस्तादृशप्रमाविषयत्वरूपसाध्याभावस्य प्रसिद्ध्या संयोगिभिन्नं गुणत्वादित्यादावव्याप्तेरनवका-

कृष्णंभट्टीयं।

संयोगवत्त्वेति। प्रथमलक्षणमनुरुद्ध्य संयोगिभेदस्य व्याप्यवृत्तिसंयोगाभावाभेदसंभवेन तदभावमादाय द्वितीयलक्षणसङ्गतेः। नच संयोगाभावाभावस्य संयोगरूपत्वेऽपि द्रव्यवृत्तिसंयोगाभावनिष्ठतद्व्यक्तित्वावच्छिन्नाभावो न संयोगः मानाभावादिति वाच्यम्। संयोगिभेदाभावस्य संयोगरूपत्वात् संयोगिभेदाभाववत्संयोगाभावाभावस्य संयोगरूपत्वेपि द्रव्यावृत्तिसंयोगाभावनिष्ठतत्तद्व्यक्तित्वावच्छिन्नाभावो न संयोगो मानाभावादिति संयोगरूपसाध्याभावो नाव्याप्तिकारकः। [वस्तुतस्तु समनियताभावानां ऐक्यमित्यस्य ययोरनुयोगितयोः समनियतावच्छेदकत्वं तयोरेकाभावे समावेशः लाघवादित्यर्थ इति नेहाभावैक्यम्] द्रव्यत्वाभावाभेदसंभवेऽपि कपिसंयोगिभेदादेः साध्यत्वे कपिसंयोगवत्त्वप्रकारकप्रमाविषयत्वाभावस्यैवाभेद इति सर्वत्रापि [तथाविधाभेदौचित्यात्] तदभिधानं कालिकसंबन्धावच्छिन्नाकाशत्वा-

१ एतत्स्थाने वा. पुस्तके एतद्वाक्यं वर्तते.

शादिति चेन्न । प्रतियोगितायां स्वनिष्ठत्वानिवेशे कालिकसंबन्धावच्छिन्नप्रतियोगिताके आकाशाभावादौ साध्ये आत्मत्वादिहेतावव्याप्तेर्दुर्वारत्वात् । तादृशसाध्यस्य यः कालिकसंबन्धावच्छिन्नाभावो दैशिकविशेषणतासंबन्धावच्छिन्नतदभावस्य तादृशसाध्यस्वरूपतया दैशिकविशेषणतासंबन्धस्य साध्यनिरूपितप्रतियोगितावच्छेदकसंबन्धत्वात् तेन संबन्धेन आकाशाभावरूपसाध्याभावस्य साध्यवद्भिन्नकाले हेतुमति च वृत्तेः । प्रतियोगितायां स्वनिष्ठत्वनिवेशे दैशिकविशेषणतया आकाशाभावनिष्ठसाध्यनिरूपितप्रति-

कृष्णंभट्टीयं ।

भावाभावसाध्यके साध्यवद्भिन्नत्वाप्रसिद्धेराह—**आकाशेति** । स्वं साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नाभावः । साध्यतावच्छेदकसंबन्धेन दर्शिताकाशाभावाभावाकाशाभावोभयाभावस्य यो दैशिकविशेषणतयाऽभावस्तयोरुभयरूपत्वेन साध्यतया तत्प्रतियोगितावच्छेदकीभूतदैशिकविशेषणतासंबन्धेन साध्याभाववति हेतुसत्वादव्याप्तिरतः साध्यतावच्छेदकधर्मनिवेशः । अथ वक्ष्यमाणरीत्या साध्याभावत्वविशिष्टाधिकरणतानिवेशादुक्तरीत्या दैशिकविशेषतासंग्रहेऽपि हेतुमति तेन संबन्धेनाकाशाभावत्वविशिष्टस्यैव वृत्तिर्न तु साध्याभावत्वविशिष्टस्य । एवं तादृशाकाशत्वाभावाभावसाध्यकेपीति स्वनिष्ठत्वं व्यर्थम् ।

अत्रेदं समाधानम् । एतन्मते विशिष्टसत्ताद्यभावसाध्यके साध्याभावो विशिष्टसत्ताद्यधिकरणतैव कालिकसंबन्धावच्छिन्नाकाशाभावसाध्यकादौ त्वाकाशाभावादिः । तथाच न विशिष्टसत्ताधिकरणतानिवेश इति । अत्र साध्यवद्भिन्नमात्रवृत्तित्वनिवेशस्यावश्यकतया स्वनिष्ठत्ववैयर्थ्यमिति पूर्वपक्षस्त्वनादरणीयः । तथापि तस्य साध्यवदवृत्तित्वरूपत्वेऽपि विशिष्टसत्ताद्यभा-

न्यायरत्नं ।

भावात्मकसाध्याभावसमनियतत्वेन तदभिन्नतया दैशिकविशेषणतासंबन्धस्य लक्षणघटकत्वात् । नच तादृशाभावयोः साध्याभावसमनियतत्वेऽपि तयोः केवलान्वयितया दैशिकविशेषणतासंबन्धावच्छिन्नप्रतियोगिताकतदभावस्याप्रसिद्ध्या साध्यानात्मकत्वान्न दैशिकविशेषणतायाः साध्यनिरूपितप्रतियोगितावच्छेदकत्वमिति वाच्यम् । साध्ये तत्प्रतियोगित्वनिर्वाहाय गगने गगनाभावाभावत्वमिव तदभावत्वस्यापि युक्तिसिद्धत्वात् । मैवम् । अभावविरहात्मत्वं (वस्तुनः) प्रतियोगित्वमिति मते तदावश्यकत्वेपि प्रतियोगित्वस्य स्वरूपसंबन्धरूपत्वे तदना-

---

१ अवश्यंभावात् मै. पाठः. २. मै. पु. ना.

कृष्णंभट्टीयं।

वसाध्यैकस्थलानुरोधेन साध्यवदवृत्त्यधिकरणताककत्वस्यावश्यकतया काल-वृत्तित्वविशिष्टगगनाभावाभावस्य साध्यसमनियतत्वेन साध्यात्मकतया कालवृत्तित्वविशिष्टगगनाभावस्य तदभावात्मनः साध्यवदवृत्त्यधिकरणताकत्वस्याधिकरणे हेतुसत्त्वेनाव्याप्तेस्तन्निवेशः। नच तथापि साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकत्वं दैशिकविशेषणतायामव्याहतमिति वाच्यम्। साध्याभावत्वरूपसाध्यीयप्रतियोगितायाः प्रतियोगितान्तार्थत्वात्। कालिकसंबन्धावच्छिन्नप्रतियोगिताया एव साध्याभावत्वरूपानुयोगितारूपत्वात्। नच तथापि एतत्कल्पे विशिष्टसत्ताभावाभावः सत्तैवेत्यव्याप्तिवारणाय साध्याभावत्वे तादृशाधिकरणतानिरूपकतावच्छेदकत्वस्य विवक्षितत्वात्तद्विशिष्टाधिकरणतानिवेशावश्यकतया स्वनिष्ठत्वं व्यर्थमिति वाच्यम्। एवं तर्हि अव्याप्यवृत्तिसाध्यकाऽव्याप्तेः तादृशाधिकरणतामात्रस्य निवेश्यतया विशिष्टाभाववति सत्तायाः सत्त्वेन तदभावविशिष्टबुद्धिवारणाय तदभावत्वेन वृत्तिर्न कल्प्यते। आत्मनि कालिकसंबन्धावच्छिन्नाकाशाभावाभावो नास्तीति प्रत्ययातिप्रसङ्गस्य गगनाभावीयकालिकसंबन्धावच्छिन्नाधिकरणताविरहादेव वारणसंभवात्। तत्र साध्याभावत्वेन वृत्त्यन्तरे मानाभाव इति

न्यायरत्नं।

वश्यकत्वात्समवायसंबन्धावच्छिन्नप्रमेयाभावाभावस्य सत्तास्वरूपत्वं वदता ग्रन्थकृता प्रतियोगित्वस्य प्रकृतलक्षणे स्वरूपसंबन्धस्यैवादरणीयत्वात्। अथैवमप्यभावत्वावच्छिन्नकालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावे दैशिकविशेषणतया साध्ये आत्मत्वादावव्याप्तिः। तत्र साध्यस्य यः कालिकसंबन्धावच्छिन्नाभावस्तस्य यो दैशिकविशेषणतासंबन्धावच्छिन्नाभावस्तस्य साध्यरूपतया दैशिकविशेषणताया अपि लक्षणघटकत्वात्। नच दर्शिताभावस्य साध्यरूपत्वेऽपि तदीयप्रतियोगिता न स्वनिष्ठा साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभावस्यैव स्वपदार्थत्वादिति वाच्यम्। साध्यतावच्छेदकसंबन्धावच्छिन्नप्रकृतसाध्याभावस्य निखिलाभावरूपतया कालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावनिष्ठप्रतियोगिताया अपि स्वनिष्ठत्वाक्षतेः। नच कालिकसंबन्धावच्छिन्नप्रकृतसाध्याभावस्य दैशिकविशेषणतया नित्यमात्रवृत्तितया सर्वदेशासंग्राहकत्वेन न तस्य साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभावत्वं कल्प्यते किंतु सर्वदेशसंग्राहकगगनाभावादीनाम्। व्यतिरेकिणस्तथात्वे निरुक्तसाध्याभावस्य कालिकाव्याप्यवृत्तितापत्तेरिति वाच्यम्। व्यतिरेकिणः कालिकसंबन्धावच्छिन्नप्रतियोगिताका-

---

१ साध्याभावस्य सत्तारूपतामते तस्य साध्यवद्वृत्तित्वाभावेनाव्याप्तिरतः साध्यवद्वृत्त्यधिकरणताकत्वस्यावश्यकतया कालवृत्तित्वविशिष्टगगनाभावाभावस्य साध्यसमनियतत्वेन साध्यात्मकतया कालवृत्तित्वविशिष्टगगनाभावस्य तदभावादात्मनः साध्यवद्वृत्त्यधिकरणता तस्याधिकरणे हेतुसत्वेन व्याप्तेस्तन्निवेशः। मै. पा.

कृष्णंभट्टीयं।

मतमवलम्ब्य स्वनिष्ठत्वस्य निवेशनीयत्वात्। एवं धर्मि[1]निवेशप्रकार ऊह्यः। नच साध्याभावाधिकरणतामेकधैव निवेश्य तत्र साध्यवदवृत्तित्वं निवेश[2]-नीयमिति वाच्यम्। तथा सत्यधिकरणभेदेन नानाधिकरणतानां भेदा-देव संयोगसाध्यकाव्याप्तिनिरासे संयोगाभावभेदमतानुधावनस्य निर्बीज-त्वापातात्।

इदं तु बोध्यम्। साध्यवद्भिन्नमात्रवृत्तित्वस्य प्रागावश्यकत्वमुक्तम्। तत्र साध्यवद्भिन्नमात्रवृत्तित्वं न साध्यवदवृत्तित्वम्। कालिकसंबन्धाव-च्छिन्नाकाशाभावाभावसाध्यके कालिकसंबन्धेन साध्यवद्वृत्तित्वाप्रसिध्या अव्याप्तेः। किंतु स्वव्यापकसाध्यवद्भिन्नत्वकत्वम्। एवंच महाकालमात्रवृ-त्तिविशेषणतासंबन्धेन प्रमेयसाध्यके साध्यतावच्छेदकसंबन्धेन साध्यवद्भे-दस्य कालिकसंबन्धेन साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नसाध्याभावसामा-नाधिकरण्येपि तदव्यापकत्वाद्दैशिकविशेषणतासंबन्धेन तद्व्यापकत्वाच्चोक्त-संबन्धेन स्वरूपसंबन्धेन वा द्रव्यवृत्तित्वविशिष्टाभावसाध्यके साध्यवद्भेद-स्योक्तसंबन्धेन तादृशसाध्याभाववद्वृत्तित्वेपि तदव्यापकत्वाद्विशेषणतासंब-न्धेन तद्व्यापकत्वाच्च। विषयितासंबन्धेन प्रमेयसाध्यके साध्यवद्भेदस्य कालिकसंबन्धेन साध्याभाववद्वृत्तित्वेपि तदव्यापकत्वात्। विशेषणतासंब-न्धेन तद्व्यापकत्वाच्च। कालिकसंबन्धावच्छिन्नगगनाभावाभावसाध्यके सा-ध्यवद्भेदस्य विशेषणतासंबन्धेन साध्याभाववद्वृत्तित्वेपि तदव्यापकत्वात्का-लिकविशेषणतासंबन्धेन तद्व्यापकत्वाच्च न पूर्वपक्षावसरः। एवंच स्वनिष्ठ-त्वनिवेशप्रयोजनं चिन्त्यमेव॥

न्यायरत्नं।

भावस्य केवलान्वयितया नित्यमात्रवृत्तिताया असिद्धेर्गगनाभावादिवत्तस्यापि सर्वदेशसंग्राहकत्वाविशेषात्साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभावत्वावश्य-कत्वादिति चेन्न। व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपविरुद्धधर्माध्यासादभावभेदवा-दिनां मते व्यतिरेकिप्रतियोगिककालिकसंबन्धावच्छिन्नाभावस्याधिकरणभेदेन भेदात्सर्वदेशसंग्राहकत्वासिद्धेरिति बहुतरमूहनीयम्॥

अथास्मिन्लक्षणे तादात्म्यसंबन्धेन घटसाध्यके घटत्वहेतावव्याप्तिः। तत्र साध्यीभूतघटनिरूपितघटभेदात्मकसाध्याभावनिष्ठप्रतियोगित्वाप्रसिद्धेः। घटभे-दाभावस्य घटत्वस्वरूपत्वात्। यदिच घटभेदाभावस्य घटत्वरूपत्ववद्घटस्वरूप-त्वमपि स्वीक्रियते तादात्म्यसंबन्धेन घटवत्ताया घटभेदाभावप्रतीतिनियामक-त्वाच्च नातिप्रसङ्ग इत्युच्यते, तदा घटभिन्नं घटत्वाभावादित्यादावव्याप्तिर्घटत्वा-त्मकसाध्याभावनिष्ठप्रतियोगितावच्छेदकसमवायसंबन्धेन घटत्वात्मकसाध्या-भावस्य साध्यवद्भिन्नवृत्तित्वात्तेन संबन्धेन घटात्मकसाध्याभावाधिकरणे कपाले

१ धर्म इ. मै. पाठः. २ निवेश्यम् इ. मै. पाठः.

योगितावच्छेदकसंबन्धत्वविरहेणाव्याप्तेरनवकाशात् । नच साध्यनिरूपितस्वनिष्ठप्रतियोगितानिवेशे साध्याभावपदोपादानवैयर्थ्यम् ।

कृष्णंभट्टीयं ।

[1] [इदं तु चिन्त्यम् । साध्यवद्भिन्नमात्रवृत्तित्वविवक्षणमसङ्गतम् । तथा सति अभावे साध्यीयत्ववैयर्थ्यात् । गगनाभावस्य प्रमेयत्वादेश्च तथात्वादिति । इदंत्ववधेयम् । साध्यवद्भिन्नत्वव्यापकाधिकरणताकत्वं सम्यक् साध्यीयत्वस्य सफलत्वसंभवात् । उक्तपूर्वपक्षव्युदासाच्च । एवंच स्वनिष्ठत्वमावश्यकमेवेति ।]

परेतु समवायेन सत्तान्यप्रमेयसाध्यकद्रव्यत्वप्रकारकप्रमाविषय[2]कहेतुकप्रभृतिस्थलसंग्रहाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नानुयोगिताकस्वनिष्ठप्रतियोगितेति विवक्षितम् । नचैवं स्वनिष्ठत्वं व्यर्थम् । कालिकसंबन्धावच्छिन्नाकाशाभावसाध्यके कालिकसंबन्धावच्छिन्नसाध्याभावाभावत्वस्य साध्यव्यापकतानवच्छेदकत्वादिति वाच्यम् । अवच्छिन्नत्वं व्यापकत्वम् । तथाच तादृशसाध्याभावाभावनिष्ठानुयोगितायाः साध्यव्यापकतावच्छेदकरूपव्यापकत्वेन तत्सार्थक्यात् । अन्यथातिरिक्तवृत्तिधर्मस्यावच्छेदकत्वाङ्गीकारे द्रव्यवृत्तित्वविशिष्टाभावसाध्यके यथोक्तसाध्याभावस्य यः कालिकसंबन्धावच्छिन्नाभावो नित्यद्रव्यमात्रवृत्तिस्तन्निष्ठतथाविधसाध्यतावच्छेदकावच्छिन्नानुयोगितामादायाव्याप्तेरिति । एवंच नित्यवृत्तित्वविशिष्टाभाववान्नित्यत्वादित्यादौ साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नाभावस्य यः कालिकसंबन्धावच्छिन्नाभावस्तन्निष्ठानुयोगितायाः साध्यव्यापकतावच्छेदकरूप[3]त्वात्तन्निरूपितप्रतियोगितावच्छेदककालिकसंबन्धेन साध्यवद्भिन्नवृत्तिसाध्याभाववति महाकाले हेतुसत्त्वेपि नाव्याप्तिरित्याहुः ।

वस्तुतस्तु विशिष्टसत्ताभावाभावो द्रव्यत्वमेव । कालवृत्तित्वविशिष्टाकाशाभावाभावः कालत्वाभावः । एवंच गगनाभावे कालिकसंबन्धावच्छिन्नैकप्रतियोगिता नतु दैशिकविशेषणतासंबन्धावच्छिन्नापि । कालत्वाभावीयप्रतियोगिताया गगनाभावेऽनङ्गीकारादिति स्वनिष्ठत्वनिवेशनमावश्यकं । धर्मनिवेशप्रकारः प्रागुक्तः । साध्यनिरूपितत्वं तु साध्यव्यापकतावच्छेदकतावच्छेदकानुयोगिताकत्वमिति न साध्यवद्भिन्नमात्रवृत्तित्वपर्यन्तनिवेश इति ([4]साध्याभावपदेति । साध्यांशनिवेशेत्यर्थः । एवं सति गगनाद्यभा-

न्यायरत्नं ।

हेतोर्वृत्तेः । यदि च साध्यनिरूपितयादृशसाध्याभावनिष्ठप्रतियोगितावच्छेदकयत्संबन्धेन साध्यवद्भिन्नवृत्तित्वं यादृशसाध्याभावस्य वर्तते तेन संबन्धेन

१ [] एतच्चिह्नान्तर्गतं वाक्यम् वा. पु. नास्ति.　२ विषयत्वम्. इति मै. पाठः.
३ रूपव्यापकत्वात् इति मै. पाठः.　४ () एतच्चिह्नांतर्गतं वाक्यं वा. पु. नास्ति.

अभावान्तरनिष्ठप्रतियोगितायाः साध्यनिरूपितत्वविरहेणैव तद्व्यावृत्ते-रिति वाच्यम् । स्वपदार्थस्य द्विधाऽनिवेशेन साध्याभावनिष्ठसाध्यी-

कृष्णंभट्टीयं ।

वस्य साध्यवद्भिन्नवृत्तित्वानुयोगितया ग्रहणापत्तिशङ्कां वारयति—अभा-वान्तरेति । साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नाभावभिन्नाभावेत्यर्थः ।)

(अभावान्तरेति । यद्यपि कालिकसंबन्धावच्छिन्नाकाशाभावाभावसा-ध्यके कालिकसंबन्धावच्छिन्नसाध्याभावान्तरनिष्ठप्रतियोगितायाः साध्यनि-रूपितत्वादसङ्गतिः[1] । तथापि[2] साध्यवद्भिन्नवृत्त्यभावे साध्यवत्त्वानुपादाने स्व-निष्ठेत्यत्र स्वपदार्थे यदि साध्यतावच्छेदकसंबन्धो न निवेश्यते तदा तादृशा-भावस्य स्वपदार्थत्वेपि तन्निष्ठप्रतियोगितावच्छेदकीभूते दैशिकविशेषणतासंब-न्धेन तस्य न साध्यवद्भिन्नवृत्तित्वसंभवः । अथ तन्निवेश्यते तादृशकालिकसं-बन्धेन काल एव तादृशाभावान्तरसत्त्वान्नाव्याप्तिरित्यभावान्तरेत्यस्य साध्य-तावच्छेदकधर्मावच्छिन्नाभावभिन्नाभावेत्यर्थात्, साध्यनिरूपितत्वेत्यस्याभा-वान्तरस्य साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नप्रतियोगिताकत्वेत्यर्थाद्वा ना-सङ्गतिः । स्वपदार्थस्येति । साध्यवद्भिन्नवृत्त्यभावे साध्यवत्तांशनिवेशवैय-र्थ्यमिति शङ्काभिप्रायेण एकत्रैव साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नाभाव-निवेशस्यैव प्रयोजनान्तरानुरोधेन स्वीकार्यत्वेपि समभिव्याहृतशब्दान्तरप्रति-पाद्यस्यैव स्वशब्देन परामर्शात्तादृशस्वनिष्ठप्रतियोगितावच्छेदकयत्संबन्धेन साध्यवद्भिन्नवृत्तित्वं साध्याभावस्येति तादृशसाध्याभावनिष्ठप्रतियोगिता-वच्छेदकसंबन्धेन तत् स्वस्येति वा निवेश्यम् । तथाचानायत्या संबन्धघ-टकतया साध्यवद्भिन्नवृत्तित्वानुयोगितया तादृशसाध्याभावो निवेशित एव । एवंच पुनः साध्यवत्तानिवेशप्रयोजनमनीषानुदयान्न तत्पदवैय-र्थ्यमिति) । नच[3] स्वपदेन साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नाभावोक्तेः तादृशकालिकविशेषणतासंबन्धेन काल एतादृशाभावान्तरसत्त्वान्नाव्याप्तिरिति वाच्यम् । एवं सत्यभावान्तरनिष्ठप्रतियोगितायाः साध्यनिरूपितत्वाभिधान-वैयर्थ्यात् । तथापि साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नाभावत्वविशिष्टनि-रूपितत्वस्यैवोक्तत्वात्तद्व्यावृत्तिरित्यभिमानः । वस्तुतः समभिव्याहृतशब्दा-न्तरप्रतिपाद्यस्यैव स्वपदेन परामर्शात्, साध्यनिरूपितस्वनिष्ठप्रतियोगिताव-च्छेदकयत्संबन्धेन साध्यवद्भिन्नवृत्तित्वमभावस्येत्युक्तौ उक्तस्थले स्वपदाभाव-पदाभ्यां कालिकसंबन्धावच्छिन्नसाध्याभावस्योपादाने तस्य व्याप्यवृत्तित्वे तथाविधदैशिकविशेषणतासंबन्धेन साध्यवद्भिन्नकालवृत्तित्वात्, अव्याप्यवृ-त्तित्वे च अधिकरणभेदेन तद्भेदात् हेतुमतः साध्यवद्भिन्नवृत्तितद्वत्त्वाभावाच्च

१ अस्त्येवेति. मै. पा. २ तथापीत्यादि वैयर्थ्यमिति पर्यन्तग्रन्थः मै. पु. नास्ति. सच प्रक्षिप्त इव च भाति. ३ नचेत्यारभ्य अङ्कान्तपर्यन्तं वा. पु. न दृश्यते.

कृष्णंभट्टीयं ।

न दोषः । एवंच साध्यप्रतियोगिकाभावस्य भावान्तरपदार्थत्वान्नासङ्गतिः । साध्यवद्भिन्ननिरूपितस्वनिष्ठप्रतियोगितावच्छेदकयत्संबन्धेन साध्यवद्भिन्नवृत्तित्वं साध्यतावच्छेदकावच्छिन्नाभावस्येत्युक्तौ साध्यनिरूपितसाध्यतावच्छेदकावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकयत्संबन्धेन साध्यवद्भिन्नवृत्तित्वं स्वस्येति नोक्तौ समवायाद्यवच्छिन्नवह्न्यभावमादायाव्याप्तिः । तस्य वह्न्यसमवाये कालिकाव्याप्यवृत्तित्वेपि ह्रदपर्वतयोः साध्यवद्भिन्नहेतुमतोः तदन्यस्यैव तस्य व्याप्यवृत्तेरेकत्वेन सत्वात् । एवं तत्र साध्यतावच्छेदकसंबन्धावच्छिन्नाभावं प्रवेश्योक्तौ महानसीयवह्न्यभावमादायाव्याप्तिः स्वपदेन तस्यैव लाभादिति साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नाभाव एव साध्यवद्भिन्नवृत्तित्वानुयोगितया प्रवेश्यः। तथाच संबन्धघटकतया स्वपदेन तस्यैव निवेश इति समाधत्ते—**स्वपदार्थस्येति** । एकत्र निरुक्तसाध्याभावत्वनिवेशे आवश्यके पुनस्तस्य स्वपदार्थतायां न प्रयोजनमनीषा भवति । यत्तत्पदयोरिवै-

न्यायरत्नं ।

तादृशसाध्याभाववत्त्वं निवेशनीयं समवायस्य घटात्मकसाध्याभावनिष्ठप्रतियोगितावच्छेदकत्वाभावान्न तमादायाव्याप्तिरित्युच्यते, तदा घटभेदस्य घटत्वाभावसमनियतत्वेन तदभिन्नत्वोपगमेन घटत्वस्य तत्प्रतियोगित्वव्यवस्थापनस्य निष्फलत्वापत्तिः । घटत्वस्य घटभेदप्रतियोगित्वाभावेऽपि घटात्मकसाध्याभावमादाय घटभेदसाध्यके पटत्वादौ लक्षणगमनसंभवादिति चेदत्र ब्रूमः । तादात्म्यसंबन्धेन घटस्य साध्यतास्थले घटतादात्म्यस्यैव साध्यत्वोपगमकर्तृप्राचीनमतेनैवैतत्परिष्कारकरणाद्घटभेदाभावस्य घटत्वमात्रस्वरूपत्वेऽपि क्षतिविरहात् । अस्तु वा तादात्म्यसंबन्धेन घटादेः साध्यत्वं तथापि न क्षतिः साध्यनिरूपितस्वनिष्ठप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छेदकसंबन्धस्यैव विवक्षणादित्यलं (पल्लवितेन) ॥

ननु साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबन्धेन साध्याभाववत्त्वनिवेशे लक्षणे साध्याभावपदवैयर्थ्यं तदनिवेशे स्वपदस्य साध्यवद्भिन्नवृत्तित्वरूपेण गगनाभावपरिचायकत्वप्रसक्तावपि गगनाभावादिनिष्ठप्रतियोगितायां साध्यनिरूपितत्वाभावेन साध्यानिरूपितप्रतियोगितायां गगनाभाववृत्तित्वाभावेन स्वनिष्ठसाध्यीयप्रतियोगितावच्छेदकसंबन्धरूपपरम्परासंबन्धघटकवृत्तित्वांशे गगनाभावप्रतियोगिकत्वाभावेन तादृशपरंपरायाः साध्याभावातिरिक्तवस्तुसंबन्धताया असंभवादिति स्वपदप्रयोगमूलकपरंपरासंबन्धविवक्षाभिमानेन शङ्कते—**नचेति** । दर्शितविशिष्टस्य साक्षात्संबन्धत्वमेव विवक्षितं नतु परंपरात्वमिति स्पष्टतया दर्शयितुं साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबन्धेन साध्याभाववत्त्वमित्यत्र द्विधानिविष्टसाध्याभावघटितवाक्यार्थं शब्दान्तरेणाभिधाय साध्याभाववत्वनिवेशसार्थक्यं स्पष्टयति—**स्वपदार्थस्य द्विधा निवेशेनेति** । साध्या-

यप्रतियोगितावच्छेदकसंबन्धेन साध्याभावत्वनिवेशध्रौव्येण तत्पदवैयर्थ्यानवकाशात्। तादृशसंबन्धेन साध्यवद्भिन्नवृत्तित्वमात्रनिवेशे साध्यवद्भिन्नवृत्त्यभावान्तरवति हेतोर्वृत्त्यानुपपत्तेश्चेत्याहुः॥

कृष्णंभट्टीयं।

कत्र निष्कासने अपरत्र निष्कासनस्य एकत्र प्रवेशे अपरत्र प्रवेशस्य च सिद्धेरिति न वैयर्थ्यशङ्कावकाश इत्यर्थः। एतेन साध्यवद्भिन्नमात्रवृत्तित्वनिवेशकल्पे साध्यतावच्छेदकधर्मसंबन्धावच्छिन्नप्रतियोगिताकत्वं व्यर्थं पृथिवीत्वाभावद्रव्यत्वाभावान्यतरस्य कालिकसंबन्धेन द्रव्यत्वाभावादेश्च साध्यतायां द्रव्यत्वात्मकसाध्याभावस्य साध्यवद्वृत्तित्वेन लक्षणया घटकतयाऽदोषादिति समाहितम्। संबन्धघटकतया यथोक्तसाध्याभावादन्यत्र साध्यवद्भिन्नमात्रवृत्तित्वानिर्वाहात्। एतेन साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वानुपादाने ([२]साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबन्धेनेत्यादिक्रमेण निवेशे स्वपदेन विशिष्यैकाभावनिवेशान्न महानसीयवह्न्यभावमादायाव्याप्तिः। किंतु) धूमवान्वह्नेरित्यादौ संयोगसंबन्धावच्छिन्नद्रव्यसामान्याभावमादायातिव्याप्तिस्तदभावस्य धूमादिरूपत्वात्। यदि च साध्यनिरूपितयद्यन्निष्ठप्रतियोगितावच्छेदकसंबन्धेन यस्य यस्य साध्यवद्भिन्नवृत्तित्वं तत्तदधिकरणवृत्तित्वाभावकूटं विवक्षितम्। अथवा स्वाश्रयनिष्ठसाध्यनिरूपितप्रतियोगितावच्छेदको यः स्वाश्रयनिष्ठसाध्यवद्भिन्नवृत्तिताया अवच्छेदकसंबन्धः तेन संबन्धेन साध्याभावत्वाश्रयाधिकरणवृत्तित्वा[३]भावः धूमाभावसाधारणं च साध्याभावत्वमित्यदोष इत्युच्यते तदा वह्निमान्धूमादित्यादौ महानसीयवह्न्यभावमादायाव्याप्तिरिति तदुपादानमावश्यकमिति कोलाहलोनादेयः। [४]साध्यवद्भिन्नवृत्तित्वानुयोगितावच्छेदकत्वेन साध्यस्य न निवेशः। किंतु स्वपदस्थाने निरुक्तसाध्याभावपदं योजयित्वा संबन्धघटकतयैव साध्याभावनिवेश इत्यत्राह—साध्येति। [[५]अत्र वह्निमान्धूमादित्यादौ स्वनिष्ठप्रतियोगितावच्छेदककालिकसंबन्धव्युदासाय साध्यनिरूपितत्वनिवेश इति ध्येयम्]। अथवा लक्षणे साध्याभावस्य स्वपदार्थत्वेन न निवेशः किंतु साध्याभावपदार्थत्वेनेत्यभिप्रेत्य समाधत्ते—स्वपदार्थस्येति। लक्षणं निरूपयति—साध्याभावनिष्ठेति। कुत इत्यत्राह—तादृशसंबन्धेनेति। अभावान्तरम्। गगनाभावसमवायावच्छिन्नवह्न्यभावमहानसीयवह्न्यभावादिः। अनुपपत्तेश्चेति चकारः प्रामादिकः। यद्वा तादृशसंबन्धो वह्न्यभावीयस्वरूपसंबन्ध एवेत्या-

न्यायरत्नं।

निरूपितेत्यादिसंबन्धघटकतया साध्यवद्भिन्नवृत्तिसाध्याभाववदवृत्तित्वस्वरूपलक्षणघटकतया चेत्यर्थः। निवेशेनेत्यन्तं निवेशध्रौव्ये हेतुस्तथाच साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबन्धरूपविशिष्टघटकवृत्तित्वांशे गगनाभावप्र-

---

१ केचित्तु इ. मै. पा. २ मै. पु. अधिकम्. ३ साध्याभावत्वम् इति मै. पाठः. ४ साध्याभावमनिवेश्य प्रकारान्तरेण निवेशे दूषणमाह—. ५ मै. पु. अधिकम्.

अत्रेदं बोध्यम् । साध्यवत्त्वग्रहविषयसंबन्धेन, साध्यनिरूपितप्रतियोगितावच्छेदकसंबन्धेन वा अनुमित्यौपयिकव्याप्तिशरीरे अभावत्वनिवेशेन संभवः[1] । साध्यादिभेदेन व्याप्तेर्भेदात् । लाघवेन तत्तत्साध्यकस्थले तत्तत्साध्याभाववति दैशिककालिकविशेषणता, समवायादिसंसर्गाणामेव विशिष्याभावसंबन्धतया निवेशौचित्यात् । उक्तरूपेण विशेषणताविशेषादीनां संबन्धता ., अत्यन्ताप्रामाणिकतया तद्रूपावच्छिन्नस्य संबन्धविधया व्याप्तिघटकत्वायोगाच्च । परंतु यादृशसाध्यकस्थले यादृशसंबन्धोऽभावसंबन्धतया व्याप्तिघटकस्त-

कृष्णंभट्टीयं ।

शङ्काशयः । विशेषणतासामान्यमिति उत्तराशयः] । अत्रेदमरुचिबीजमवसेयम् । विशेषरूपेण संबन्धत्वोपगमेऽपि निरवच्छिन्नविशेषणतासंबन्धावच्छिन्नकपिसंयोगाभावाभावः कपिसंयोगरूपो नोपगम्यते प्रयोजनाभावादिति आशङ्क्येत्येतदसङ्गतिः[2] । नच सिद्धान्ते यत्र साध्यवत्ताप्रमा(देर)प्रसिद्धिस्तत्र न संबन्धनिवेशसंभव इति वाच्यम् । भावाभावसाधारणविशेषणतानङ्गीकर्तॄणां तादृशस्थले [मानाभावात्[3] । अन्यादृशप्रतिबन्धकत्वस्य निवेशनीयत्वात् । धर्मितावच्छेदकतासंबन्धेन प्रतिबन्धकतापक्षे दोषाच्चेति ।]

न्यायरत्नं ।

तियोगिकत्वाभावेऽपि विशिष्टघटकविशेष्यांशे दैशिकविशेषणतारूपे गगनाभावप्रतियोगिकत्वस्याक्षततया साध्याभाववत्त्वानिवेशे गगनाभावमादायाव्याप्तिः स्यादेवेति भावः । वस्तुतस्तु परंपरासंबन्धनिवेशेऽपि समवायसंबन्धावच्छिन्नमहानसीयत्वावच्छिन्नाभावमादाय वह्निमान्धूमादित्यादावव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाभावनिवेश आवश्यक एवेति न साध्याभावपदवैयर्थ्यम् ॥

केचित्तु साध्यनिरूपितेत्यादि । साक्षात्संबन्धनिवेशेऽपि सध्याभावपदवैयर्थ्यं । तथाहि साध्याभाववत्त्वमनिवेश्य साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबन्धेन साध्यवद्भिन्नवृत्तिपदार्थवत्त्वमेव निवेश्यं । स्वपदस्य विशेष्यव्यक्तिपरत्वनियमेन यत्पदार्थव्यक्तिमत्त्वमुपपादनीयं सैव व्यक्तिः स्वपदेनोपादेया । तथाच गगनाभावव्यक्तेस्तन्निष्ठप्रतियोगिताव्यक्तेः साध्यनिरूपितत्वविरहेण स्वपदेनोपादानासंभवाद्गगनाभावमादायाव्याप्त्यप्रसक्तेरित्याशङ्कते—**नन्वेति** । लक्षणवाक्ये स्वपदं परित्यज्य साध्याभावपदमेव निवेश्यं । साध्याभावपदस्यतु विशेष्यव्यक्तिपरत्वनियमाभावादभावान्तरवारणाय साध्याभाववत्त्वनिवेश आवश्यक इत्याशयेन समाधानमाह—**स्वपदार्थस्येति** । स्वपदार्थत्वेन स्वपदार्थस्येत्यर्थ इत्याहुः ।

---

१ अभावसंबन्धनिवेशसंभवः इति मै. पाठः. २ त्यस्या इ. मै. पा. ३ मै. पु. अधिकम्.

त्परिचयायैव दर्शितोक्तयः । तथाच यादृशसंबन्धेन प्रकृतसाध्यवति तद्भिन्नवृत्तिसाध्याभावो न वर्तते तादृशसंबन्धेन तद्वत्त्वं निवेश्यमित्युक्त्यैव तत्परिचयसंभवादलं वाग्जालेन । साध्याभाववत्पदेन

कृष्णंभट्टीयं ।

मानाभावादिति। यादृशसंबन्धेनेत्यादि। इदं तु चिन्त्यम्। साध्यवद्भिन्नवृत्तिसाध्याभावसाध्यवन्निरूपितयादृशसंबन्धावच्छिन्नवृत्तित्वाभाववानिति

न्यायरत्नं ।

यादृशसंबन्धेन प्रकृतसाध्यवति तद्भिन्नवृत्तिसाध्याभावो न वर्तत इति । अथ यादृशसंबन्धेनेत्यस्य साध्यवन्निरूपितयत्संबन्धावच्छिन्नवृत्तित्वाभाववांस्तादृशाभाव इत्यर्थे सत्ताभावसाध्यके समवायासंग्रहः ! साध्यवन्निरूपिततत्संबन्धावच्छिन्नवृत्तेरप्रसिद्धेः । यदिच तादृशसाध्याभावनिष्ठसाध्यवन्निरूपितवृत्तित्वं यत्संबन्धानवच्छिन्नमित्यर्थस्तदाऽयमात्माज्ञानादित्यादौ साध्याभावे साध्यवद्वृत्तित्वाप्रसिद्धिः । यदिच साध्याभावनिष्ठयत्संबन्धावच्छिन्नवृत्तित्वं साध्यवदनिरूपितमित्यर्थस्तदा, विशिष्टसत्ताभावसाध्यके समवायासंग्रह इति चेन्न । यत्संबन्धावच्छिन्नतादृशसाध्याभावत्वविशिष्टाधिकरणत्वाभावः । साध्यवद्वृत्तिरित्येतादृशस्यार्थस्य विवक्षणान्न पूर्वोक्तदोषाणामवकाशः । साध्याभावत्वविशिष्टाधिकरणत्वाभावनिवेशान्न विशिष्टसत्ताभावसाध्यके समवायासंग्रहः । नचैवं विवक्षणेऽपि शब्दज्ञानान्यतरत्वसाध्यके नित्यज्ञानत्वहेतौ विषयितासंबन्धावच्छिन्नतादृशसाध्याभावत्वविशिष्टाधिकरणत्वाभावस्य साध्यवति शब्दे वृत्तेर्विषयितासंबन्धसंग्रहादव्याप्तिरिति वाच्यम् । साध्यवद्वृत्तिरित्यनेन साध्यव्यापक इति विवक्षणात् । नच तथाप्ययमात्मा शब्दज्ञानान्यतरस्मादित्यादौ कालिकसंबन्धावच्छिन्नतादृशसाध्याभावाधिकरणत्वाभावस्य साध्यव्यापकत्वात्कालिकसंबन्धमादायातिव्याप्तिः । एतेन शब्दज्ञानान्यतरत्वसाध्यके नित्यज्ञानत्वहेतौ विषयितासंबन्धव्यावर्तनाय यत्संबन्धावच्छिन्नाधेयतासंबन्धावच्छिन्नप्रतियोगिताकः प्रकृतसाध्यवतोऽत्यन्ताभावः साध्यवद्भिन्नवृत्तिसाध्याभावे वर्तते, यद्वा प्रकृतसाध्यवत्त्वावच्छिन्नानुयोगिताकभेदप्रतियोगितायां येन संबन्धेन तादृशसाध्याभावोऽवच्छेदकः, यद्वा यत्संबन्धावच्छिन्नतादृशसाध्याभावनिष्ठावच्छेदकताकप्रतियोगितासाध्यवति दैशिकविशेषणतया न वर्तते तेन संबन्धेनेति विवक्षणमप्यपास्तं । उक्तस्थले तादृशकालिकसंबन्धमादायातिव्याप्तेरिति वाच्यम् । साध्यवद्वृत्तिरित्यनेन साध्यव्यापकत्वे सति साध्यव्याप्यत्वस्य विवक्षणात् । साध्यव्याप्यत्वविवक्षणेनैव शब्दज्ञानान्यतरत्वसाध्यके विषयितासंबन्धव्यावर्तनेपि नित्यत्वसाध्यके महाकालमात्रवृत्तिहेतौ कालिकसंबन्धव्यावर्तनाय साध्यव्यापकत्वनिवेश आवश्यकः। **अत्रेदं बोध्यं**। निरुक्तसंबन्धपरिचायकरूपस्यापि व्यापकत्वव्याप्यत्वघटितत्वेन पूर्वनिरुक्तसंबन्धपरिचायकरूपापेक्षया ला-

साध्याभावत्वविशिष्टाधिकरणं विवक्षणीयम् । तेन गुणान्यत्वविशि-

कृष्णंभट्टीयं ।

नार्थः[1] । दर्शिताकाशाभावाभावसाध्यके समवायकालिकसंबन्धासंग्रहापत्तेः । साध्यवति तेन संबन्धेन वृत्तित्वाप्रसिद्धेः । साध्याभावस्य साध्यवद्वृत्तित्वं यत्संबन्धानवच्छेद्यमित्यपि नार्थः [आत्मत्वादि[2]साध्यके साध्याभावे साध्यवद्वृत्तित्वाप्रसिद्धेः । नच यत्संबन्धावच्छिन्नतादृशसाध्याभावनिष्ठाधेयत्वं साध्यपदनिरूपितमित्यर्थः ।] विशिष्टसत्ताभावसाध्यके समवायासंग्रहात् । नापि यत्संबन्धवच्छिन्नस्वाभावः साध्यतावच्छेदकसंबन्धेन साध्यव्यापक इत्यर्थः । साध्यसामानाधिकरण्योक्तौ सत्तादिसाध्यके कालिकसंबन्धसंग्रहापातात् । कपिसंयोगाभावाभावस्य व्यापकत्वार्थं व्यापकतायां प्रतियोगिवैयधिकरण्यमिति युक्तम् । कालिकसंबन्धावच्छिन्नवह्न्यभावाभावस्य केवलान्वयितया कालिक[संबन्ध]संग्रहप्रसङ्गात् । इतोऽपि लघोर्यत्संबन्धावच्छिन्नस्वाभावः साध्यमिति । केचित्तुकारैरेवोक्तत्वात् घटभेदघटत्वाभावयोर्भेदमनुरुध्य स्वयं साध्यवत्त्वेत्यादिप्रकारादरणात् । सत्तान्यप्रमेयसाध्यकस्थलानुरोधेन साध्यव्यापकनिरूपितप्रतियोगितायाः[3] निवेशेऽपि केचित्तुकारमतापरित्यागाच्च । अथ साध्यवद्भिन्नवृत्तिसाध्याभावस्य यत्संबन्धावच्छिन्नाधिकरणतासामान्यं साध्यवति नास्तीति निष्कर्षः । तेन सत्ताभावसाध्यके न दोषः । ह्रदनिष्ठकालिकसंबन्धावच्छिन्नाऽधिकरणतावारणाय सामान्यपदम् । विशिष्टसत्ताभावसाध्यकस्थले समवायसंग्रहाय साध्याभावत्वविशिष्टनिरूपितत्वं देयमिति चेत्, आत्माज्ञानादित्यादौ कालिकविषयितादिसंबन्धासंग्रहापत्तेः । तद्घटितस्य साध्यवत्ताग्रहविरोधिग्रहविषयसंबन्धेन साध्याभाववत्त्वघटितव्यभिचाराविरोधिनोऽव्यभिचारपदार्थत्वानौचित्यात् । आत्माज्ञानशब्दान्यतरस्मादित्यादौ दैशिकविशेषणताघटिताव्यभिचारित्वासत्वेपि कालिकादिघटिततदतिव्याप्तेर्दुर्वारत्वाच्च । [ए[4]तेन यत्संबन्धावच्छिन्नस्वाभावः साध्यव्यापक इत्यर्थः । साध्यसामानाधिकरण्योक्तौ सत्तादिसाध्यके कालिकसंबन्धसंग्रहप्रसङ्गः । कपिसंयोगाद्यभावाभावस्य साध्यव्यापकत्वार्थं व्यापकतायां प्रतियोगिवैयधिकरण्यं देयम् । एवं वह्न्यभावस्य कालिकसंबन्धावच्छिन्नाभावस्य केवलान्वयित्वेऽपि न कालिकसंबन्धसंग्रह इत्यपास्तमिति] गोमान्गोत्वादित्यादौ कालिकसंबन्धावच्छिन्नगवाभावस्य कालिकदैशिकविशेषणतासंबन्धावच्छिन्नाधिकरणतायाः साध्यवद्वृत्तित्वेन विषयतासंबन्धसंग्रहेण नातिव्याप्तेश्च, क्रियाप्रलययोरेव कालत्वात् । जन्यमात्रस्य तथात्वेतु तत्तत्साध्यकसद्धेतावव्याप्तिरिति । विशिष्टेति । विशिष्टाधिकरणतायां

---

१ येन संबन्धेन साध्यवद्वृत्त्यभिन्नस्वप्रतियोगीति. बा. पा. २ मै. पु. अधिकम्. ३ प्रतियोगितेत्याद्यभिप्रायाच. मै. पा. ४ ब. पु. अधिकम्.

ष्टसत्ताभाववान् गुणत्वादित्यादौ विशिष्टस्यानतिरिक्ततया सत्तारूपसाध्याभावस्य गुणादौ सत्वेपि न क्षतिः । गुणे गुणान्यत्वविशिष्टसत्ताभावो नास्तीत्यप्रत्ययात् । तत्र तादृशाभावत्वविशिष्टाधिकरण(त्वा)तानभ्युपगमात् । अथैतल्लक्षणे घटत्व-घटाकाशसंयोगान्यतराभाववान् आकाशत्वादित्यादावव्याप्तिः । घटत्वस्य व्याप्यवृत्तितया तद्घटितान्यतराभाववद्भिन्ने घटे वर्तमानस्य घटाकाशसंयोगात्मकसाध्याभावस्य हेत्वधिकरणे गगनेऽपि वृत्तेः । निरवच्छिन्ने साध्याभाववत्तानिवेशे च साध्यवद्भिन्नवृत्तित्वनिवेशवैयर्थ्यादिति चेन्न । एतल्लक्षणकर्तृमते स्वप्रतियोगिसामानाधिकरण्य-स्वप्रतियोगिवैयधिकरण्यरूपविरुद्धधर्माध्यासोऽभाव(स्य) भेदक इत्येतादृशयुक्तया द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धिरित्यव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्तिः समाधीयते । तथाच घटाकाशसंयोगस्य उक्तान्यतराभावप्रतियोगित्वेऽपि न तद्भावरूपता । तथासति तादृशविरुद्धधर्मयोः समावेशापत्तेः । तयोर्विरोधाभावे संयोगाभावस्यापि अधिकरणभेदेन भेदासिद्धेरव्याप्यवृत्तिसाध्यकस्थले सर्वत्रैवाव्याप्तेः । एतदभिप्रायेण लक्षणान्तरस्यावतरणीयत्वादिति गग(ने)नातिरिक्तएव तद्भावः स्वीकरणीयः । सच न साध्यवद्भिन्न-

कृष्णंभट्टीयं ।

साध्यवद्भिन्नवृत्तिसाध्याभावनिरूपितत्वनिवेशान्नाव्याप्यवृत्तिसाधकाव्याप्तिः । नन्वस्तु साध्यवद्भिन्नश्चासौ साध्याभाववांश्चेति कर्मधारये सामानाधिकरण्यसंबन्धेन साध्यवत्त्वनिवेशात्साध्यसमानाधिकरणान्यसाध्याभावाधिकरणतेत्यर्थः । तत्र सत्ताधिकरणतायाः साध्यसमानाधिकरणतया विशिष्टाधिकरणताया एव तदन्यत्वान्नाव्याप्तिरिति किं विशिष्टाधिकरणत्वविवक्षणेनेति चेन्न । तथा सति साध्याभावप्रवेशवैयर्थ्यात् । घटत्वेति । घटत्वघटाकाशसंयोगोभयाभावसाध्यके तु[1] साध्याभावत्वे साध्यवद्भिन्नवृत्तितावच्छेदकत्वं निवेश्याव्याप्तिवारणं सुकरमिति तन्नोक्तम् । निरवच्छिन्नेति । संयोगभिन्नं गुणत्वादित्यादावतिरिक्तस्य संयोगवत्प्रकारकप्रमाविषयत्वरूपस्य वा साध्याभावस्य प्रवेशान्नाव्याप्तिः । गगन इति । अयं च गगनघटसंयोगावच्छेदकदिगाद्यवच्छेदेन बोध्यः । साध्यवद्भिन्न इति । नच निरवच्छिन्नवृत्तिकसा-

---

१ साध्यवद्भिन्नाप्रसिद्धिः साध्यस्य केवलान्वयित्वादिति तन्नोक्तम्. मै. पा.

वृत्तिरिति न दोषः। साध्यवद्भिन्ने वर्तेत इत्यनेनानवच्छिन्नाया एव वृत्तेर्विवक्षणाद्घटाकाशसंयोगात्मकाभावमादाय न दोष इति तु न श्रद्धेयम्। तथासति सुषुप्त्यादिकालावच्छेदेन अस्मदाद्यात्मवृत्तौ स्वाश्रय(त्व)घटितसंबन्धावच्छिन्नप्रतियोगिताकज्ञानत्वाद्यभावे साध्ये सुखादावव्याप्तिः। तत्र साध्यवद्भिन्ने ईश्वरे तादृशसंबन्धेन निरवच्छिन्नवृत्तिकस्य ज्ञानत्वादिरूपाभावस्य तेन संबन्धेन सुखाद्यधिकरणे अस्मदाद्यात्मनि(अपि)वृत्तेः। उत्पत्तिकालावच्छिन्नघटादिवृत्तितादृशसंबन्धावच्छिन्नप्रतियोगिताकसत्ताभावादिसाध्यकघटत्वादिहेताव्याप्तिश्च। संयोगाभावनिष्ठयोः व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोः प्रतियोगिसामानाधिकरण्यप्रतियोगिवैयधिकरण्ययोः वक्ष्यमाणरीत्या न विरोध इति। **इति द्वितीयलक्षणम्॥**

कृष्णंभट्टीयं।

ध्याभावनिवेशेनैवाव्याप्यवृत्तिसाधकाव्याप्तिवारणात्साध्यवद्भिन्नीयत्वं व्यर्थमिति वाच्यम्। तत्परित्यागस्येष्टत्वात्। अथ स्वानाश्रयनिरवच्छिन्नवृत्तित्वानुयोगिताविशेषोभयसंबन्धेन साध्यवत्त्वमभावे निवेश्यमिति न वैयर्थ्यमिति चेन्न। संबन्धान्तरसहितानुयोगितायाः संबन्धत्वस्यादृष्टचरत्वात् निरवच्छिन्नवृत्तिकत्वमनुयोगिताविशेषोभयमात्रस्य संसर्गत्वेनोपपत्तेश्च। अन्यथा स्वानाश्रयत्वस्वाभावाश्रयत्वोभयसंबन्धेन साध्यवत्त्वस्याधिकरणनिवेशनसार्थक्यसंभवात्कर्मधारयनिराकरणानुपपत्तिरिति। **तथासतीति**। स्वमते च तादृशज्ञानत्वाभावरूपसाध्याभावस्य प्रतियोगिवैयधिकरण्याद्यध्यासेन ज्ञानत्वादिभिन्नतयाऽधिकरणभेदेन भिन्नत्वान्नाव्याप्तिः। ईश्वरे नित्यसुखाङ्गीकर्तृमते व्यभिचार इत्यतः सुखादावित्यादिपदम्। आदिना दुःखादिपरिग्रहः। **इति द्वितीयलक्षणम्।**

न्यायरत्नं।

घवाभावादलं वाग्जालेनेत्युक्तिर्विचारणीयैवेति। इत्यनेनेति। तदन्तवाक्येनेत्यर्थः। **अनवच्छिन्नवृत्तिकत्वरूपेति**। तथाच तादृशवृत्तित्वलाभायैव साध्यवद्भिन्नीयत्वं नतु लक्षणघटकमग्रे साध्यवद्भिन्ने ईश्वरे इतितु स्वरूपकीर्तनमात्रं। नतु तदंशस्य लक्षणघटकत्वाभिप्रायेण तादृशवृत्तित्वनिवेशे तदंशस्य व्यर्थत्वादिति ध्येयम्। **तथा सतीति**। स्वमते तादृशज्ञानत्वाभावाभावस्य विरुद्धधर्माध्यासभियाऽतिरिक्तत्वस्वीकारेणाधिकरणभेदेन भेदान्नाव्याप्तिरिति भावः।

---

१ निरवच्छिन्नवृत्तित्वरूपपर्यवसितार्थे तात्पर्यात् इति मै. पाठः. २ इत्यभिप्रायेण इति मै. पाठः. ३ साध्याभावस्य. मै. पा.

कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह—साध्यवदिति ।

अव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्त्या लक्षणान्तरमवतारयति ।

(अथ तृतीयलक्षणं) कर्मादाविति । इदंत्ववधेयम् । द्रव्यवृत्तिसंयोगाभावो गुणादौ न स्वीक्रियते । अपितु क्लृप्ततद्वृत्तिसंयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभावएव संयोगाभावत्वं कल्प्यते। अनन्तगुणाद्यधिकरणे संयोगाद्यभावकल्पनामपेक्ष्य तथाविध एकाभावे संयोगा(द्य)भावत्वकल्पने लाघवात् । नच संयोगवत्प्रकारकं प्रमाविषयत्वा(द्य)भावे द्रव्यत्वाद्यभावद्रव्यं भेदसंयोगिभेदादौ वा संयोगाभावत्वं कल्प्यते इत्यत्र विनिगमकाभाव इति वाच्यम् । तादृशाभावानां समनियततयाऽभेदात् । एवंच द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदः सप्राण एव। अथैवं द्रव्यत्वाभावादीनामप्यानन्त्यापत्तिः ।

कृष्णंभट्टीयं ।

दीधितिकारोक्तं मानाभावं खण्डयति—इदंत्विति । धर्मिणां अधिकरणभेदेन भिन्नत्वाभावादीनां । विनीति । विनिगमनाविरहेण संयोगाभावरूपधर्मिणोऽप्यनन्ताधिकरणवृत्तितयाऽतिरिक्तत्वमावश्यकम् । विनिगमनाविरहेण सिद्धं चेदुभयमेव सिद्ध्यतीति न्यायात् । तथाच मानाभावनिराकरणमात्रमिदम् । नत्वव्याप्त्युद्धारकशक्त्या[1] द्रव्यवृत्तिसंयोगाभावादन्यस्य तस्य गुणादौ विनिगमनाविरहेण सिद्धत्वादिति । [एतच्च[2] भिन्नत्व एव मानाभाव इत्यर्थमनालोच्योक्तम्] ।

[अथ तृतीयलक्षणम् ।] साध्यवत्प्रतियोगितेति मूलम् । अथोपक्रान्ताव्याप्यवृत्तिसाध्यके साध्यवद्घटादिभेदमादायाव्याप्त्यवारणात् संगतिः । नच यत्किंचित्साध्यवद्व्यक्तिकभेदनिवेशात्तत्र लक्षणसमन्वय इति वाच्यम् । तथासति व्यासज्यवृत्तिधर्मावच्छिन्नत्वरूपप्रतियोगिताविशेष-

न्यायरत्नं ।

ईश्वरे नित्यसुखाङ्गीकारे निरुक्तज्ञानत्वाभावे साध्ये सुखं व्यभिचारीति सत्ताभावसाध्यकस्थलान्तरानुसरणम् । इति द्वितीयलक्षणम् ।

[अथ तृतीयलक्षणम् ।] दीधितौ कर्मादाविति । गुणादाविति

---

१ अव्याप्तिरप्युद्धर्तुम् इ. मै. पा.　२ [] एतच्चिन्हान्तर्गतं मै. पु. प्रक्षिप्तं अधिकं दृश्यते.

कर्मादौ गुणवृत्तिद्रव्यत्वाभावो न कल्प्यते। अपितु क्लृप्ततद्वृत्तिद्रव्यगुणान्यतरत्वाभाव एव तदभावत्वमित्यादितर्कगवेषणया कर्मादिवृत्तिद्रव्यत्वाभावस्य गुणादिवृत्तितदभावतो भेदसिद्धिरिति चेदिष्टमेवैतदधिकरणभेदेनाभावभदवादिनाम्। नचैवं संयोगाभावत्वकल्पनायां धर्मिणामप्यानन्त्यात् उक्तविनिगमकाभावसंभव इति वाच्यम्। विनिगमनाविरहे(णा)पि द्रव्यत्वाभावादौ संयोगाद्यभावत्वकल्पनाया निष्प्रत्यूहत्वादिति। **इति तृतीयलक्षणम्।**

कृष्णंभट्टीयं।

णवैयर्थ्यात्। तर्कालङ्काराणां गगनादिपर्यन्तानुधावनस्य निर्बीजत्वात्। एवं तन्मते प्रतियोगिताविशेषणानभिधानात्। गगनादिभिन्ने कुत्रापि न लक्षणसमन्वय इति तादृशवृत्तिसद्धेतुत्वावच्छेदेनाव्याप्तिर्न पार्यते। नच तन्मते एतल्लक्षणे उभयाभावो नोपगम्यते। तदुपगमेनाव्याहत्यभिधानं च तदुपगमेऽपि क्वचिल्लक्षणमुपपादयितुं शक्यत इति भावेनेति वाच्यम्। अभावभेदे मानाभावमुपगम्य यथा परलक्षणमवतारितम्। तथोभयाभावमुपगम्य परावतारणासत्त्वादिति। मैवम्। एतत्कपिसंयोगि एतत्वादित्यादौ लक्षणसत्त्वादेव तादृशवृत्तिमद्धेतुत्वावच्छेदेन अव्याप्तिनियमभङ्गात्तर्कालङ्कारमते स्वव्याप्यवृत्तिसाध्यके लक्षणसमन्वयं विस्मृत्यैव इदं लक्षणं कृतमिति वक्तव्यम्। नचैवं दीधितिकृतां पक्षपदोपादानासंगतिः तेषां तस्योपलक्षणत्वात्। अथ साध्यवत्पक्षभेद एव लक्षणघटकः। तथाच कपिसंयोगि एतत्वादित्यादावव्याप्तिर्वार्यते। एतेन नानाधिकरणकहेतोरिति पूरणेन कपिसंयोगि एतत्वादित्यादावव्याहत्याः कथनान्न्यूनतेत्यपास्तम्। एवमपि तर्कालंकाराणां तद्विस्मरणमेव शरणं प्रतियोगिताविशेषणासत्त्वात्] वह्निमानेतद्धूमात् कपिसंयोगि एतत्वात् इत्यादावव्याहत्यभावादाह—**नानेति**। पूर्वक्षणावच्छिन्नैतद्रूपवन्नेद्वारणाय प्रतियोगीति।

न्यायरत्नं।

वक्तव्ये कर्मादाविति द्रव्यकर्मेति सूत्रानुसारिविभागापेक्षमिति ध्येयम्। **गादाधर्यां विनिगमनाविरहेपीति**। अथैवं कपिसंयोगाभावोऽधिकरणभेदाद्भिन्नोऽधिकरणभेदेप्यभिन्न इति सिद्धान्तवतां कपिसंयोग्येतद्वृक्षत्वादित्यादावव्याप्तिर्दुर्वारैव। नचाव्याप्तिखण्डने न तात्पर्यं, किंतु मानाभावादिति, पङ्क्त्यर्थदूषण एवेति वाच्यम्। यतस्तादृशपङ्क्त्यर्थोऽधिकरणभेदेनाभावभेद एव मानाभावस्तत्र दूषणं चाशक्यमिति चेन्न। यथा श्रुतग्रन्थार्थो न विवक्षितः। किंत्ववधारणागर्भ एवेति सूचयितुमधिकरणभेदेनाभावभेदो व्यवस्थापितः। वस्तुतस्तु साध्यवद्भिन्नवृत्तित्वस्थानेऽव्याप्यवृत्त्यनेकवृत्तियोऽभावस्तद्भिन्नत्वरूपविशेषणप्रक्षेपेऽव्याप्तिवारणमपि सुकरमित्यभिप्रेत्याधिकरणभेदेनाभावभेदो व्यवस्थापित इति हृदयम्॥

हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह—सकलेति । साकल्यं साध्याभाववति साध्ये च बोध्यम् ।

(अथ चतुर्थलक्षणं) हेतोरिति । नानाधिकरणकस्येत्यादिः । अव्याप्तिरिति । एतद्रूपवान् एतद्रसादित्यादौ । एतद्रसाधिकरणे एतद्रूपाधिकरणस्य द्वित्वादिनाभेदसत्वेपि व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन साध्यवन्निष्ठप्रतियोगितायाः प्रतियोग्यवृत्तित्वेन वा भेदस्य विशेषितत्वेन लक्षणगमनसंभवान्नासंभवो दर्शितः ।

साकल्यमिति । बोध्यमित्यस्य विशेषणमित्यादिः । अत्र सा-

कृष्णंभट्टीयं ।

स्वनिरूपितत्वस्वसामानाधिकरण्योभयसंबन्धेन प्रतियोगिताविशिष्टान्यत्वमर्थः । नच वह्निमद्भेदस्य स्वाभावरूपप्रतियोगिवृत्तित्वं तादात्म्यावच्छेद्यप्रतियोगितोपादानात् । नचोपक्रान्ताव्याप्यवृत्तिसाध्यकाव्याप्तिनिरासान्नेदं समञ्जसमिति वाच्यम् । एतत्कपिसंयोगवानेतत्वादित्यादौ प्रतियोगित्वादिविशेषणसत्वेन लक्षणसंगतेः । कपिसंयोगी एतत्वादित्यादौ कपिसंयोगवद्वृटादौ भेदमादायाव्याप्तावप्यव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेनाव्याप्तिशङ्कानिरासंभवात् । [इति तृतीयलक्षणम् ।]

[अथ चतुर्थलक्षणम् ।] दीधितौ साध्येचेति । ननु महानसीयवह्न्यादेरपि वह्न्यन्तरमादाय साकल्यवत्वात्तदभावमादायाव्याप्तिः। स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साकल्यस्य साध्याभावगामित्वे तु यावत्त्वावच्छिन्नाभावमादायाव्याप्तिः । नच साकल्योपादानात्साध्यतावच्छेदकव्यापकतावच्छेदकस्वप्रतियोगिताकत्वमर्थः । तेन प्रतियोगितायाः स्वरूपसंबन्धरूपत्वेऽपि न वह्न्याद्यभावासंग्रह इति वाच्यम् । तथा सत्येकव्यक्तिकं साध्यमि-

न्यायरत्नं ।

अत्रेदं चिन्त्यम् । प्रतियोगितासंसर्गककपिसंयोगत्वावच्छिन्नप्रकारप्रमां प्रतिगुणविधया स्वविषयकलौकिकप्रत्यक्षं प्रति विषयविधया च कपिसंयोगत्वावच्छिन्नाभावस्य तादात्म्यसंबन्धेन कारणत्वे कल्पनीयकारणतावच्छेदकत्वं यदि कपिसंयोगाभावत्वस्य तदा गौरवं स्यादिति कपिसंयोगाभावनिष्ठतद्व्यक्तित्वमेव कारणतावच्छेदकं वाच्यम् । तथाचाधिकरणभेदेनाभावभेदे तद्व्यक्तित्वस्य कारणतावच्छेदकत्वं न संभवतीत्यधिकरणभेदेप्यभावाभेद एव स्वीकर्तुमुचित इति । [इति तृतीयलक्षणम् ।]

---

१ एतदारभ्य दीधिताविलन्तं मै. पु. ना.

ध्याभाववति साकल्यविशेषणसत्वे एव साध्ये तद्विशेषणव्यावृत्तिः संगच्छते । अन्यथा साध्याभाववत्तायाः हेतुमत्साधारण्येऽपि साध्याभाववद्यत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगित्वमादाय नानाव्यक्तिसाध्यकसद्धेतौ लक्षणसमन्वयसंभवात् । अतः साध्ये तदभाववति चेत्यनुक्त्वा साध्याभाववति साकल्यं प्रथमतो दर्शितम् । नच साध्याभाववति साकल्यविशेषणासत्वेपि वह्निमान्पर्वतान्यत्वादित्यादावतिव्याप्तिवारणमेव साध्ये साकल्यप्रयोजनमस्ति । उभयत्र साकल्यविशेषणादाने यत्किंचित्साध्याभाववति पर्वते हेत्वभावसत्त्वेनातिव्याप्तिः । साध्ये साकल्यविशेषणसत्वे तु ह्रदादेरेव सकलसाध्याभाववत्तया तत्र हेतुसत्त्वेनातिव्याप्त्युद्धारादिति नोक्ताभिप्रायोपवर्णनं सम्यगिति वाच्यम् । साध्याभाववति साकल्यविशेषणासत्वेपि साध्ये साकल्यविशेषणस्य उक्तातिव्याप्तिवारणप्रयोजनकत्वसंभवेऽपि साकल्यविशेषणस्य वक्ष्यमाणप्रयोजनस्यैव वास्तव-

कृष्णंभट्टीयं ।

त्यादिना साध्ये साकल्याप्रसिद्ध्याभिधानासंगतिरिति चेन्न । कृत्स्नसाध्यपर्याप्तयावत्त्वं पर्याप्तिसंबन्धे न विशेषणम् । यद्वा साध्यतावच्छेदकसमानाधिकरणयावद्धर्मसमानाधिकरणानेकवृत्तिप्रतियोगिताकाभावः सकलसाध्याभावशब्दार्थः । अनेकवृत्तित्वंच स्वानुयोगिवृत्तित्वस्वानाश्रयत्वप्रतियोगिवृत्तित्वोभयसंबन्धेन भेदवत्त्वम् । तेन[1] द्रव्यत्वादेर्द्रव्यत्वघटत्वोभयभेदसत्वेपि न क्षतिः । स्वानाश्रयत्वनिवेशात्[2] । एवंच साध्यस्यैकत्वेऽपि साध्यतावच्छेदकीयतत्तत्क्षणावच्छिन्नानुयोगितानां नानात्वेऽपि अनेकत्वाभावात्तदप्रसिद्ध्यभिधानसंगतिः । साध्यतावच्छेदकव्यापकानेकवृत्तिप्रतियोगिताक इत्यपि कश्चित् । विधेयाविमर्शादाह—गादाधर्यां विशेषणमिति । यत्किंचिद्विपक्षव्यावर्तकमित्यर्थः । वास्तवत्वमावश्यकविशेषणान्तरासंपाद्यत्वं । एवंच गगनावृत्तिधर्मवान्द्रव्यत्वादित्यादौ, घटत्वादिलक्षणतत्तत्साध्याभाववद्गुणादिनिष्ठाभावप्रतियोगित्वेऽपि तत्प्रयोजनाभावस्य वास्तवतया वास्तवस्याव्याप्तिवारणरूपफलस्य साध्याभाववति साकल्यविशेषणं विनानुपपत्तिरित्याशयः ।

न्यायरत्नं ।

[**अथ चतुर्थलक्षणम्**] साकल्यं साध्याभाववति साध्ये च बोध्यमित्यत्र विधेयाविमर्शादाह—**बोध्यमित्यस्येति । वास्तवतयेति ।** वास्तवत्वमव-

१ मै. पु. ना. २ जात्यभाववारणाय साध्यपदं. मै. पु. अ.

कृष्णंभट्टीयं।

ननु साध्ये साकल्यस्य मुख्यप्रयोजनमायास्यत्येव। एतद्रूपगगनोभयवानेतद्व्यक्तित्वादित्यादौ प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्ध्या एतद्रूपगगनोभयाभावस्य लक्षणघटकतया एतद्रूपाभावमादायातिव्याप्तेर्विपक्षे साकल्यदानेनाशक्यवारणायाः[त] साध्ये साकल्यविशेषणेनैव वारणात्। तस्य सकलसाध्याप्रतियोगिकत्वात्। एतद्रूपगगनोभयाभावस्य प्रतियोगिवैयधिकरण्याभावात्[१]। नच प्रतियोगिवैयधिकरण्यघटकप्रतियोगितावच्छेदकवैशिष्ट्यस्य साध्यतावच्छेदकताघटकसंबन्धेन निवेशनीयतया पर्याप्तिसंबन्धेनैतद्रूपत्वविशिष्टासंभवादेतद्रूपाभावस्य लक्षणाघटकतया साध्ये साकल्यविशेषणासत्वेऽपि न क्षतिरिति वाच्यम्। तथाप्येतद्रूपरसोभयाभावमादायातिव्याप्तेर्दुर्वारत्वात्। नचैवमपि एतद्रूपगगनान्यतराभावमादायातिव्याप्तिर्दुर्वारैवेति वाच्यम्। अन्यतरत्वस्य प्रत्येकधर्मत्वेन तदवच्छिन्नाभावस्य सकलसाध्यनिष्ठप्रतियोगिताकत्वाभावात्। तस्यैतद्रूपाभावसमनियतत्वेन तत्र लाघवेनैतद्रूपत्वस्यैव प्रतियोगितावच्छेदकत्वोपगमाच्च। नच साध्ये साकल्यानुपादानेऽपि तत्रैतद्रूपवदवृत्तित्वावच्छिन्नाभावं तद्घटावृत्तित्वावच्छिन्नाभावं वादाय नातिव्याप्तिरिति वाच्यम्। एतद्रूपप्रतियोगित्वविशिष्टसमवायसंबन्धेन एतद्रूपगगनोभयसाध्यके एतद्रूपाभावस्यैव तादृशसंबन्धेन प्रतियोगिव्यधिकरणतया तमादायातिव्याप्तिवारणाय तदावश्यकत्वात्। विशेषरूपेण संसर्गत्वानुपगमेऽपि सत्तागगनोभयवान्घटत्वादित्यादौ, शुद्धसमवायेन साध्यतायां हेतावतिव्याप्तिवारकत्वेन विनापि साध्याभाववति साकल्यं तद्विशेषणस्यावश्यकत्वात्। साध्यतावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकवैशिष्ट्योक्तावपि सत्तान्य[२]समवेतोभयाभावमादायातिव्याप्तिरस्त्येव। वह्निधूमोभयाभाववदेतदभावस्य सर्वसंमतत्वात्। एवं द्रव्यत्वगगनोभयवान्घटादित्यादौ समवायेनैव साध्यत्वे साधनत्वे च द्रव्यत्वकपालोभयाभावमादायातिव्याप्तिर्द्रष्टव्या। एवं घटत्वप्रकारकप्रमाविशेष्यत्वीयस्वरूपसंबन्धेन घटत्वप्रकारकप्रमाविशेष्यत्वघटावृत्तिधर्मैतदुभयसाध्यघटत्वादावतिव्याप्तिवारणमपि साध्ये साकल्यस्य मुख्यप्रयोजनं। तथासति तत्रैतद्घटावृत्तित्वावच्छिन्नाभावादेर्लक्षणाघटकतया साध्यतावच्छेदकावच्छिन्नाभावस्य प्रतियोगिव्यधिकरणत्वाभावेन नातिव्याप्तिरिति चेत्। साध्ये साकल्यदानेऽपि गगनघटितोक्तोभयादिसाध्यके एतद्रूपवदव्यावृत्तित्वावच्छिन्नाभावस्य तद्घटावृत्तित्वावच्छिन्नाभावादेश्च घटत्वप्रकारकप्रमाविशेष्यत्वघटावृत्तिधर्मस्तदुभयसाध्यके साध्यतावच्छेदकसंबन्धेन प्रमेयसामान्याभावस्यैव सकलसाध्यनिष्ठप्रतियोगिताकतया तादृशाभावमादायातिव्याप्तिर्दुर्वारैवेति, अव्याप्तिवारणस्यैव वास्तवप्रयोजनत्वात्[३]।

१ विरहात्. इ. मै. पा. २-तदन्य. ३ साध्यतावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकवैशिष्ट्ये प्रवेशेतु तादृशावृत्तित्वविशिष्टोभयत्वावच्छिन्नाभावो बोध्यः। गुरुधर्मस्याप्यवच्छेदकत्वात् इ. मै. पु. अ.

तया तस्य साध्याभाववति साकल्यविशेषणसत्व एव संगतेरादौ तत्प्रदर्शनस्यैवोचितत्वात्।

वस्तुतस्तु साध्ये साकल्यविशेषणं परित्यज्य साध्याभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्व(निवेशन)रूपकल्पान्तरस्यावलम्बनीयतया चरममेव तत्प्रदर्शनमुचितम्। साध्ये तदभाववति च बोध्यमित्युक्त्वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको वा अभावो ग्राह्य इत्युक्तौ साध्याभाववति साकल्यं निवेश्यते साध्याभावो वा एतादृशो निवेश्यत इत्येतादृशविकल्पः प्रतीयेत। स चाविवक्षित इति सारम्॥

कृष्णंभट्टीयं।

केचित्तु गगनघटितोभयसाध्यके साध्यतावच्छेदकपर्याप्त्यधिकरणनिष्ठप्रतियोगिताकाभावस्यैव साध्याभावपदेन विवक्षिततया तथाविधोभयाभावमादायैव नातिव्याप्तिः। नच वक्ष्यमाणप्रतियोगिवैयधिकरण्यासंभवेन तथाविधोभयाभावस्यौपादानस्यैवासंभव इति वाच्यम्। अतिव्याप्तिवारकतया साध्ये साकल्यं व्यर्थीकुर्वतां योऽतिव्याप्तिवारणमार्गस्तस्यैवास्माभिरवलम्बितत्वात्। वस्तुतस्तु विपक्षे साकल्यासत्वे साध्याभावे प्रतियोगिवैयधिकरण्यं व्यर्थमिति। तथाविधोभयाभावस्य साध्याभाववत्त्वेन तमादाय नातिव्याप्तिरिति, साध्ये साकल्यस्य नातिव्याप्तिवारकत्वेनावश्यकता। तस्माद्विपक्षे साकल्ये दत्ते पश्चादतिव्याप्तिवारकतयैव साध्ये साकल्यविशेषणदानस्यौचित्यम्। अतिव्याप्तिवारकत्वेन प्रयोजनकत्वसंभवे अतिव्याप्तिवारकत्वे तत्तत्फलप्रदर्शनस्याकिंचित्करत्वात्। उक्तस्थले च, विपक्षे साकल्यदानोत्तरमव्याप्तिसंभावनायां प्रतियोगिवैयधिकरण्यप्रवेशात्तथाविधसाध्याभावप्रसिद्ध्यैव नातिव्याप्तिरिति पक्षएव प्राक् साकल्यनिवेशो दर्शित इत्याहुः।

अत्र साध्ये साकल्यविकल्पितसाध्यतावच्छेदकावच्छिन्नाभावदानकल्प एव गगनघटितोभयाभावसाध्यकेऽव्याप्तिवारक इति तत्कल्पयोरेव नैरन्तर्येण निवेश उचित इत्याशयेनाह—**वस्तुतस्त्विति**। **अविवक्षित इति**। एतत्पक्षे वह्निमान्पर्वतान्यत्वादित्यादौ दोषवारणाय साध्ये साकल्यस्योक्तावपि साध्यतावच्छेदकावच्छिन्नाभावप्रवेशपक्षे विपक्षे साकल्यासत्वादति-

न्यायरत्नं।

श्योपादेयविशेषणान्तरावारणीयप्रयोजनकत्वं। तथाच वह्निमान्पर्वतान्यत्वादित्यादौ यत्किंचिद्वह्न्यभाववति पर्वतादौ हेत्वभावसत्वेपि सकलसाध्याभाववन्निष्ठत्वाभावान्नेदं प्रयोजनं वास्तवमिति भावः। **तत्प्रदर्शनस्यैवोचितत्वादिति**।

अव्याप्तिवारणाय साध्याभावे साकल्यविशेषणे धूमवान्वह्नेरित्यादौ साध्यतावच्छेदकीभूतसंयोगसंबन्धावच्छिन्नप्रतियोगिताकसकलसाध्याभावाधिकरणं गुणादिरेव स्यात् । अयोगोलकादेर्ह्रदासंयुक्तत्वावच्छिन्नाभावाधिकरणत्वादित्यतिव्याप्तिः । वह्निमत्त्वप्रकारकप्रमाविषयो धूमादित्यादौ साध्यतावच्छेदकीभूतस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावस्य तत्तद्विपक्षमात्रवृत्तितया सकलसाध्याभावाधिकरणाप्रसिद्धा अव्याप्तिश्चेति तदुपेक्ष्य साध्ये साकल्यविशेषणं निवेशितम् । ननु साध्ये साकल्यविशेषणदानेऽपि वह्निमान्धूमादित्यादावव्याप्तितादवस्थ्यम् । पर्वतादावपि पर्वतीयवह्नेर्द्वित्वादिनाऽभावसत्वेन सकलसाध्याभावसत्वात् । व्या-

कृष्णंभट्टीयं ।

प्तेर्दुर्वारत्वादिति भावः । जगदीशेन तु साध्यविपक्षयोः साकल्यासत्वेऽपि साध्याभावे साकल्यान्नातिव्याप्तिरित्युक्तम् । तत्साध्यतावच्छेदकसंबन्धावच्छिन्नाभावप्रवेशे न संगच्छत इत्यतोऽव्याप्तिरित्युक्तम् । अव्याप्तिश्चेति । अत्र तत्तद्विपक्षावृत्तित्वादिरूपेण साध्याभावमादायासंभवः । गगनभिन्नं घटत्वादित्यादावपि तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावमादायैवाव्याप्तेः संभवादिति न साधु । साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभावनिवेशादिति सूचितम् । नच भवन्मते प्रतियोगितायां साध्यावच्छेदकसंबन्धानिवेशलाघवात्साध्यतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यस्यैव प्रवेशे स्वरूपसंबन्धेन तत्तद्गुणावृत्तीनां स्वरूपसंबन्धेनाभावघटितकूटाधिकरणाप्रसिद्धेर्जगदीशीयाऽतिव्याप्त्युद्धारः मथुरानाथीयोऽसंभवश्च संगच्छत एवेति वाच्यम् । कल्पद्वयमधिकृत्याव्याप्तेरेवास्माभिरभिधानाद्द्वित्वादिनेति

न्यायरत्नं ।

नन्वेतद्रूपगगनोभयवानेतद्रसादित्यादौ साध्ये साकल्यविशेषणनिवेशस्य वास्तवप्रयोजनं संभवति । तथाहि साध्ये साकल्यानिवेशे प्रतियोगिव्यधिकरणैतद्रूपत्वावच्छिन्नाभावमादायातिव्याप्तिः साध्याभाववति साकल्यविशेषणेपि दुर्घटा । तन्निवेशे च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसकलसाध्याभावाप्रसिद्ध्यैव नातिव्याप्तिरिति चेन्न । साध्ये साकल्यविशेषणदानेप्येतद्रूपगगनान्यतरत्वावच्छिन्नाभावमादायातिव्याप्तेर्दुर्वारतया साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यस्य हेतौ स्वतन्त्रविवक्षयाऽन्यथैव वा तत्रातिव्याप्तेर्वारणीयत्वात्तत्प्रयोजनस्य वास्तवत्वविरहात् । किंच निरुक्तसाध्यके एतद्रसवदवृत्तित्वावच्छिन्नाभावस्यापि साध्ये साकल्यविशेषणासत्वे लक्षणघटकतया साध्याभाववति साकल्यदानेना-

सज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिकत्वेनाभावविशेषणे वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिः। वह्निमतस्तथाविधसकलसाध्याभावानधिकरणत्वात्। साध्यतावच्छेदकातिरिक्तो यो व्यासज्यवृत्ति-

कृष्णंभट्टीयं।

पूर्वक्षणाद्यवच्छिन्नवह्न्याद्यभावस्य सकलसाध्याप्रतियोगिकत्वात्परित्यागः। तथाविधेति। अयःपिण्डान्यत्वविशिष्टवह्निधूमान्यतराभावस्तु न सकलसाध्याभावः। साध्यतावच्छेदकातिरिक्त इति[1]। साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नप्रतियोगिताकाभावनिवेशेऽतिरिक्तत्वेन बहूनां धर्माणां निवेशापत्तिरित्यतो व्यासज्यवृत्तिकत्वम्। यदि च तादृशातिरिक्तधर्मनिष्ठतावच्छेदकत्वसामान्याभावनिवेशेनैवानन्तधर्माप्रवेशात्तद्वैयर्थ्यमित्युच्यते, तदा प्रमेयवह्निमान्धूमादित्यादौ गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेन केवलवह्नित्वावच्छिन्नाभावसंग्रहाय तदुपादानमावश्यकम्। संयोगादिना प्रमेयवत्साध्यकस्थलानुरोधेन स्वानवच्छिन्नप्रकारतावच्छेदकत्वरूपस्वापर्याप्तविषयताश्रयत्वरूपस्य[2] वा साध्यतावच्छेदकान्यत्वं वाच्यम्। नन्वेवं प्रमेयवह्निधूमोभयवान्धूमादित्यादावगतिरेव वह्निधूमोभयत्वावच्छिन्नाभावस्य लक्षणाघटकत्वादिति चेन्न। तत्र केवलवह्नित्वावच्छिन्नाभावस्यैव लक्षणघटकत्वात्। नच कालिकसंबन्धेन वह्नित्वविशिष्टस्य साध्यत्वे शैवलादिरूपहेतौ समवायेन वह्नित्वविशिष्टाभावमादायाव्याप्तिवारणाय साध्ये साकल्यमावश्यकमिति कथमुक्ताभावो लक्षणघटक इति वाच्यम्। यत्र वह्निधूमोभयत्वं शुद्धस्वरूपसंबन्धेन साध्यतावच्छेदकं[2] तत्र पर्याप्तिसंबन्धेन वह्निधूमोभयत्वावच्छिन्नाभाववारणाय प्रतियोगिताया साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नावच्छेदकताकत्वस्यावश्यकतया तत एव समवायेन वह्नित्वविशिष्टाभाववारणसंभवात्, साध्ये साकल्यस्य व्यर्थत्वात्। नच[3] महानसीयवह्न्यभावादिवारणाय तत्र साकल्यमावश्यकम्। तादृश[4]संबन्धान्यसंबन्धावच्छिन्नावच्छेदकताकत्वाभावनिवेशेऽपि महानसीयसंयोगघटितमहानसीयवह्न्यभाववारणादिति वाच्यम्। साध्यतावच्छेदकतदितरवृत्त्यवच्छेदकताकत्वाभावस्यापि विशेषणत्वात्। वह्निधूमयोः संख्यान्योभयत्वस्य साध्यताव-

न्यायरत्नं।

प्यतिव्याप्तिवारणसंभवात्। **साध्यतावच्छेदकातिरिक्तो यो व्यासज्यवृत्तिधर्म इति।** अथात्र साध्यतावच्छेदकातिरिक्तो यो धर्मस्तदनवच्छिन्नप्रतियो-

---

१ एतत्कल्पे कालिकसंबन्धेन वह्नित्वविशिष्टसाध्याभावपरामर्शान्न समवायेन वह्नित्वविशिष्टस्यानुमितिवारणाय प्रतियोगितांशे यत्संबन्धावच्छिन्नावच्छेदकताकत्वं गृह्यते। साध्ये तेन संबन्धेन साध्यतावच्छेदकं भावनीयमिति बोध्यम्। मै. पु. अ.
२ रूपं वा इ. मै. पा. ३ वह्न्यादिर्हेतुः मै. पु. अ. ४ महानससंयोगघटित इ. मै. पु. अ. ५ इदं वाक्यं. मै. पु. ना.

साध्याभावो वा, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः। तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः।

धर्मस्तदनवच्छिन्नप्रतियोगिताकत्वनिवेशनेच लाघवात्। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैवाभावे निवेशनमुचितम्। किं साध्ये साकल्यविशेषणेनेत्यभिप्रेत्य तथैवाह—**साध्यतावच्छेदकेति**। साध्याभाववति साकल्यविशेषणप्रयोजनमाह—**विपक्षेति**। वैकल्पिकयोः साध्यतदभावयोः साकल्यसाध्यतावच्छेदकावच्छिन्नप्रति-

कृष्णंभट्टीयं।

च्छेदकत्वे तु वह्नित्वप्रकारकप्र[1]मा विशेष्यत्वाभावः सुलभो बोध्यः। लाघवादिति। अथ गुरुधर्मेण साध्यतास्थलानुरोधेन प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावस्य वाच्यतया कथं लाघवमिति चेन्न। व्यासज्यवृत्तित्वं विहाय साध्यतावच्छेदकापर्याप्तावच्छेदकताकत्वसामान्याभाववत्प्रतियोगिताकत्वमेव निवेश्यम्। साध्यतावच्छेदकापर्याप्तविषयताश्रयव्यासज्यवृत्तिधर्मावच्छिन्नत्वसामान्याभाववत्प्रतियोगिताकत्वनिवेशे तदपर्याप्तव्यासज्यवृत्तिधर्मनिष्ठावच्छेदकताघटितविशेषणनिवेशे च महागौरवात्। पृथक् साध्यताघटकसंबन्धावच्छिन्नावच्छेदकताकत्वविशेषणावश्यकतापत्त्या गौरवाच्च। एवंच गुरुधर्मेण साध्यतास्थलानुरोधेनात्रापि पारिभाषिकं साध्यतावच्छेदकमेव निवेश्यम्। प्रमेयवह्निधूमोभयसाध्यके च वह्निधूमोभयाभाव एव लक्षणघटकः। ए[2]वं साध्ये साकल्यमप्यावश्यकम्। नच साध्यव्यापकतावच्छेदकताप्रतियोगितावच्छेदकयोरेकसंबन्धावच्छिन्नत्वनिवेशान्न कालिकसंबन्धेन वह्नित्वावच्छिन्नसाध्यके समवायेन वह्नित्वविशिष्टाभावसंग्रहप्र[3]संगादिति वाच्यम्। सिद्धमन्नमिति न्यायेन साध्ये साकल्यस्यैवाभिधानात्। एवंच लाघवोक्तिसंगतिः। य[4]त्संबन्धावच्छिन्नावच्छेदकत्वं सकलसाध्यनिष्ठप्रतियोगितांशे गृह्यते तेन संबन्धेन साध्यांशे साध्यतावच्छेदकं भासत इति नियमेन कालिकसंबन्धेव वह्नित्वविशिष्टाभावपरामर्शान्न वह्नित्वसमवायावच्छिन्नावच्छेदकताकविधेयताशाल्यनुमित्यापत्तिरिति। एतेन [व्यासज्यवृत्तित्वनिवेशेन] प्रमेयवह्निधूमोभयसाध्यकेऽगतिरेव। किंच व्यासज्यवृत्तित्वं गुरुधर्मस्यानवच्छेदकत्वमते, लाघवं तु तस्यावच्छेदकत्वमत

---

१ प्रमीय. इ. मै. पा. २ कालिकसंबन्धेन वह्नित्वावच्छिन्नसाध्यके समवायेन वह्नित्वावच्छिन्नाभाववारणाय. इ. मै. पु. अ. ३ प्रसंग इति. मै. पा. ४ समग्रं वाक्यमिदं मै. पु. ना.

नवा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः ।

योगिताकत्वविशेषणयोर्व्यावृत्तिमाह—**नवेति** । **एकव्यक्तिके** एतद्रूपवानेतद्रसादित्यादौ हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टसाध्याभावो न प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः । पूर्वक्षणवृत्तित्वविशिष्ट एतद्रूपादेरेतद्रसाधिकरणे वृत्तेः । एतद्रूपतद्रूपोभयत्वावच्छिन्नाभावोऽपि न तथा । प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्धेः । तत्र लक्षणसंगतेरित्यतो नानाव्यक्तिकेत्युक्तम् ।

कृष्णंभट्टीयं ।

इति संदर्भविरोध इत्यपाकृतमिति विभावनीयम् । (यद्वा व्यासज्यवृत्तित्वनिवेशकल्पे साध्यतावच्छेदकं पारिभाषिकं न गुरुधर्मश्चावच्छेदकः । व्यासज्यवृत्तित्वं चाखण्डाभावघटकं साकल्यनिवेशार्थमेव । अन्यथा तद्वत्यभाववारणात्तद्वैयर्थ्यं । एवंच साकल्यव्यासज्यवृत्तित्वनन्द्वयनिवेशपक्षे लाघवोक्तिः ।) अतएव प्रतियोगिवैयधिकरण्यविशिष्टसाध्याभावघटितलक्षणस्य तत्राव्याप्त्यभावादेव । नाना अनेका, व्यक्तिराश्रयो यस्येति, व्यु-

न्यायरत्नं ।

गितानिवेशेनैवोपपत्तौ व्यासज्यवृत्तित्वनिवेशो व्यर्थ इति चेन्न । व्यासज्यवृत्तित्वानिवेशे साध्यतावच्छेदकातिरिक्तत्वेन बहूनां धर्माणां निवेशे गौरवापत्तिरतो धर्मसङ्कोचार्थं तन्निवेशः । यदि च साध्यतावच्छेदकातिरिक्तधर्मनिष्ठावच्छेदकत्वनिरूपकत्वसामान्याभावनिवेशान्न बहुधर्मनिवेशापत्तिरिति विभाव्यते, तदाखण्डाभावसंपादकत्वेन न व्यासज्यवृत्तित्वनिवेशवैयर्थ्यम् । नच व्यासज्यवृत्तित्वाघटितस्य लक्षणस्य संभवे तद्घटितगुरुलक्षणारम्भोऽन्याय्य इति वाच्यम् । साध्ये साकल्यस्य मूलोक्तस्य सार्थक्यायैव तद्घटितलक्षणादरात् । यत्तु व्यासज्यवृत्तित्वं विहाय निरुक्तसामान्याभावनिवेशे प्रमेयवह्निमान्धूमादित्यादावगतिस्तत्र प्रमेयवह्नित्वस्य गुरुतयाऽनवच्छेदकत्वेन वह्निसामान्याभावस्यैव लक्षणघटकत्वं वक्तव्यं, तत्तु न घटते तदीयप्रतियोगितायां साध्यतावच्छेदकातिरिक्तवह्नित्वावच्छिन्नत्वादिति तदसत् । गुरुधर्मावच्छिन्नसाध्यकहेतोर्हेतुतावच्छेदकसंबन्धानुयोगिनिष्ठाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदककत्वरूपकेवलान्वयिसाध्यकत्वेन तत्राव्याप्तेरिष्टत्वस्यासकृदावेदितत्वात् । गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे तदवच्छिन्नसाध्यकानुमानमेव नास्तीत्यभिप्रायस्य वक्तुं शक्यत्वाच्च । अतएव लाघवेन साध्यतावच्छेदकावच्छिन्नाभावनिवेशौचित्यवर्णनं सङ्गच्छते । अन्यथा तथानिवेशे गुरुधर्मावच्छिन्नसाध्यकाव्याप्तेरपरिहारात्साध्यतावच्छेदकावच्छिन्नेत्यनेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नत्वस्यैव विवक्षणीयतया लाघवानवकाशादिति दिक् । **तत्र लक्षणसङ्गतेरिति** । अथ तत्र

---

१ मै. पु. अ.

अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेः । व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणायाभावद्वये प्रतियोगिवैयधिकरण्यं बोध्यम् ।

अत एवाव्याप्तिरेवोक्ता नासंभवः । अत्रच नानाव्यक्तिसाध्यकत्वं व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वम् । अतएव एत(द्व्यक्तिव) द्वृत्तियावद्धर्मवानेतत्वादित्यादौ नानाव्यक्तिसाध्यकेऽव्याप्तिविरहेऽपि न क्षतिः । **अव्याप्यवृत्तीति** । कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थः । अव्याप्तेर्वारणायेत्यन्वयः । **व्यभिचारिणि चेति** । [1]एतद्वृक्षत्ववान्कपिसंयोगादित्यादावित्यर्थः । **अभावद्वये** साध्याभावे हेत्वभावे च । तथाचाव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्वारणाय साध्याभावे व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणाय

कृष्णंभट्टीयं ।

त्पत्त्या नानाधिकरणत्वलाभेऽपि, द्रव्यत्वसाध्यके सद्धेतावव्याह्यभावात् । साध्य एव नानात्वदाने शब्दवान् गगनत्वादित्यादौ, उभयत्रापि तद्दाने, सत्ता द्रव्यत्वपृथिवीत्वान्यतमवान्पृथिवीत्वादित्यादौ, तदभावस्यावच्छेदेनान्वयव्याघातः स्यादित्यत आह—**व्यधिकरणद्वयेति** । यत्किंचित्साध्यानधिकरणवृत्तित्वं साध्याधिकरणीभूतयत्किंचिद्व्यक्त्यवृत्तित्वं वा । यदि [2]व्यधिकरणद्वयवृत्तित्वं तदा शब्दवान् गगनत्वादित्यादौ नाव्याप्तिरत आह—**एतद्वृत्तीति** । नन्वेतद्दोषवारणाय व्यधिकरणद्वयवृत्तित्वं यत्किंचित्साध्यासमानाधिकरणवृत्तित्वमुच्यते तदोक्तान्यतमसाध्यकपृथिवीजलान्यतरत्वादिहेतुक एवोद्देश्यतावच्छेदकशून्ये विधेयसत्वान्न्यूनतेति चेत्तर्हीदृशरीतिं परित्यज्य हेत्वधिकरणयत्किंचिद्व्यक्त्य[3]वृत्तिरूपं साध्य एव नानात्वं निवे[4]श्यम् । वस्तुतस्तु यत्किंचित्साध्यानधिकरणहेत्वधिकरणवृत्तिसाध्यवृत्तित्वमर्थ इति न कोऽपि दोषः । एतेन व्यधिकरणद्वयवृत्तित्वं चेद्यत्किंचित्साध्यानधिकरणवृत्तित्वं तदा द्रव्यत्वपृथिवीत्वसत्तान्यतमसाध्यकपृथिवीत्वादेः संग्रहापत्तिः । परस्परानधिकरणवृत्तित्वं परस्परानधिकरणवृत्तिपरस्परवृत्तित्वं चेत्तदा द्रव्यत्वपृथिवीत्वान्यतरवान्द्रव्यत्वादित्यादावव्याप्तिसंभवेन तदकथने न न्यूनतेति प्रत्युक्तम् ।

अत्रेदं बोध्यम् । नानाधिकरणसाध्यके इत्येव ज्यायः । न चैवं सत्ता द्रव्यत्वपृथि[5]वीत्वान्यतरवान्द्रव्यत्वादित्यादावव्याप्तिसत्वादसङ्गतिरिति वाच्यम् ।

---

१ पृथिवीकपिसंयोगात् इत्यादौ चेत्यर्थः इति का. पाठः. २ यदि नानाव्यक्तिकत्वं. मै. पा. ३ वृत्तित्व इ. मै. पा. ४ श्यताम् इ. मै. पा. ५ पृथिवीत्वाद्यन्यतमवान् इ. क्वचित्. पा.

हेत्वभावे प्रतियोगिवैयधिकरण्यमित्यर्थः। यद्यपि हेत्वभावे प्रतियोगिवैयधिकरण्यविशेषणस्यावश्यकतया कपिसंयोगी कपिविभागादित्याद्यव्याप्यवृत्तिहेतुकेऽप्यव्याप्तिवारणप्रयोजनकत्वं साध्याभावे तद्विशेषणस्य संभवतीति व्याप्यवृत्तीत्यकिंचित्करम्। तथापि हेत्वभावे तद्विशेषणप्रतिसंधानं विनैव व्याप्यवृत्तिहेतुकस्थलेऽव्याप्तिनिर्णयो भवतीत्येतदभिसन्धायैव तदुक्तम्। प्रतियोगिवैयधिकरण्यं च न प्रतियोग्यधिकरणावृत्तित्वं। अव्याप्यवृत्तिसाध्यके तथाविधहेतुके च तादृशसाध्याभावहेत्वभावाप्रसिद्ध्याऽव्याप्तेः। अपितु प्रतियोग्यनधिकरणवृत्तित्वं। तथाच प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरणेषु यावत्सु प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः सन्वर्तते योऽभावस्तत्प्रतियोगित्वमर्थः। तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितकपिसंयोगाद्यभावस्य हेत्वधिकरणे सत्वेऽपि नाव्याप्तिः। नवा एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ तथाविधकपिसंयोगाद्यभावस्य हेत्वधि-

कृष्णंभट्टीयं।

तदधिकरणवृत्तित्वविशिष्टसाध्याभावमादायाव्याप्तेः। एतेन परस्परव्याप्यव्यापकभावानापन्नत्वं साध्यविशेषणमपि प्रत्युक्तं। रूपवान्पृथिवीत्वादित्यादौ कस्यापि रूपव्यक्तेर्नानाधिकरणकत्वाभावेपि नानाधिकरणवृत्तितावच्छेदकसाध्यतावच्छेदकस्थल इत्यर्थान्नाव्याप्तिः। द्रव्यं पृथिवीत्वादित्यादौ च विशिष्टाभावादिकमादायाव्याप्तिसंभवान्नावच्छेदेनान्वयव्याघात इति।

एतद्वृक्षत्ववानिति। एतत्त्वप्रयोजनं चिन्त्यम्। वृक्षवृत्त्येतत्त्वं वा सा[2]ध्यतावच्छेदकम्। अत्र विशिष्टाधिकरणतानिवेशे गौरवम्। एवंच विशिष्टस[3]त्ताया नातिरिक्तत्वे नाव्याप्यवृत्तिव्यभिचारिण्यतिव्याप्तेश्चेत्यत आह— प्रतियोगीति। ननु [स्व]प्रतियोगित्वेन साध्योपादानं व्यर्थं साध्यानधिकरणत्वनिवेशे तु साध्याभावाधिकरणत्वं व्यर्थमिति चेन्न। इदानीं मूलानुरोधेन साध्याभावाधिकरणतायां स्वनिरूपकाभावीयत्व–स्वावच्छेदकावच्छि-

न्यायरत्नं।

रूपघटोभयाभावस्य प्रतियोगिव्यधिकरणस्य संभवाद्भवत्येवाव्याप्तिरिति चेन्न। घटत्वस्यैव तादृशाभावप्रतियोगितावच्छेदकत्वसंभवात्तादृशोभयत्वावच्छिन्नप्रतियोगिताकाभावस्य गुरुधर्मावच्छिन्नप्रतियोगिताकतयाऽप्रसिद्धत्वादित्याशयात्।

१ साध्याभावाधिकरणे इति का. पाठः. २ साध्यं. इ. मै. पा. ३ आधेयतया.इ. मै. पा.

करणे सत्वेऽप्यतिव्याप्तिः । प्रतियोग्यनधिकरणीभूतसाध्याभावाधिकरणयावन्निष्ठस्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलितोऽर्थः। प्रथमे साध्यतावच्छेदकसंबन्धेन चरमे हेतुतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वं बोध्यम् । तेनायमात्मा आत्ममहाकालान्यतरत्वादित्यादौ व्यभिचारनिरूपकाधिकरणस्य कालस्य कालिकसंबन्धेन [1]साध्याधिकरणत्वेऽपि नातिव्याप्तिः। नवा वह्निमान्धूमादित्यादौ साध्याभावाधिकरणयावदन्तर्गतकालज्ञानादिषु कालि-

कृष्णंभट्टीयं ।

त्वसामानाधिकरण्य–उभयसंबन्धेन प्रतियोगिताविशिष्टान्यत्वस्याभिप्रे[2]तत्वेन घटाभावादिवारणाय साध्याभावनिवेशस्यावश्यकत्वात् । पश्चात्तु प्रकृतसाध्यानधिकरणत्वं[3]स्य स्वयमभिधानीयं[4]त्वादिति । यद्वा[5] साध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणेत्यभावाधिकरणान्तार्थः । साध्याभावनिष्ठप्रतियोग्यनधिकरणवृत्तितानिरूपकं यद्यावत्तन्निष्ठस्वप्रतियोग्यनधिकरणवृत्तितानिरूपकताकाभावप्रतियोगित्वोक्तावगौरवमेव द्रष्टव्यम् । **आत्मेति** । नच साध्ये साकल्याप्रसिद्धिः । ज्ञानस्यैव साध्यत्वात् । [[6]नचैवं सर्वस्यापि विषयितासंबन्धेन ज्ञानवत्त्वाददोषः। जन्यज्ञानविशेषस्यैव साध्यत्वात्] एवंच जन्यज्ञानरूपप्रतियोग्यनधिकरणे महाप्रलये कालात्मान्यतरत्वरूपहेतोः सत्वेनातिप्रसङ्गो नास्तीति । **महेति** । एतेनात्मत्वे साध्ये संबन्धसामान्येन प्रतियोग्यनधिकरणं गगनादिकमेव स्यान्नतु महाप्रलयः । तत्रापि कालिकसंबन्धेनात्मत्वसत्वात् । तत्र च हेत्वभावसत्वं नातिप्रसङ्ग-

न्यायरत्नं ।

यद्वा साध्यवद्भिन्नवृत्तितावच्छेदकधर्मावच्छिन्नत्वाभावस्य साध्यनिष्ठप्रतियोगितायां निवेशे तत्र लक्षणसमन्वयसंभवादित्यभिप्रायः । **साध्याभावाधिकरणयावन्निष्ठस्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलितार्थ इति** । यद्यप्युक्तफलितार्थे हेत्वभावे सकलसाध्याभाववन्निष्ठत्वविशेषणाप्रवेशान्निर्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादौ दीधितिकृता वक्ष्यमाणा व्याप्त्यसङ्गतिः । तथापि यथाश्रुताभिप्रायेण स्वप्रतियोग्यनधिकरणतावद्यावत्साध्याभाववन्निष्ठाभावप्रतियोगित्वमिति किंचित्परिष्काराभिप्रायेण वा वक्ष्यमाणाव्याप्तिः सङ्गमनीया । **आत्ममहाकालेति** । अत्र महत्पदानुपादाने धूम-

---

१ आत्मत्वाधिकरणत्वेऽपि इति का. पाठः. २ यथाश्रुतस्यैव वा मै. पु. अधिकम्. ३ करणत्वं इ. मै. पा. ४ धानीयम्. इ. मै. पा. ५ वस्तुतस्तु. मै. पा. ६ मै. पु. अ.

हेत्वभावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिक-

कविषयित्वादिसंबन्धेन हेत्वभावप्रतियोग्यधिकरणतासत्वेऽपि असंभवः अव्याप्तिर्वा। इत्थंच प्रतियोगित्वे संबन्धविशेषावच्छिन्नत्वे न विशेषणीये। संबन्धान्तरावच्छिन्नप्रतियोगिताकयोः साध्याभावहेत्वभावयोरुक्तसंबन्धेन प्रतियोगिसमानाधिकरणतया असंभवातिव्याप्त्योरनवकाशात्। हेत्वभावोऽपीति। अपिशब्देन साध्याभावेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यं निवेशनीयमिति सूचितम्[१]। तेन विशिष्टसत्तावान् जातेरित्यादौ हेत्वधिकरणगुणादिषु साध्याभावप्रतियोगिसत्वादेः सत्वेऽपि नातिव्याप्तिः। अत्र साध्याभावोऽपीत्युक्तौ अग्रिमतत्पदेन हेत्वभावपरामर्शासंभवः। तत्र हेत्व-

कृष्णंभट्टीयं।

संगतेर्महत्पदं व्यर्थमित्यपास्तम्। असंभव इति। आत्मभिन्न आत्मावृत्तिधर्मवान्वा, मनस्त्वादित्यादावपि एककालीनत्वैकज्ञानविषयत्वयोः संसर्गोपगमे साध्याभाववत्यात्मनि तेन संबन्धेन हेत्वभावप्रतियोग्यधिकरणतासत्त्वादव्याप्तेः। तयोः संसर्गत्वानुपगमे तु न तत्राव्याप्तिः। आत्मनः कालिकसंबन्धेन मनस्त्वानधिकरणत्वादित्यव्याप्तिर्वेत्युक्तम्। अत्र प्रसिद्धानुमानेऽपि समवायावच्छिन्नवह्न्यभावादिकमादायासंभवः। एवं वह्निमान्धूमादित्यादौ समवायेन हेतौ संयोगेन[२] हेत्वभावमादायातिव्याप्तिः। ननु धूमवान्वह्नेरित्यादौ समवायावच्छिन्नहेत्वभावस्य साध्याभाववत्सकलनिष्ठत्वाभावात्। आत्मभिन्नं द्रव्यत्वादित्यादौ साध्याभाववत्यात्मनि कालिकसंबन्धावच्छिन्न[द्रव्यत्वाभावादिकमादाय चातिव्याप्तिरतः साध्यताहेतुताघटकसंबन्धावच्छिन्न][३]त्वं प्रतियोगितायामन्यैर्निवेशितम्। तस्य प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वनिवेशकल्पे आवश्यकत्वेऽपि गौरवादेतत्कल्पे तत्परित्यागं दर्शयति—इत्थंचेति। द्रव्यत्वादाविति। गुणत्वं द्रव्येतरावृत्ति-

न्यायरत्नं।

साधकेऽतिव्याप्तिः कुतो नोक्तेति शङ्का स्यात्। जन्यमात्रस्य कालोपाधितया व्यभिचारनिरूपकस्यापि साध्यवत्त्वात्। महत्पददाने तु महत्त्वाभाववति कालत्वाभावबोधनाज्जन्यमात्रस्य कालत्वाभावज्ञानेन तादृशशङ्कानुदयान्मतद्वयसाधारण्याय प्रसिद्धस्थलोपेक्षेति बोध्यम्। असंभवोऽव्याप्तिर्वेति। एकज्ञानविषय-

---

१ सूच्यते इति का. पाठः. २ संयोगावच्छिन्न. इ. मै. पा. ३ मै. पु. अधिकम्.

रणो बोध्यः। तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यम्। तेन द्रव्यत्वादौ साध्ये विशिष्टसत्वादौ नाव्याप्तिः। न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्वादावतिप्रसङ्गः।

भावपदोपादाने चाक्षराधिक्यमिति तन्नोक्तम्। **तत्प्रतियोगित्वं** साध्याभावनिष्ठाभावप्रतियोगित्वम्॥ **हेतुतावच्छेदकरूपेण** हेतुतावच्छेदकावच्छिन्नमित्यर्थः। हेत्वभावनिष्ठप्रतियोगिवैयधिकरण्य-(शरीरे)स्वप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनस्य प्रयोजनमाह—**द्रव्यत्वादाविति**। **विशिष्टेति**। गुणकर्मान्यत्वविशिष्टसत्तेत्यर्थः। **प्रतियोगितायां** (हेत्वभावप्रतियोगितायां)। हेतुतावच्छेदकावच्छिन्नत्वनिवेशनस्य फलमाह—**नवेति**। अत्रापि द्रव्यत्वादौ साध्ये इत्यनुषज्यते। **विशिष्टसत्तात्वादिना** गुणकर्मान्यत्वविशिष्टसत्तात्वादिना। तृतीयार्थश्च अवच्छिन्नप्रतियोगिताकत्वं तस्य चाभावेऽन्वयः। प्रतियोगिपदार्थैकदेशप्रतियोगितान्वितमवच्छिन्नत्वं वा तदर्थः। **तादृशाभावेति**। सकलसाध्याभाववन्निष्ठाभावेत्यर्थः। नच हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिवेशस्थले हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेश्यताम्। ततोऽपि तत्प्रयोजननिर्वाहात्। तथाच द्रव्यं सत्वादित्यादौ गुणादिनिष्ठविशिष्टसत्ताभावस्य हेतुतावच्छेदकावच्छिन्नसमानाधिकरणतयैवातिव्याप्तिवारणसंभवात्प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशनमफलमिति वाच्यम्। हेत्वभावे हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठाया हेतुतावच्छेद-

कृष्णंभट्टीयं।

सत्वं वा द्रव्यत्वं तेन न साध्ये साकल्याप्रसिद्धिः। अवच्छिन्नेति। अस्य प्रकारतया भानात् वह्नित्वेन नास्तीति न प्रत्ययः। द्वेधा प्रतियोगित्वभानासहिष्णुराह—प्रतियोगीति। सकलेति। सकलतन्निष्ठहेतुतावच्छेदकावच्छिन्नानधिकरणताकाभावप्रतियोगित्वं तु बहुव्रीह्यर्थसंबन्धासंभवान्नोक्तम्। सकलेति। यद्यप्येतादृशपरिष्कारे निर्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादावव्याप्तिदानासङ्गतिरिति सकलसाध्याभाववन्निष्ठहेतुतावच्छेदकावच्छिन्नप्रतियो-

कावच्छिन्नानधिकरणवृत्तित्वविशिष्टनिरूपिताधिकरणता तन्निरूपकाभाव(प्रतियोगित्व)वत्त्वमर्थः स्यात्तदपेक्षया सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्ना यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणता तद्वत्त्वरूपास्मदीयफलितार्थस्य घुत्वात् । नच ममापि सकलसाध्याभाववन्निष्ठं यद्धर्मावच्छिन्नानधिकरणत्वं तद्धर्मवत्त्वमित्येवार्थः । स चातिलघुरेवेति वाच्यम् । एतादृशार्थकरणे मूलोक्तं प्रतियोगितायां व्याप्तित्वं व्याहन्येतेति मूलानुसारेण दीधितिकृता गुर्वर्थानुसरणात् । उक्तविशेष्यविशेषणभावेन निवेशे व्यर्थविशेषणतानवकाशात् । केचित्तु हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठविशिष्टसत्तात्वावच्छिन्नव्यधिकरणाभावप्रतियोगित्वरूपव्याप्तिविशिष्टवैशिष्ट्यज्ञानस्य गुणेऽपि सत्वात् वाधानवतारदशायां तत्र द्रव्यत्वानुमित्यापत्तिः । अस्मन्मते तु तत्प्रतियोगित्वं चेत्यतो लब्धस्य तादृशप्रतियोगितावच्छेदकहेतुतावच्छेदकस्य व्याप्तितया तद्विशिष्टवैशिष्ट्यावगाहिज्ञानस्य गुणेऽपि भ्रमत्वादित्याहुः ।

कृष्णंभट्टीयं ।

गितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टनिरूपितस्वनिरूपिताधिकरणताकाभावप्रतियोगित्वमित्यर्थो वाच्यः । नचोक्तार्थापेक्षया अतिगुरुरेव । तथापि अव्याहत्यनुरोधेन तादृशार्थो लाघवगौरवविचारे न प्रदर्शयितुं शक्यते । अव्यासेर्दर्शितयथाश्रुताभिप्रायकत्वसंभवात् । निष्कर्षलाघवादेव पञ्चमावतारसंभवात् । वह्न्यभावच्छेदस्य वह्न्यस्वरूपत्वमते नेदमित्यपि केचित् । विशेष्येति । नच हेतुतावच्छेदकावच्छिन्नयत्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणशब्दाद्बोधे यादृशविषयितायद्धर्मावच्छिन्नानधिकरणशब्दाद्बोधे तद्विलक्षणविषयितासत्वेऽपि यद्धर्मावच्छिन्नप्रतियोगितावच्छेदकत्वेन धूमत्वावच्छिन्नानधिकरणत्वरूपतात्पर्यार्थबोधे धूमत्वावच्छिन्नानधिकरणत्वभानाद्वैयर्थं दुर्वारमेवेति वाच्यम् । गोमान्सास्नादिमतः वह्निमान्धूमवतः इत्यादौ हेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगितावच्छेदकत्वेनैव सास्नात्वाद्यविशेषितसास्नादिहेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नान-

न्यायरत्नं ।

त्वादीनां संसर्गत्वानभ्युपगमे आत्मभिन्नं ज्ञानवदन्यत्वादित्यादौ लक्षणसंभवादुक्तमव्याप्तिर्वेति । **अस्मदीयफलितार्थस्येति** । यद्यप्येतादृशफलितार्थस्य

यत्रैकव्यक्तिकं साध्यं विपक्षो वा, तत्र निर्धूमत्वव्याप्ये,

[अथ चतुर्थलक्षणदूषणम्]। एतल्लक्षणं दूषयित्वा उत्तरलक्षणमवतारयति—**यत्रैकव्यक्तिकमिति**। यत्रैकव्यक्तिकं साध्यं तत्राव्याप्तिरित्यन्वयः। एतद्रूपवानेतद्रसादित्यादौ अव्याप्तिरित्यर्थः। अनेकाशेषत्वरूपसाकल्यस्य साध्येऽसत्वादिति भावः। साध्ये साकल्यविशेषणं परित्यज्य कल्पान्तरानुसरणान्न तद्दोषावकाश इत्यत आह—**विपक्षो वेति**। **विपक्षः** साध्याभाववान्। अत्राप्येकव्यक्तिक इत्यस्य विपरिणतस्यानुषङ्गः। तथाचैतद्घटभिन्नं पटत्वादित्यादौ साध्याभाववत्येतद्घटादौ साकल्याप्रसिध्याऽव्याप्तिरित्यर्थः। सकलपदस्याशेषमात्रपरत्वे दोषान्तरमाह—**निर्धूमत्वव्याप्य इति**। **तत्वेन** निर्धूमत्वव्याप्यत्वेन। तथाच धूमत्वावच्छिन्नाभावव्याप्यवान् वह्नित्वावच्छिन्नाभावादित्यादावित्यर्थः। निर्धूमत्वावच्छिन्ने साध्ये एक-

कृष्णंभट्टीयं।

धिकरणशब्दजन्यबोधे तादृशबोधे च विषयः यद्धर्मावच्छिन्नानधिकरणशब्दजन्यबोधे च यद्धर्मशब्देन विशिष्टहेतुतावच्छेदकस्थले तस्योपादेयतया साक्षात्वादिना न विषय इत्याशयेन विशिष्टाविशिष्टहेतुकस्थले विशेष्यविशेषणभावबोधोक्तिसङ्गतेः।

[अथ चतुर्थलक्षणदोषः] **अनेकाशेषत्वं** स्वसमानाधिकरणयावद्धर्मसमानाधिकरणानेकसाध्यवृत्तिसाध्यतावच्छेदकवत्वं। **निर्धूमत्वव्याप्यत्वं** धूमवदवृत्तित्वं। स्वरूपसंबन्धः साध्यतावच्छेदकः अन्यथा व्यभि-

न्यायरत्नं।

व्याप्तित्वे व्याप्तेर्विशिष्टैकार्थरूपतानुपपत्तिरतः सकलसाध्याभाववन्निष्ठस्वावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टनिरूपिताधिकरणतानिरूपकाभावीयहेतुतावच्छेदकावच्छिन्नप्रतियोगित्वं व्याप्तिरित्येव वक्तव्यं। तथाच हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशानुयोगो दुर्वार एवेति प्रतिभाति। तथापि सकलसाध्याभाववन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकहेतुतावच्छेदकावच्छिन्नत्वविशिष्टप्रतियोगित्वरूपफलितार्थे तात्पर्यान्नानुपपत्तिरित्यवधेयम्।

[अथ चतुर्थलक्षणदोषः।] **अनेकाशेषत्वरूपसाकल्यस्येति**। अत्रानेकत्वं व्यासज्यवृत्तिधर्मपर्याप्त्यधिकरणत्वम्। व्यासज्यवृत्तित्वं चैकत्व-

---

१ तत्र दोषा इति का. पाठः. तत्रैतद्दोष इति मै. पाठः. २ शब्दस्य इति का. पाठः.

तत्वेन साध्ये, निर्वह्नित्वादौ चाव्याप्तिः । तत्र हेत्वभावस्य य-ह्नयादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह—साध्यवदिति।

व्यक्तिकतया पूर्वदोषाक्रान्तत्वेन तद्व्याप्यसाध्यकानुसरणं । निर्धूमत्वव्याप्यस्य ह्रदादेस्ताद्रूप्येण साध्यतायां सद्धेतुत्वानुपपत्तिरतस्तत्वेनेत्युक्तम् । **हेत्वभावस्येति** । अथ वह्न्यात्मकहेत्वभावस्य प्रत्येकं सकलसाध्याभाववन्निष्ठत्वासंभवेऽपि सकलतन्निष्ठवह्न्यभावादिभेदप्रतियोगितामादायैव लक्षणं संगमनीयम् । हेतुतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यनिवेशादेव व्यभिचारिणि संबन्धान्तरावच्छिन्नप्रतियोगिताकहेत्वभावमादायातिप्रसंगानवकाशेन हेत्वभावप्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशात् ।

यत्तु वह्निमद्भेदहेतुकाभिप्रायकोऽयं ग्रन्थः । भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपस्य[2] स्वीकरणीयतया तथा तस्य च प्रत्येकं विश्रान्ततया यावद्विपक्षवृत्तित्वसंभवात्तत्र हेतुभेदमादायापि लक्षणगमनासंभवादिति । तन्न । आकाशाभावाधिकरणकभेदभेदस्याकाशाद्यभावा[3]त्मकाधिकरणस्वरूपतया तस्य च यावद्विपक्षवृत्तित्वेन तमादायैव लक्षणगमनसंभवात् । नचैतादृशरीत्या आकाशाभावमादाय भेदहेतुकव्यभिचारिण्यतिव्याप्तिप्रसक्त्या हेत्वभावत्वेन सकलसाध्याभावाधिकरणवृत्तित्वं विवक्षणीयम् । तथासति अधिकरणस्वरूपाभावस्य स्वस्मिन्नेव तदभावत्वेन वृत्तिरिति नातिव्याप्त्यवकाशः । एवंचाका-

कृष्णंभट्टीयं ।

चारित्वापत्तिः । **व्यभिचारिणि** आत्मभिन्नं द्रव्यत्वादित्यादौ । **भेदहेतुकेति** । गुणवान्घटभेदादित्यादौ । **स्वस्मिन्नेवेति** । घटभेदादिरूपहेतुभेदत्वेन

न्यायरत्नं ।

पर्याप्त्यवच्छेदकधर्मावच्छिन्नापर्याप्तिकत्वरूपमेकत्वविरुद्धत्वं स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वतादात्म्यैतदुभयसंबन्धेन किंचिद्धर्मविशिष्टत्वं वेत्यन्यदेतत् । अशेषत्वं च समभिव्याहृतपदार्थतावच्छेदकधर्मव्यापकीभूतो योऽनेकवृत्त्यव्यासज्यवृत्तिधर्मभिन्नो धर्मस्तत्पर्याप्त्यधिकरणत्वं बोध्यम् । **भेदहेतुकेति** । गुणवान्घटभेदादित्यादावित्यर्थः । **स्वस्मिन्नेवेति** । घटभेदरू-

---

१ जलत्वादेः इति का. पाठः. २ स्वरूपस्य स्वीकरणीयतयेति मै. पुस्तके अधिकम्. ३ आकाशाद्यभावस्वरूप इ. मै. पा.

शाभावमादाय नोक्ताव्याप्तिपरिहारसंभव इति वाच्यम् । उक्तस्थले आकाशाभावस्य हेतुतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यविरहादेवातिव्याप्तिवारणसंभवेन तादृशविवक्षायाः निष्प्रयोजनत्वात् । वह्निमद्भेदहेतुकस्थले च साध्याभावाधिकरणस्य हेतुरूपप्रतियोग्यनधिकरणत्वेनाकाशाभावरूपहेतुभेदस्य प्रतियोगिव्यधिकरणत्वेनाव्याप्तिवारणसंभवादिति ।

अत्र केचित् । यत्र वह्न्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यं साध्यं वह्न्यभावान्यत्वविशिष्टवह्न्यभावो हेतुः । तत्र वह्न्यभावस्यापि सकलसाध्याभावान्तर्गततया तत्र वह्न्यभावभेदासत्त्वेन तमादाय लक्षणगमनासंभवात्। नच तादृशविशिष्टहेतुकस्थले हेतु(मत्)भेदस्य सकलसाध्याभाववन्निष्ठत्वासंभवेऽपि अखण्डस्य विशिष्टात्यन्ताभावस्य तथात्वमादायैव लक्षणं संगमनीयमिति वाच्यम् । प्राचीनमते विशिष्टाभावस्य विशेषणाभावविशेष्याभावाभ्यामनतिरिक्ततया तादृशविशिष्टाभावस्य वह्न्यभावत्ववह्न्युभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वासंभवात् । अथैवमपि विषयितादिसंबन्धावच्छिन्नप्रतियोगिताकस्य वह्न्यभावात्यन्ताभावस्याखण्डतया सकलधूमवन्निष्ठतया तमादायैव लक्षणं संगमनीयमिति चेन्न । वृत्त्यनियामकतया विषयितादिसंबन्धानां अत्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । संयोगादिरूपव्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावा(त्यन्ता)भावस्याखण्ड[1]तया सकलधूमवन्निष्ठत्वेऽपि तदभावप्रतियोगिता न हेतुतावच्छेदकीभूतवह्न्य-

कृष्णंभट्टीयं ।

गगनाभाव एव गगनाभावस्य वृत्तित्वमित्यर्थः । यदि हेतुभेदत्वेन गगनाभावस्य केवलान्वयित्वं तदा घटभेदरूपहेतौ गगनाभावरूपहेतौ भेदसत्त्वेन घटभेदो न घटभेद इति प्रयोगापत्तिरित्यर्थः । हेत्वभावत्वेन हेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगिताकाभावत्वेन । दीधितिकारोक्तस्थलेऽव्याप्त्युद्धारेऽप्यादिपदग्राह्यस्थलेऽव्याप्तिरिति वदतां मतं दूषयति ।

अत्र केचिदिति । **अथैवमपीत्यादि** । **वह्न्यभावात्यन्ताभावस्येति** । वह्न्यभावान्यत्वविशिष्टवह्न्यभावात्यन्ताभावस्येत्यर्थः । **अखण्डतया** । अतिरिक्ततया न ह्ययं विशिष्टाभावः । वैशिष्ट्यघटकसंबन्धानव-

१ अखण्डस्य इति मै. पाठः

भावत्वावच्छिन्ना । तत्र लाघवेनाभावत्वस्यैवावच्छेदकत्वादिति न तमादायापि लक्षणसंगतिः । नच गुरुधर्मावच्छिन्नहेतुकस्थले लक्षणसंगमनाय पारिभाषिकमेवावच्छेदकत्वं हेतुतावच्छेदके निवेश्यम् । तथाच वह्न्यभावत्वादेरपि तादृशावच्छेदकत्वमक्षतमेवेति वाच्यम् । एतल्लक्षणस्य परित्याज्यतया निखिलदोषोद्धारानावश्यकत्वेन पारिभाषिकमवच्छेदकत्वं न निविष्टमित्यभिप्रायेणैव तद्दोषदानादिति वदन्ति ॥

कृष्णंभट्टीयं ।

च्छिन्नप्रतियोगिताकत्वात् । एवमुत्तरत्रापि। एतेनेयं शङ्का न दीधितिकारोक्तस्थले परास्ता । तत्र वह्न्यभावभेदमादायैव लक्षणसमन्वयोक्तेः विषयिताद्यनुधावनवैयर्थ्यादित्यपास्तम् । पारिभाषिकमेवेति । यद्यपि प्रतियोगितावच्छेदकातिरिक्तवृत्तित्वं न तत्, द्रव्यं सत्वादित्यादौ सत्तात्वस्य विशिष्टसत्ताभावप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वादतिव्याप्तेः । एतेन हेतुतावच्छेदकसमानाधिकरणभेदप्रतियोगितानवच्छेदकधर्मावच्छिन्नत्वं परास्तम् । नापि तदवच्छिन्नाभाववदसंबद्धस्वविशिष्टसामान्यकत्वं । प्रकृतेऽभावत्वरूपतदवच्छिन्नाभावाप्रसिद्धेः । विपक्षनिष्ठाभावप्रतियोगिताघटकसंबन्धेन तदवच्छिन्नाभावो न निवेशयितुं शक्यः । संयोगसंबन्धावच्छिन्नप्रतियोगिताकस्य केवलान्वयित्वाद्वह्न्यभावत्वे तद्दौर्लभ्यात् । तथापि स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकताकत्वमेव तदवच्छेदकत्वं बोध्यम् । न चैवं वह्निमान्धूमादित्यादौ संयोगावच्छिन्नहेत्वभावप्रतियोगितावच्छेदकधूमत्वादेः समवायावच्छिन्नतादृशाभावप्रतियोगितावच्छेदकत्वादव्याप्तिः । प्रतियोगितयोरेकसंबन्धावच्छिन्नत्वंच वह्न्यभावत्वे तद्दौर्लभ्यग्रस्तमिति वाच्यम् । स्वविशिष्टाधिकरणस्य हेतुताघटकसंबन्धेन प्रतियोग्यनधिकरणत्वेन विशेषणीयत्वादिति दिक् ॥ नन्वेवमपि हेत्वभावादेः प्रतियोगिवैयधिकरण्यस्य हेतुतावच्छेदकसंबन्धेन निवेशान्नोक्तस्थलेऽव्याप्तिवारणमिति चेन्न । यादृशप्रतियोगिता यद्धर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्ना तद्धर्मावच्छिन्नानधिकरणत्वरूपप्रतियोगिवैयधिकरण्यनिवेशात् । नचैवं कर्मभिन्नं सत्वादित्यादावतिव्याप्तिः साध्याभाववत्सकलनिष्ठत्वे संबन्धविशेषावच्छिन्नत्वस्य निवेश्यत्वात्प्रतियोगितायां पारिभाषिकं हेतुतावच्छेदकावच्छिन्नत्वं परित्यज्य, यद्धर्मे हेतुव्यापकतावच्छेदकत्वं वा निवेश्यम् । तेन कर्मान्यत्व-

न्यायरत्नं ।

पहेतुभेदत्वेन गगनाभाव एव गगनाभावस्य वृत्तिमत्वमित्यर्थः । यदिच घटभेदभेदत्वेन गगनाभावस्य केवलान्वयित्वं तदा घटभेदो न घटभेद

---

१ अभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वाप्रसिद्धे. मै. पु. अ.

तदसत् । तथासत्यपि सकलसाध्याभाववन्निष्ठकालिकसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावा(द्य)भावमादाय लक्षणसमन्वयसंभवात् । नच जन्यमात्रस्य कालोपाधितानये साध्याभाववति (पर्वतादौ) कालिकसंबन्धेन वह्न्यभावा(दि)सत्त्वात्तत्र तत्संबन्धेन तस्याभावो न वर्त्तत एवेति वाच्यम् । कालिकसंबन्धेन तत्र वह्न्यभावसत्त्वेऽपि प्रतियोग्यनधिकरणीभूतवह्निमद्देशावच्छेदेन[1] तत्र तत्संबन्धावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्वात् । (एवं विशिष्टाभावस्य विशेष्याभावविशेषणाभावाभ्यां अनतिरिक्तत्वे द्रव्यं विशिष्टसत्त्वादित्यादावेवाव्याप्तिसंभवे तदुपेक्षायां[2] निर्बीजत्वाच्च) । एतेन[3] विशे-

कृष्णंभट्टीयं ।

विशिष्टसत्ताभावमादाय न दोषः । **तथा सत्यपीति** । क्रियाप्रलययोरेव कालोपाधितापक्षे । **सत्वादिति** । नच[4] कालिकसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावभेदविशिष्टवह्न्यभावाभावस्याखण्डत्वेऽपि लाघवेन वह्न्यभावत्वमेव तत्प्रतियोगितावच्छेदकं स्यादिति वाच्यम् । तत्प्रतियोगितानिरूपकाभावविरोधितावच्छेदकत्वस्य तादृशाभावाधिकरणनिरूपितप्रतियोगिताघटकसंबन्धावच्छिन्ननिरवच्छिन्नाधेयतानवच्छेदकत्वरूपस्य प्रतियोगितासमनैयत्यघटकतया, विशिष्टसत्तात्ववत् विशिष्टवह्न्यभावत्वस्य प्रतियोगितावच्छेदकत्वात् । [तत्र सत्तात्वस्य तादृशाधेयतावच्छेदकतया तदपेक्षया न गुरुत्वं विशिष्टसत्तात्वस्य । इहतु वह्न्यभावत्वस्यापि तादृशनिरवच्छिन्नाधेयतानवच्छेदकतया विशिष्टवह्न्यभावत्वस्य ततो गुरुत्वानपायादिति । नैवम्[5] । तत्प्रतियोगिताश्रयवृत्तिषु विशिष्टानवच्छेदकावच्छिन्नाया अनवच्छेदकत्वस्य वाच्यत्वात् । एवं गुरुधर्मः वह्न्यभावभेदविशिष्टवह्न्यभावत्वं तच्च वह्न्यभावावच्छेदेन वह्निमदवयवावच्छेदेन चाधेयतानवच्छेदकम् । वह्न्यभावस्य महाकालेऽपि तद्विशिष्टसत्तानवच्छेदकत्वात् । केवलवह्न्यभावत्वं तु वह्न्यभाववद्भेदेन तथाविधमहाकालवृत्तितावच्छेदकमेवेति विशेषात् ।] ननु तत्र वह्न्यभावभेदासत्त्वेनेति पूर्वग्रन्थे वह्न्यभावभेदविशिष्टवह्न्यभावभेदासत्वेनेति व्याख्यानं न युज्यते । गुरुतया तादृशवह्न्यभावत्वस्य भेदप्रतियोगि-

न्यायरत्नं ।

इति प्रयोगापत्तिरिति ध्येयम् । **कालिकसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायेति** । अत्र वह्न्यभावपदं वह्न्यभावान्यत्वविशिष्टवह्न्यभा-

---

१ वह्निमदवयवा. इति का. पाठः. २ तदुपेक्ष्याभावसाध्याभावहेतुकस्थलानुधावने इति का पाः. ३ एतेनेत्यादि संभवादित्यन्तम् का. पुस्तके न दृश्यते. ४ लक्षणपरित्यागे इति मै. पाठः. ५ अथैवमपि. मै. पा. [] एतदन्तगतं. वा. पु. ना.

षणताविशेषेण संबन्धेन वृत्तिघटितसामानाधिकरण्यसंबन्धावच्छिन्नप्रतियोगिताकधूमाभावव्याप्यवान् तादृशसामानाधिकरण्यसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावादित्येतत्परम्। तत्र धूमसामानाधिकरण्यरूपस्य सकलसाध्याभावस्याधिकरणं हेतुरपि। तस्य धूमाधिकरणे सत्त्वात्। तत्र च हेतुभेदमादायापि न लक्षणसमन्वयसंभवः। अत्य-

कृष्णंभट्टीयं।

तानवच्छेदकत्वात्। द्रव्यं[1] सत्वादित्यादौ विशिष्टसत्ताभावस्य विशेष्यविशेषणभावरूपतामते सकलसाध्याभाववन्निष्ठत्वाभावेनातिव्याप्तिविरहाद्धेतुतावच्छेदकावच्छिन्नत्वं प्रतियोगिताविशेषणं नोपादेयम्। एतदभिप्रायेणैव वह्न्यभावाभेदतदभावोत्कीर्तनमस्त्विति चेन्न। तत्प्रतियोगिता न हेतुतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्नेति ग्रन्थविरोधात्। तस्माद्वह्निमान्द्रव्यादित्यादौ साध्याभाववत्सकलनिष्ठधूमाभावमादायातिव्याप्तिवारणाय हेतुतावच्छेदकधर्मावच्छिन्नत्वमावश्यकं वाच्यम्। वह्न्यभावभेदासत्त्वेनेति ग्रन्थश्च गुरुधर्मस्य प्रतियोगितानवच्छेदकमते वह्न्यभावान्यत्वविशिष्टवह्न्यभावभेदप्रसिद्ध्येत्यर्थकः। एवंच[2] कालिकसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावभेदविशिष्टवह्न्यभावाभावस्थले गुरोरपि तादृशाभावत्वस्य प्रतियोगितावच्छेदकत्वं निष्प्रत्यूहम्। ननु कालिकसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावान्यत्वविशिष्टवह्न्यभावाभावकालिकसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावाभावयोः समनियतत्वेनैक्यात्केवलवह्न्यभावत्वस्यैव तत्प्रतियोगितावच्छेदकत्वं। ननु विशिष्टवह्न्यभावत्वस्येति प्रतियोगिताया हेतुतावच्छेदकावच्छिन्नत्वाभावेनाव्याप्तिस्तदवस्थैवेति चेन्न। तत्र तेन संबन्धेन हेत्वभावस्य वह्न्यभावोऽप्यवच्छेदकः। तेन संबन्धेन वह्न्यभावाभावस्य तु तेन संबन्धेन वह्निमद्देश एवेति अवच्छेदकभेदेनैव तयोर्भेदात्। अन्यथा कपिसंयोगाभावपिपीलिकासंयोगाभावयोरप्यैक्यापत्तेरिति। एवं विशिष्टाभावस्य विशेष्याभावविशेषणाभावाभ्यामनतिरिक्तत्वे द्रव्यं विशिष्टसत्वादित्यादावव्याप्तिसंभवात्तदुपेक्षाया निर्बीजत्वादिति। यद्यपि[3] सत्तायां विशिष्टसत्ताभेदासत्त्वेन[4] तमादाय लक्षणसमन्वयो[5] नास्ति। सकलान्तर्गते साध्याभाववति नित्ये सहजतः जन्येच प्रतियोग्यनधिकरणावच्छेदेन कालिकसंबन्धावच्छिन्नहेत्वभावसत्त्वेन अव्याप्त्युद्धारसंभवात्। तथापि भट्टाचार्यैर्लिखितत्वात्तथा बोध्या। एतद्दीधितिग्रन्थात्कथंचिदपि तादृशसाध्यादेरलाभ इति तत्त्यागः। हेतोः साध्याभाववत्तासंपत्तये विशेषणताविशेषेणेति। रूपस्येति। तत्संबन्धावच्छिन्नप्रतियोगिताकाभावाभावः तत्संबन्धरूप इत्याशयेनेदम्। तस्य सामानाधिकरण्यसंब-

---

१ तस्मात् इ.मै.पु. अधिकम्. २ एवमित्यादि ऐक्यापत्तेरिति पर्यन्तं: मै. पु. पृष्ठत एव वर्तते. ३ नच, इ.मै. पा. ४ कथम्. इ. मै. पु. अ. ५ इति वाच्यं. मै. पाठः.

न्ताभावमादाय तदसंभवो दर्शितरीत्यावसेयः । इत्थंच विशिष्टाभावस्य विशेष्याभावविशेषणाभावाभ्यामनतिरिक्तत्वेऽपि न दोषासंगतिरिति परास्तम् । तत्रापि कालिकसंबन्धावच्छिन्नाभावमादाय दोषवारणसंभवात् । तस्मात्प्रतियोगितावच्छेदकसंबन्धेनैव प्रतियोगिवैयधिकरण्यं निविष्टं। प्रतियोगिता च हेतुतावच्छेदकसंबन्धावच्छिन्नत्वेनैव निविष्टेत्यभिप्रायेणैव तद्दोषदानं । हेतुतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्योपादाने तु अग्रिमलक्षणापेक्षया गौरवमेवेति लक्षणान्तरावतारे बीजं बोध्यं । एतेन सकलशब्दस्य व्यापकत्वार्थकतया साध्याभावव्यापकीभूताभावप्रतियोगित्वमेव निष्कृष्टैतल्लक्षणार्थः।धूमवान्वह्नेरित्यादौ प्रमेयत्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वे(पि) न क्षतिः। यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपत्वस्यैव लक्षणत्वात्।एवंच हेत्वभावे प्रतियोगिवैयधिकरण्यं

कृष्णंभट्टीयं ।

न्धेन वह्न्यभावरूपहेतोः । दर्शितेति । हेत्वभावस्य सामानाधिकरण्येन वह्निरूपस्य तत्सामानाधिकरण्यरूपस्यैव नानात्वात् । कालिकेति । एवं पर्वतवृत्तिरूपध्वंसादौ कालिकसंबन्धेन हेतोः सत्वेऽपि तदनधिकरणघटात्यन्ताभावाद्यवच्छेदेन तदभावोऽपि बोध्यः । ननु साकल्यं समभिव्याहृतपदार्थतावच्छेदकनिष्ठव्याप्तिनिरूपकत्वं समभिव्याहृतपदार्थान्वयिसकलशब्दोत्तरवृत्तिशब्दोपसन्दानात् । साध्याभावाधिकरणावृत्तितद[स्व]भावकत्वं निर्गलितार्थः। तत्रच वह्न्यभाववति कालिकसंबन्धेन वा वृत्तित्वनिवेशे सत्तावान् जातेरित्यादौ तदप्रसिद्धिः। द्रव्यभिन्नं विशिष्टसत्वादित्यादौ हेत्वभावाभावे सत्वादौ तादृशद्रव्यवृत्तित्वं [एवं स्वाभावाधिकरणावृत्तिसाध्याभावत्वोक्तौ च सत्ताभाववान् जात्यभावादित्यादौ च हेत्वभावाभावे स्वाभावाधिकरणे साध्यवत्ताग्रहविरोधितानियामकसमवायेन वृत्त्यप्रसिध्यादिकम्] चेत्यत आह—व्यापकतेति । एवंचेति । ननु सत्तावान् जातिमद्वृत्तित्व-

न्यायरत्नं ।

वपरं तेन प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वविशेषणसत्वेऽपि न क्षतिः । तादृशविशिष्टवह्न्यभावाभावप्रतियोगिताया वह्न्यभावत्वस्यैवावच्छेदकत्वसंभवस्तु न शङ्क्यः । तथा सति तादृशविशिष्टाभावस्य वह्न्यभावरूपदेशावच्छेदेन कालवृत्तित्वानुपपत्तेः । प्रतियोगितावच्छेदकावच्छिन्नानधिकरणदेशस्यैव कालवृत्तितावच्छेदकत्वादिति ध्येयम् । सकलशब्दस्य व्यापकत्वार्थकतयेति ।

१ मै. पु. अधिकम्.

न निवेश्यते। व्यापकतालक्षणे प्रतियोगिवैयधिकरण्यानिवेशेनाव्याप्यवृत्तिहेतुकव्यभिचारिणि हेत्वभावस्य साध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितया व्यापकत्वाभावेनातिप्रसंगविरहात्[1]। व्यापकताशरीरे च हेतुतावच्छेदकसंबन्धेन साध्याभाववन्निष्ठत्वमभावे निवेश्यम्। तेन वह्न्यभाव(आदि)वति कालिकसंबन्धेन धूमादिरूपाभावस्य वृत्तावपि धूमाभावादेर्न साध्याभावव्यापकताक्षतिः। सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदकसंकन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिस्तु लक्षणपञ्चक एव दोषः।

कृष्णंभट्टीयं।

विशिष्टाभावादित्यादौ हेत्वभावस्य यः कालिकसंबन्धावच्छिन्नाभावस्तस्य प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणस्य साध्याभाववति हेतुतावच्छेदकीभूतदैशिकविशेषणतासंबन्धेन सत्वादव्याप्तिरतो व्यापकतायां प्रतियोगिवैयधिकरण्यं निवेश्यमिति हेत्वभावे तदावश्यकमिति चेन्न। लाघवेन हेतुमत्ताग्रहविरोधितानियामकसंबन्धावच्छिन्नप्रतियोगिताविवक्षणात्। अन्यथा हेतुमत्ताग्रहविरोधितानियामकसंबन्धेन प्रतियोगिवैयधिकरण्यस्यावश्यकतया गौरवात्। दोष इति। एतेन तद्दोषस्यानुद्भावनीयत्वमुक्तं। **केवलान्वयिन्यभावादिति** मूले, केवलान्वयित्वं हेतुतावच्छेदकसंबन्धेन यत्किंचित्पदार्थाधिकरणवृत्त्यभावप्रतियोगिसाध्यकत्वमभिप्रेतमतो न न्यूनतेति भावः।

अत्र केचित्। साध्याभावव्यापकतावच्छेदकत्वं हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतात्वदभावीयप्रतियोगितावच्छेदकत्वसंबन्धेन साध्याभावावच्छिन्नप्रतियोगिताकाभाववत्त्वं। उक्तस्थले च सामान्यादौ तादृशवृत्तेरप्रसिद्धावपि द्रव्यत्वादेः प्रसिद्धेन निरुक्तसंबन्धेन व्यधिकरणेन सत्ताभावावच्छिन्नप्रतियोगिताकाभावस्य जात्यभावत्वे सत्त्वान्नाव्याप्तिरित्याहुः। तन्न तादृशपरम्परायाः प्रतियोगितावच्छेदकसंबन्धत्वे मानाभावात्। परेतु यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं स्वावच्छिन्नप्रतियोगिताकाभाववदवृत्तिसाध्याभावाधिकरणताकं तद्रूपवत्त्वं व्याप्तिरिति निष्कर्षः। उक्तस्थले च साध्याभावाधिकरणतायाः जात्यभावत्वावच्छिन्नप्रतियोगिताकाभाववृत्त्यवृत्तेर्नाव्याप्तिरित्याहुः। तत्तुच्छं। यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रतियोगिताकाभावाधिकरणवृत्तित्वाभावीयप्रतियोगितायां तादृशवृत्तित्वस्य हेत्वधिकरणवृत्तित्वत्वापेक्षया गौरवेणानवच्छेदकतया तथा निर्वचनासंभवात्[2]। न च निरुक्तवृत्तित्वत्वस्य गौरवेणानवच्छेदकत्वेऽपि स्वनिरूपकतावच्छेदकत्वोप-

---

१ अतिव्याप्ति इति मै. पा. २ चात्मक इति मै. पा.

कृष्णंभट्टीयं।

लक्षितधर्मावच्छिन्नाधिकरणवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभाववत्साध्याभावाधिकरणताकत्वं साध्यव्यापकतावच्छेदकत्वम्। अथवा स्वावच्छिन्नप्रतियोगिताकाभावानधिकरणनिरूपिता या वृत्तिता तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावकूटवत्साध्याभावाधिकरणताकत्वं तत्। तेन प्रतियोगितावच्छेदककोटौ उपलक्षणविधया भानानुपगमेऽपि न क्षतिरिति वाच्यम्। एतद्धर्मस्य स्वाधिकरणावृत्तिसाध्याभावकत्वपर्यवसायितया[1] किं न रोचयेदित्यनुयोगस्य निष्परिहरत्वात्। यत्तु साध्याभावसामानाधिकरण्यं हेतुतावच्छेदकस्वरूपान्यतरसंबन्धेन वाच्यम्। तेन सत्तावान् जातेरित्यादौ न दोष इति। तदसत्। अन्यतरत्वेन संसर्गत्वानुपगमात्। उपगमेऽपि वा पर्वतो वह्निमान्पर्वतानुयोगिकत्वविशिष्टकालिकसंबन्धेन पर्वतत्वाभावादित्यादौ हेतुतावच्छेदकस्वरूपसंबन्धान्यतरात्मकस्वरूपसंबन्धेन पर्वतत्वाभावात्मकाभावस्य साध्याभाववद्ध्रदादिवृत्तित्वाद्व्यापकत्वानुपपत्तेः। विशेषरूपेण संसर्गतानुपगमेऽपि महाकालान्यत्वविशिष्टनित्यत्वाभाववान्कालिकसंबन्धेनाकाशाभावादित्यादौ हेत्वभावाभावस्याकाशाभावात्मनः साध्याभाववति नित्ये स्वरूपसंबन्धेन सत्त्वादव्याप्तेः। साध्याभाववद्वृत्तितावच्छेदकप्रतियोगितानिवेशे न कोऽपि दोष इति बोध्यम्। यत्तु प्रतियोगिवैयधिकरण्यविशिष्टसाध्याभाववद्यत्किंचिद्वृत्तितानवच्छेदकान्यत्वमेव साध्याभावव्यापकतावच्छेदकत्वं धूमवान्वह्नेरित्यादावतिव्याप्तिवारणाय यत्किंचिदिति। कपिसंयोगादिसाध्यकसंग्रहाय प्रतियोगिवैयधिकरण्यम्। वृत्तित्वं च स्वरूपसंबन्धेनेति तत्तुच्छम्। सत्ताभाववान् जात्यभावादित्यादौ जातीनां स्वरूपसंबन्धेनासत्त्वेन हेत्वभावस्य तादृशवृत्तित्वानवच्छेदकत्वेनाव्याप्तेः। यत्तु वह्निमान् शैवालादित्यादौ व्यभिचारे शैवालाभावत्वस्य प्रतियोगिवैयधिकरण्यविशिष्टवह्न्यभावाधिकरणयत्किंचिद्व्यक्त्यात्मकभूतलवृत्तितावच्छेदकतया तादृशवृत्तितानवच्छेदकगगनत्वान्यत्वादतिव्याप्तिरिति। तदशुद्धमेव। तथाविधशैवालाधिकरणवृत्तितानवच्छेदकत्वसत्त्वात्। महाकालान्यत्वविशिष्टनित्यत्वे साध्ये कालिकसंबन्धावच्छिन्नघटत्वाभावस्तु व्यभिचारीति न दोषलेशोऽपीति। ननु साध्याभाववदवृत्तित्वादिलक्षणेषु साध्याभाववदवृत्तित्वादिकं न संबन्धसामान्येन, प्रसिद्धानुमान एव गतत्वात्। नापि यत्किंचित्संबन्धेन, निर्धूमसमवेतत्वाभावमादायातिव्याप्तेः। नापि स्वरूपहेतुतावच्छेदकान्यतरसंबन्धेन, अन्यतरत्वेन संसर्गत्वानुपगमात्। तदुपगमेऽप्यात्मभिन्नं घटाभावादित्यादौ कालिकसंबन्धेन हेतौ साध्याभाववति स्वरूपसंबन्धेन हेतोः सत्त्वादव्याप्तेः। यत्तु तादृशवृत्तित्वाभाव एव हेतुतावच्छेदकावच्छिन्नाधिकरणतानिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वीयस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकत्वं विशेषणम्। ननु वृत्तित्वेऽपि

१ तथैव मै. पु. अ.

कृष्णंभट्टीयं।

स्वरूपसंबन्धनिवेश इति न कोऽपि दोष इति। तद्विशेषरूपेण संसर्गतानङ्गीकर्तृभिर्भट्टाचार्यैर्दुर्वचनमेव। तस्माद्धेतुतावच्छेदकसंबन्धान्यहेतुप्रतियोगिकसंबन्धान्यसंबन्धावच्छिन्नत्वं तादृशहेतुप्रतियोगिकसंबन्धावच्छिन्नत्वं वा वृत्तित्वे विशेषणम्। तथाच सत्तावान् जातेरित्यादौ तथाविधस्वरूपसंबन्धावच्छिन्नवृत्तित्वसत्त्वान्नाव्याप्तिः। अथान्नात्मभिन्नं प्रमेयादित्यादौ कालिकसंबन्धेन हेतुतायां हेतुतावच्छेदको यः कालिकसंबन्धः तदन्यप्रमेयप्रतियोगिकसंबन्धो यस्तद्भिन्नः कालिकसंबन्ध एवेति तदवच्छिन्नसाध्याभावाधिकरणीभूतात्मवृत्तित्वाप्रसिद्ध्याऽव्याप्तिः। एवं सत्तावान्प्रमेयादित्यादौ समवायेन विषयितया च हेतावपि समवायादेरेव तादृशसंबन्धत्वाद्धेतुप्रतियोगिकत्वघटकहेतौ हेतुतावच्छेदकसंबन्धेन संबन्धित्वं निरर्थकं। उक्तहेतुष्वव्याप्त्यनुद्धारात्। अथ साध्याभाववदवृत्तित्वादेर्यद्धर्मावच्छिन्नानुयोगिताकत्वं तद्धर्मावच्छिन्नप्रतियोगिकत्वं हेतुप्रतियोगिकेत्यस्यार्थः। दर्शितस्थले चात्मवृत्तित्वसत्तात्वादिरेव तथाविधो धर्मः धूमवान्वह्नेरित्यादौ चान्द्रेन्धनप्रभववह्नित्वादेस्तादृशधर्मत्वेऽपि न क्षतिरिति चेन्न। आत्मवृत्तित्वावच्छिन्नप्रतियोगिताकान्यत्वस्य कथंचित्स्वरूपसंबन्धे सत्त्वेऽप्यव्याप्त्यनुद्धारादिति चेन्न। यथा समवायसंबन्धावच्छिन्नप्रमेयाभावाभाववत्त्वं सत्तायामेवोपेयते। एवं कालिकसंबन्धावच्छिन्नप्रमेयाभावाभाववत्त्वं [[1] कालमात्रवृत्तिधर्मविषयितासंबन्धावच्छिन्नप्रमेयाभावाभाववत्त्वंच] विषयितायामेव। तथाच हेतुप्रतियोगिकत्वं हेत्वभावाभाववत्त्वावच्छिन्नप्रतियोगिताकत्वमेवेति न कोऽपि दोषः। एवमात्मभिन्नं समवायतद्भिन्नोभयसंबन्धेन कालवृत्तित्वविशिष्टप्रमेयादित्यादौ हेतुतावच्छेदकसंबन्धान्यसंबन्धाप्रसिद्धिरप्यपास्ता। नचैवमुक्तस्थलेऽव्याप्तितादवस्थ्यमेव। धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थं हेतुतावच्छेदकावच्छिन्नानुयोगिताकत्वस्य साध्याभाववदवृत्तित्वे आवश्यकतया तथाविधसमवायसंबन्धावच्छिन्नवृत्तित्वाभावस्य तादृशानुयोगिताकत्वाभावादिति वाच्यम्। हेतुतावच्छेदकावच्छिन्नानुयोगिताकत्वस्य तदवच्छिन्नव्यापकतावच्छेदकावच्छिन्नानुयोगिताकत्वरूपत्वात्। अथवा केवलान्वयित्वमन्योन्याभावप्रतियोगितानवच्छेदकहेतुतावच्छेदकवत्त्वात्यन्ताभावप्रतियोगिसाध्यकत्वान्यतरत्वमीदृशस्थले व्याप्तिर्मूलल[2]भ्यैवेति। यद्यपि साकल्यलक्षणेऽपि हेतुतावच्छेदकसंबन्धान्यहेतुप्रतियोगिकसंबन्धानवच्छिन्नं साध्याभाववद्वृत्तित्वं निवेशयितुं शक्यम्। [[3] नचैवं वह्निमान्संयोगेन रूपादित्यादावतिव्याप्तिः हेतुतावच्छेदकसंबन्धेन तन्निवेशितसाध्याभावात्। एवंच हेत्वभावादौ प्रतियोगिवैयधिकरण्यनिवेशेऽपि सत्तावान्द्रव्यत्वादित्यादौ न दोष इत्यालोच्य तत्र तादृशसंबन्धनिवेशे आयासात् हेत्वभावे प्रतियोगिवैयधिकरण्यं परित्यज्य

१ मै. पु. अ. २ तथाच इ. मै. पा. ३ इ. मै. पु. अ. पा.

अस्तु वा हेतुतावच्छेदकसंबन्धेन हेतुमत्ताज्ञानं प्रति यादृशसंबन्धेन हेत्वभाववत्ताग्रहप्रतिबन्धकः तादृशसंबन्धेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधिकरणकं यद्यत्स्वं तद्भिन्नत्वमेव सा-

कृष्णंभट्टीयं।

निराकृत्य व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यं स्वावच्छिन्नानधिकरणत्वरूपं साध्याभाववति निवेश्ये तद्वृत्त्यभावप्रतियोगित्वं वैयर्थ्यात्परित्यज्य निष्कर्षमाह—अस्तु वेति] तथापि हेत्वभावे प्रतियोगिवैयधिकरण्यनिवेशानुरोधेनाह—**अस्तु वेति**। व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यं च स्वावच्छिन्नानधिकरणत्वमेव साध्याभाववति तद्वृत्त्यभावप्रतियोगित्वं वैयर्थ्यात्परित्यज्यायं निष्कर्षः कृतः। **हेतुतावच्छेदकसंबन्धेन** हेतुमत्ताग्रहविरोधितासंबन्धेन साध्यभावव्यापकतायाऽवच्छेदकत्वं यद्धर्मावच्छिन्नाभावाधिकरणतात्वं तद्धर्मवत्त्वमित्युक्तौ यद्यपि दोषाभावस्तथापि अस्तुवेत्यादिना गुर्वर्थानुसरणं परप्रतिपत्त्यर्थमेवेति बोध्यम्। हेतुतावच्छेदकसंबन्धेनेत्यस्यानुपादाने तत्संबन्धभिन्नं कालिकसंबन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावादित्यादौ कालिकसंबन्धेन व्यभिचारिण्यतिव्याप्तिः कालिकसंबन्धस्य स्वरूपसंबन्धेन हेतुमत्ताग्रहविरोधितानियामकतया न कालिकसंबन्धेन स्वावच्छिन्नानधिकरणत्वस्य व्यभिचारनिरूपकाधिकरणीभूततत्संबन्धासमानकालीनपदार्थमादायैवोपपादनीयत्वात्।

अथवा अयमात्मा कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादित्यादौ स्वरूपसंबन्धेन व्यभिचारिणि स्वरूपसंबन्धस्यापि यत्किंचित्संबन्धेन हेतुमत्ताग्रहविरोधितानियामकतया तेन स्वरूपसंबन्धेन स्वावच्छिन्नानधिकरणत्वं गगनाभावमादाय न संभवतीति गगनत्वाभावत्वादिकं स्वपदेनोपादाय तदवच्छिन्नानधिकरणं साध्याभावाधिकरणं यत्किंचित्तद्भिन्नत्वस्य हेत्वभावे सत्त्वादतिव्याप्तिरतो हेतुतावच्छेदकसंबन्धेनेत्युक्तम्। अथवा हेतुमत्ताग्रहविरोधित्वं तादृशग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वं चेत्तदात्मकत्वरूपसाध्यकोक्तव्यभिचारिणि आत्मा हेतुमान्पर्वतश्च घटवानिति समूहालम्बनरूपं हेतुमत्ताग्रहमादाय पर्वतो घटाभाववानिति प्रतिबन्धकीभूतग्रहविषयीभूतस्वरूपसंबन्धेन गगनाभावत्वावच्छिन्नानधिकरणकान्यत्वस्य हेत्वभावे सत्त्वादतिव्याप्तिः। हेतुमत्ताग्रहत्वावच्छिन्नत्वनिवेशोऽप्यवच्छेदकत्वपर्याप्तिनिवेशोऽसंभवः। तदनिवेशे यत्किंचित्संबन्धेन हेतुमत्ताग्रहमादायोक्तदोषस्तस्मादवच्छिन्नत्वं व्यापकत्वरूपं वाच्यम्। एवंच निखिलसंबन्धेन हेतुमत्ताग्रहत्वव्यापिका न कापि प्रतिबध्यतेति हेतुतावच्छेदकसंबन्धेनेत्युक्तम्। नच तन्निवेशेऽपि विभिन्नधर्मितावच्छेदकहेतुमत्ताग्रहमादाय व्यापकत्वभङ्ग एवेति वाच्यम्। तेन संबन्धेन यत्किंचिद्धर्मावच्छिन्नधर्मिकहेतुमत्ताग्रहत्वव्यापकत्वस्य निवेशनीयत्वात्। आत्मघटान्यतरवृत्तिधर्मवान् कालिकसंबन्धावच्छिन्नात्मत्वाभावसमवायसमवायसंबन्धावच्छिन्नात्मत्वाभावोभयस्मादित्यादौ वि-

ध्याभावव्यापकतावच्छेदकत्वम् । इत्थंच सत्तावान् जातेरित्यादौ वैतादृशं स्वं जातित्वाभावत्वादिकमेव तद्भिन्नं च जात्यभावत्वादिकमिति लक्षणसमन्वयः । इत्थंच एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ कपिसंयोगाभावत्वावच्छिन्नानधिकरणत्वाप्रसिद्ध्या कपिसंयोगाभावत्वं नैतादृशं स्वं इति कपिसंयोगाभावत्वस्य साध्याभावव्यापकतावच्छेदकत्वादतिव्याप्तिवारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यं विशेषणं देयमेव । न देयमेव वा अधिकरणत्वाभा-

कृष्णंभट्टीयं ।

पक्षस्यात्मनो हेतुमत्ताग्रहविरोधितानियामकीभूतकालिकसंबन्धेन हेत्वभावानधिकरणतया व्याप्तिः स्यादतो हेतुतावच्छेदकधर्मवैशिष्ट्यं निवेश्यं । घटवान्धूमाभाववानयंच घटवानिति कालिकसंबन्धेनावच्छेदकधर्मदर्शनस्य प्रतिबन्धकतया तादृशकालिकसंबन्धमादायाव्याप्तिरतो हेत्वभावनिवेशः । नचैवमपि धूमाभाववान् धूमाभाववानयंच धूमाभाववानिति कालिकसंबन्धेनावच्छेदकधर्मदर्शनस्य प्रतिबन्धकत्वात्तद्विषयकालिकसंबन्धमादायाव्याप्तिर्दुर्वारैवेति वाच्यम्। तत्पदेन वैशिष्ट्यावच्छिन्नप्रतिबन्धकताया उक्तत्वात्। अभावहेतुकव्यभिचारिण्यतिव्याप्तेर्विशेषणतासंबन्धापेक्षा । देयमेवेति । तथाच स्वप्रतियोग्यनधिकरणं यद्यत्स्वावच्छिन्नाधिकरणं तद्भिन्नं यत्साध्यभावाधिकरणं यत्किंचित्तत्कं यत्स्वं तद्भिन्नत्वमित्यर्थः। नन्वेवमेतद्वृक्षत्ववान्कपिसंयोगाभावादित्यादौ संयोगात्मकाभावत्वं स्वपदेन दुर्धरं । स्वप्रतियोगिनः संयोगाभावस्यानधिकरणाप्रसिद्धेः । स्वपदेनाभावान्तरमादायातिव्याप्तिरित्यत आह—**न देयमिति ।**

न्यायरत्नं ।

सकलशब्दस्य व्यापकत्वपरतयेत्यर्थस्तत्परत्वं तच्छाब्दबोधाजनकस्यापि मानसबोधमादाय निर्वहतीति बोध्यम् । यत्तु व्यापकत्वं सकलशब्दस्य शक्यं लक्ष्यं वेति यथाश्रुतमेव सम्यगिति तदसदिव प्रतिभाति । तथाहि सकलघटा रूपवन्तः सकलघटनिष्ठं पृथिवीत्वमित्यादौ घटे व्यापकत्वप्रतीत्यापत्तेः । इतरथा सकलाश्चते घटाश्चेति कर्मधारयविवरणानुपपत्तेः । एतेन सकलशब्दार्थव्यापकत्वे उत्तरपदार्थतावच्छेदकघटत्वस्य निरूपितत्वेनान्वयो व्यापकत्वस्य तु रूपपृथिवीत्वयोरन्वय इति निरस्तम् । पदार्थतावच्छेदकघटत्वस्य घटविशेषणतयोपस्थितत्वात्तस्य व्यापकत्वान्वयस्यैकविशेषणतयेत्यादिव्युत्पत्तिविरुद्धत्वात् । व्यापकत्वस्य रूपान्वयित्वे रूपवन्त इति तद्धितवृत्त्यनुपपत्तेश्च । सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो नेत्यभियुक्तवचनादिति दिक् । **देयमेवेति ।** तथाच तद्विशिष्टहेत्वभावत्वस्यैव व्यापकतावच्छेदकत्वं विवक्षणीयं । निरुक्तस्थले तादृशसंयोगाभावत्वस्य स्वपदेनोपादानसंभवान्नातिव्याप्तिः । नन्वेवमेतद्वृक्षत्ववान्कपिसंयोगाभावादित्यादावतिव्याप्तिः । तत्र स्वप्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेत्वभावस्याप्रसिद्ध्या तादृशहेत्वभावत्वस्य स्वपदेनोपादानासंभवादत आह—**न देयमेव**

वस्यैवाधिकरणभिन्नत्वस्थाने निवेशनीयत्वात्। कपिसंयोगाभावादेरिव तदधिकरणताया अव्याप्यवृत्तितया तदभावस्य साध्याभाववति सत्वेनातिव्याप्त्यनवकाशात्। अधिकरणत्वाभावादिश्चाभावप्रतियोगिकतयाऽतिरिक्त एवेति विशेषणताविशेषेणैव तद्वत्त्वं साध्याभाववति विवक्षणीयमिति[1]। एवंच निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वेऽपि हेत्वभावत्वेन तेषां साध्याभावव्यापकत्वान्नाव्याप्तिरिति पूर्वपक्षोऽप्यकिंचित्करः। यत्र यावतां साध्याभाववतां संभवस्तत्रापि प्रातिस्विकरूपेण तत्तदधिकरणवृत्तित्वमेव हेत्वभावविशेषणतया लक्षणघटकं। नतु साध्याभावव्यापकत्वमित्यभिप्रायेणैतद्दोषदानात्। प्रकारान्तरानुसरणेन परिष्कारे सकललक्षणानामेव परिष्कारसंभवादलं पल्लवितेन। **इति चतुर्थलक्षणदोषः ॥**

कृष्णंभट्टीयं।

[यदि[2]च, प्रतियोगिवैयधिकरण्यविशिष्टं, यद्धर्मावच्छिन्नाभावत्वमेव, स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधिकरणकान्यत्वानुयोगितया निवेश्यते। तदा एतल्लक्षत्ववान्कपिसंयोगाभावादित्यादावतिव्याप्त्यभावेपि लाघवादेव न देयमिति ग्रन्थावतारो बोध्यः।] ननु तर्ह्येतल्लक्षत्ववान्कपिसंयोगादित्यादौ हेत्वभावत्वावच्छिन्नानधिकरणाप्रसिध्याऽतिव्याप्तिरित्यत आह—**अधिकरणत्वाभावस्यैवेति**। ननु हेत्वभावाधिकरणत्वाभावो हेतुरूपएव लाघवात्तथाच वह्निमान्धूमादित्यादौ वह्न्यभाववतः कालिकसंबन्धेन तद्वत्त्वादव्याप्तिरतो हेतुतावच्छेदकसंबन्धेन स्वावच्छिन्नाधिकरणत्वाभाववत्वं निवेश्यम्। तथाच साध्याभाववति सामान्यादौ तेन संबन्धेन तद्वत्त्वाप्रसिद्ध्या सत्तावान् जातेरित्यादावव्याप्तिरत आह—**अधिकरणत्वाभावादिश्चेति**। **यत्रेति**। साध्याभाववन्निष्ठसकलतद्व्यक्तित्वावच्छिन्नवृत्तिहेत्वभावेत्यर्थः। एकविपक्षके तु साकल्यं न देयमेवेत्याशयः। ननु साध्याभाववत्तायां निरवच्छिन्नत्वं न दातुं शक्यते। संयोगिभिन्नं गुणत्वादित्यादावव्याप्तिः। अतएव साध्याभावे निरवच्छिन्नवृत्तिकत्वमवच्छिन्नवृत्तिकान्यत्वं वा कपिसंयोगसाध्यकाव्याप्तेश्च। आद्ये कथंचित्तद्विशिष्टसाध्याभाववत्तानिवेशेनादोषेऽपि द्वितीये तथाविधसाध्याभावाप्रसिद्धेरतः साध्याभावे प्रतियोगिवैयधिकरण्यविशेषणं युज्यते। हेत्वभावे तु गुरुतरप्रतियोगिवैयधिकरण्यविशेषणं हेयमेव, किंतु लाघवात् साध्याभाववति साकल्ये निरवच्छिन्नवृत्तित्वमेव दीयताम्। नचैवमात्मभिन्नं कालि-

---

१ विशेषणमिति मै. पाठः. २ () इ. मै. पु. अ.

अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्यु-

---

[अथ पञ्चमलक्षणम् ।] साध्यवद्व्यक्तिभेदमादाया(ति)व्याप्तिं परिहरति—अत्रेति । साध्यत्वावच्छिन्नप्रतियोगिताकत्वमिति । साध्यतावच्छेदकविशिष्टसाध्यपर्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः । तेन वह्निमान्धूमादित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमादाय न दोषः तादृशभेदप्रतियोगितावच्छेदकतायास्तत्त्ववि-

कृष्णंभट्टीयं ।

कसंबन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वादित्यादौ कालिकसंबन्धावच्छिन्नहेत्वभावमादायातिव्याप्तिर्दुर्वारैवेति वाच्यम् । पूर्वमते प्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वासत्वेपि एतन्मते तन्निवेशस्यावश्यकत्वादिति चेन्न । एतन्मते द्रव्यभिन्नं संयोगिभेदादित्यादावव्याप्तेः प्रतियोगिवैयधिकरण्यस्यैवावश्यकत्वात् । अथवा संयोगिभेदाभावस्य द्रव्यत्वादिरूपत्वोपगमेऽपि साध्याभाववत्तायां हेत्वभाववत्तायां वा न निरवच्छिन्नत्वमुचितं । तथासति साध्यादिमत्ताग्रहविरोधितानियामकसंबन्धावच्छिन्नत्वस्यापि निवेशनीयतापत्तेः । अस्मन्मतेऽखण्डप्रतियोग्यनधिकरणत्वनिवेशे लाघवादित्यभिप्रायः । इति चतुर्थलक्षणदोषः चतुर्थलक्षणं च समाप्तम् ।

[अथ पञ्चमलक्षणम् ।] साध्यतावच्छेदकेति । विषयितया वह्नित्वविशिष्टवह्नेदवारणाय साध्यतावच्छेदकनिष्ठावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वमावश्यकं[1] तथाच तेनैवोक्तभेदवारणे तद्विशेषणवैयर्थ्यं । नच रूपवान् पृथिवीत्वादित्यादौ विषयितया रूपत्वविशिष्टवह्नेदवारणार्थमेव तद्विशेषणं प्रतियोगितावच्छेदकतायां साध्यनिष्ठत्वनिवेशेऽपि गुणवान् पृथिवीत्वादित्यादौ विषयितया गुणत्वविशिष्टवह्नेदो दुर्वार एवेति वाच्यम् । साध्यतावच्छेदकव्यापकत्वस्य प्रतियोगितावच्छेदकतायां निवेशनीयत्वादिति । नैवम् । व्यापकशरीरे साध्यतावच्छेदकताघटकसंबन्धेन साध्यतावच्छेदकवत्वस्यावश्यकतया प्रत्युत व्यापकतानिवेश एव गौरवादिति । वह्निघटोभयवह्नेदवारणाय पर्याप्तेति । अनुयोगितावच्छेदकावच्छेदेनैवेति एवकारः । प्रकाशकृत्पदं च तत्सामानाधिकरण्यपरनञ्प्रयोगो नास्तीति प्रदर्शनाय । तेन जलं न द्रव्यं गन्धवदिति वाक्यस्य नञ-

न्यायरत्नं ।

वेति । तददाने एतद्वृक्षत्ववान्कपिसंयोगादित्यादावुक्तातिव्याप्तिं वारयत्यधिकरणत्वाभावस्यैवेत्यादिना । इति चतुर्थदोषः चतुर्थलक्षणंच समाप्तम् ।

---

१ निवेश्यं ।

त्पत्तिबललभ्यम्। नहि भवति नीलो घटो घटादन्य इति ॥
इति दीधितौ पञ्चलक्षणी समाप्ता ॥

शिष्टवह्निमत्त्व एव पर्याप्तत्वात्। व्युत्पत्तिबललभ्यम् अन्यादिपदसमभिव्याहारबललभ्यम्। नञ्पदसमभिव्याहारज्ञानस्यैव तादृशपदसमभिव्याहारज्ञानस्याप्यन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावशाब्द(बुद्धि)त्वावच्छिन्नं प्रत्येव जनकत्वादिति भावः। व्युत्पत्तिबललभ्यमित्यनेन यथाश्रुतलक्षणवाक्यार्थ एवायमिति सूचितम्। तादृशसमभिव्याहारस्थले तत्प्रतियोगिताकाभावमात्रबोधेऽतिप्रसङ्गं सूचयति—नहि भवतीति। प्रामाणिकव्यवहार इति शेषः। तथाचान्वयिप्रतियोगिकाभावमात्रबोधे नीलघटेऽपि पीतघटादिभेदसत्वेन तादृशव्यवहारोपि स्यादिति भावः। द्रव्यं न घट इत्याद्यप्रयोगात्। अनुयोगितावच्छेदकावच्छेदेनैवान्योन्याभावादिरन्यादिपदेन प्रत्याय्यते। अनुयोगितावच्छेदकश्च प्रतियोग्यवृत्तिरेव धर्म इति प्रकाशकृदङ्गीकृतव्युत्पत्त्यविरोधाद्घटो घटा(द)न्य इति प्रयोगवारणसंभवात्। नील इति। घटादन्य इत्यादौ प्राचीनमते पञ्चम्याः

कृष्णंभट्टीयं।

र्थस्योद्देश्यतावच्छेदकत्वेन जलभिन्नं द्रव्यमित्यर्थनिराकरणपरावयवग्रन्थाविरोधः। अन्यथा अनुयोगितावच्छेदकसामानाधिकरण्येनाभावादेव तादृशार्थाप्रसक्तेस्तदसंगतेरिति। अनुयोगितेति। अव्याप्यवृत्तिद्वित्वावच्छिन्नभेदस्य तदनवच्छेदक एवानुयोगितावच्छेदकः इदानीं द्वित्वादिविशिष्टप्रतियोगिबोधकपदासमभिव्याहृतनञः द्वित्वावच्छिन्नाभावबोधकत्वनियमः स्वीकार्यः। तेन द्वित्वान्वयिप्रतियोगिभेदस्य घटत्वावच्छेदेन सत्वाद्घटो घटान्य इति प्रयोगस्य दुर्वारताप्रसंगः। पश्चात्तु प्रयोजनाभावेनैव एतत्परित्याग इत्यपि द्रष्टव्यं। विरोधादिति। वारणेत्यनेनान्वितं। अनुरोधादित्यपि पाठः। ननु नीलघटत्वस्य कथं प्रतियोग्यवृत्तित्वमिति चेत्। विशिष्टसत्तावान् गुणान्य इति व्यवहारस्य प्रामाण्याद्यद्धर्मावच्छिन्नवत्त्वं। प्रतियोग्यवृत्तियद्धर्मो वा प्रतियोगिवृत्तितानवच्छेदकः तद्धर्मावच्छिन्नमेव भेदानुयोगितावच्छेदकमिति न कोपि दोषः। नीलघटत्वावच्छिन्नवत्त्वं च घटावृत्तीति दीधितिकारोक्तव्युत्पत्तिरप्यावश्यकीति बोध्यम्। साध्यवदन्येति समासे साध्यवत्त्वावच्छिन्नप्रतियोगिताकस्यैव लब्धव्यत्वात्तदुत्तरभावप्रत्ययलिखनं दीधितिकृतामनुचितमित्याशङ्कापरिहाराय साध्यवतोऽन्येति व्यास इव समासस्थले साध्यव-

प्रतियोगित्वमर्थः। तत्रच प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य घटत्वाद्यवच्छिन्नत्वविशिष्टाधेय(ता)त्वसंबन्धेनान्वयः। अथवा केवलमाधेयत्वमेव (वा) घटस्य संबन्धः। धर्मिपारतन्त्र्येण घटत्वादेरपि अवच्छिन्नत्वसंबन्धेन तत्रान्वयोपगमात्। एक(त्र)विशेषणत्वेनोपस्थितस्यान्यत्र पारतन्त्र्येणान्वयस्य व्युत्पत्तिसिद्धत्वात्। प्रतियोगित्वस्य व्युत्पत्तिवैचित्र्येणान्यपदार्थैकदेशे भेदे निरूपकतासंबन्धेनान्वयः। घटान्य इत्यादौ निरूपकतासंबन्धेन घटत्वाद्यवच्छिन्नप्रतियोगिताविशिष्टो लक्षणया घटादिपदार्थः। तत्पुरुषे पूर्वपदस्य तत्तद्विभक्त्यन्तार्थविशिष्टे लाक्षणिकत्वात्। तादृशघटादिपदार्थस्य चाभेदसंबन्धेन भेदेनान्वयः। नवीनमते (च) घटादन्य इत्यादौ अनुयोगित्वं पञ्चम्यर्थः। तत्रच प्रकृतार्थस्य घटत्वादिविशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्ननिरूपकताकत्वसंबन्धेनान्वयः। अनुयोगितायाश्चाश्रयतासंबन्धेन भेदेऽन्वयः। समासस्थले च घटत्वाद्यवच्छिन्ननिरूपितानुयोगिताविशिष्टे पूर्वपदस्य लक्षणा तस्य चाभेदसंबन्धेन भेदेऽन्वयः। अथैवं साध्यवदन्यावृत्तित्वमित्येतादृशलक्षणवाक्यात् अभेदसंबन्धेन तादृशप्रतियोगिताविशिष्टविशेषितस्तादृशानुयोगिताविशिष्टविशेषितो वा यो भेदस्तद्वदवृत्तित्वमेव प्रतीयते। तथाचानुमित्यौपयिकव्याप्तिस्वरूपजिज्ञासायां तादृशलक्षणाभिधानेऽर्थान्तरप्रसङ्गः। तादृशप्रतियोगितासंबन्धेन तादृशानुयोगितासंबन्धेन वा साध्यवद्विशेषि-

कृष्णंभट्टीयं।

त्वावच्छिन्नप्रतियोगिताकत्वलाभं कथयितुं दृष्टान्ते वैयासिकसामासिकार्थौ दर्शयति—घटान्य इति। विशेषरूपेण संबन्धत्वानुपगमात्। अवच्छिन्नत्वविशेषितप्रतियोगिताया अलाभाचाह—अथवेति। घटादन्यो न घटादित्यादौ पञ्चम्याः प्रतियोगित्वं चेत्यर्थः। तदा घटनिष्ठप्रतियोगिताया निरूपकतासंबन्धावच्छिन्नाभावबोधो वाच्यः। नच निरूपकत्वस्य वृत्त्यनियामकतया तादृशाभावाप्रसिद्ध्या न संभवतीति नवीनमतानुधावनं। अनुयोगित्वंचाश्रयतारूपस्वरूपसंबन्धेन वर्तते। तत्संबन्धस्य च वृत्तिनियामकतया नानुपपत्तिरिति भावः। घटो नेत्यादौ प्रतियोगितासंबन्धेनैव घटाभावोपगमेऽपि न क्षतिः। घटो न वेत्यादेर्व्यवहारस्यैवासत्वादतो घटादन्य इत्यभिहितं, इदानीं समासे तादृशप्रतियोगिताकत्वं लम्भयितुमाशङ्कते—अथेति।

तभेदवद्वृत्तित्वज्ञानस्यैव लाघवेनानुमितिहेतुत्वादिति चेन्न । यादृशव्याप्तिज्ञानमनुमितिहेतुः तस्यामेवास्य तात्पर्यात् । तस्याः शाब्दबोधाविषयत्वेऽपि तन्मूलकोदीच्यतादृशव्याप्तिविषयिकमानसोपनीतभान(विषय)स्यैतादृशतात्पर्यनिर्वाह्यत्वात् तादृशशाब्दबोधस्यापि कथंचित् उपपादयितुं शक्यत्वाच्च । नीलो घटः कम्बुग्रीवादिमदन्य इत्यादिवाक्यस्याप्रामाण्यात् । पटः कम्बुग्रीवादिमदन्य इत्या-

कृष्णंभट्टीयं ।

चाक्षुषाद्यसंभवान्मानसानुधावनं । कथंचिदिति । अन्यपदार्थैकदेशभेदे अभेदसंबन्धेन साध्यवदनुयोगिताकस्य भाने धर्मिपारतन्त्र्येण साध्यवतोऽपि तादृशानुयोगितासंबन्धेन तत्र भानोपगमादनुमित्यौपयिकव्याप्तेरपि ततो लाभः । नील इति कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकभेदाभाववति नीलघटे तादृशभेदबोधकतया तद्वाक्यस्याप्यप्रामाण्यं न संभवतीति तादृशभेदाप्रसिद्धिरिति भावः । कम्बुग्रीवादिमत्त्वावच्छिन्नत्वशून्यप्रतियोगितायां तादृशावच्छिन्नत्वावगाहितया संसर्गकोटौ भ्रमत्वोपगमे तु तुल्यन्यायेन दोषमाह—पट इति । यद्वा कम्बुग्रीवादिमत्प्रतियोगिकभेदभानोपगमे पट इत्यादिवाक्यस्य प्रामाण्यनिर्वाहेऽपि नील इत्यादिवाक्याप्रामाण्यं न निर्वहति । कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकभेदभानोपगमे तु नील इत्यादेरप्रामाण्यनिर्वाहेऽपि पट इत्यादेः प्रामाण्यं न निर्वहतीति बोध्यम् । तादृशावच्छेदकत्वसामान्याभावनिवेशे कम्बुग्रीवादिमत्त्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकतात्वापेक्षया घटत्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकतात्वादेर्लघुतया प्रतियोगितावच्छेदकतया सामान्याभावाप्रसिद्धिरतः कूटनिवेशः । नन्वेवं वह्निर्न वह्निरिति प्रतीतिव्यवहारयोरापत्तिः । तादृशेन्धनत्वावच्छिन्नभेदसत्त्वात् । नच तत्र तत्तदवच्छिन्नभेदभेदकूटाभानोपगमान्न दोष इति वाच्यम् । इन्धनं न वह्निरिति प्रयोगानुपपत्तेः । नच पारिभाषिकावच्छेदके अन्वयितावच्छेदकधर्मसामानाधिकरण्यनिवेशान्न दोष इति वाच्यम् । कालिकादिसंबन्धेन इन्धनत्ववह्नित्वयोः समानाधिकरणत्वात् संबन्धविशेषविवक्षायामपि, वह्निर्न वह्नीन्धनाद्यन्यतर इति प्रयोगा-

न्यायरत्नं ।

अथ पञ्चमलक्षणम् । शाब्दबोधस्यापि कथंचिदिति । साध्यवत्पदार्थे साध्यवत्त्वावच्छिन्नप्रतियोगिताकेऽभेदेनान्यपदार्थैकदेशे भेदेऽन्वीयमाने धर्मिपारतन्त्र्येण साध्यस्यावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयः स्वीक्रियते । एवमन्यपदार्थे भेदवन्निरूपितात्मकेऽभेदेन वृत्तित्वेऽन्वीयमाने धर्मिपारतन्त्र्येणान्यस्य निरूपितत्वसंबन्धेनान्वयः स्वीक्रियते । एवं वृत्तित्वपदार्थे वृत्तित्वप्रतियोगिताकात्मकेऽभेदेन वृत्तित्वात्मके वा साक्षात्प्रतियोगितासंबन्धेन नञात्मकनि-

दिवाक्यस्य च प्रमाणत्वात्। अन्वयितावच्छेदकनिरूपितपारिभाषिकमवच्छिन्नत्वं प्रतियोगितायां भासत इत्युपेयम्। अतः साध्यवदन्य इत्यादौ मतुबन्तप्रतिपाद्यतावच्छेदकस्य साध्यसंबन्धस्य साध्यापेक्षया गुरुतयाऽनवच्छेदकत्वेऽपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः

कृष्णंभट्टीयं।

पत्तिः। तादृशे इन्धनत्वावच्छिन्नभेदसंभवादिति। किंच घटो न प्रमेयगगनमिति प्रयोगानुपपत्तिः। गगनत्वापेक्षया प्रमेयगगनत्वस्य गुरुतया तदवच्छिन्नभेदाप्रसिद्धेः। अतः तन्निरूपितपारिभाषिकावच्छिन्नत्वं प्रतियोगितायां भासत इति वक्तव्यम्। तच्चेदवच्छिन्नत्वं यदि स्वनिष्ठसंबन्धीत्यादिरूपं तदा संयोगेन गगनत्वविशिष्टसंबन्धिनोऽप्रसिद्धिरिति चेत्। अत्रकेचित्। अन्वयितावच्छेदकव्यापकधर्मावच्छिन्नत्वे तात्पर्यं। एवंच प्रमेयगगनत्वरूपं यदन्वयितावच्छेदकं तद्व्यापकं यद्गगनत्वं तदवच्छिन्नत्वमेव पारिभाषिकतदवच्छिन्नत्वमित्यदोषः। स्वविशिष्टसंबन्धीत्यत्र संबन्धिपदं संपातायातं स्वात्मकं यद्विशिष्टं इति वा विवक्षितं। अभावपदं च भेदार्थकमिति तल्लाभः। नन्वेवं वह्निर्न वह्निरित्यादिप्रयोगापत्तिर्दुर्वारैव। वह्नित्वरूपान्वयितावच्छेदकव्यापकीभूतो यो वह्निघटोभयत्वरूपो धर्मः तदवच्छिन्नभेदस्य बाधितत्वात्। नच व्यापकतायां प्रतियोगिवैयधिकरण्यं न देयं। तथाच वह्निघटोभयवृत्तिद्वित्वं वह्नित्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वेन वह्नित्वाव्यापकमेवेति वाच्यम्। वह्निर्न घटपटोभयमिति प्रयोगानुपपत्तेः। भेदप्रतियोगितावच्छेदकीभूतघटपटोभयत्वस्य अन्वयितावच्छेदकीभूतद्वित्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वेन तद्व्यापकत्वसंभवात्। एको न द्वावित्यादिप्रयोगानुपपत्तिश्च। एवंच व्यापकतायां प्रतियोगिवैयधिकरण्यस्यावश्यकतया वह्निर्न वह्निरिति व्यवहारो दुर्वार एवेति चेन्न। अन्वयितावच्छेदकधर्मसमनियतधर्मावच्छिन्नत्वमेव तद्धर्मनिरूपितपारिभाषिकमवच्छिन्नत्वं घटवन्ह्युभयत्वं च न वह्नित्वेन समनियतमित्यदोषः। नचैवमपि केवलान्वयिवह्नित्वेन समनियततार्णातार्णदहनोभयत्वावच्छिन्नभेदमादाय वह्निर्न वह्निरिति प्रयोगापत्तिरिति वाच्यम्। अन्वयितावच्छेदकसमनियतधर्म-

न्यायरत्नं।

पातार्थेऽन्वीयमाने साध्यवद्विशेषितभेदवद्विशेषितवृत्तित्वत्वावच्छिन्नस्यापि तादृशवृत्तित्वत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयः स्वीक्रियत इति व्याप्तेः शाब्दबोधः। न चाभेदेनैकविशेषितापरपदार्थघटितधर्मावच्छिन्नाभावाद्भेदेनैकपदार्थतावच्छेदकविशेषतापरपदार्थघटितधर्मावच्छिन्नाभावोऽन्य एव। प्रतियोगितावच्छेदकभेदादिति कथं निरुक्तान्वय इति वाच्यम्। समनियताभावानामैक्योपगमेन तादृशधर्मावच्छिन्नाभावयोर्भेदविरहात्। **अप्रामाण्यादिति** ।

पारिभाषिकतदवच्छिन्नत्वं(च) तद्विशिष्टसंबन्धिनिष्ठाभावीया या या प्रतियोगिता तदवच्छेदकत्वाभावकूटवदवच्छिन्नत्वं । एतादृशावच्छिन्नत्वस्य संबन्धतया प्रातिस्विकरूपेण तत्तत्प्रतियोगिताव्यक्तीनां दु-

कृष्णंभट्टीयं ।

स्यान्वयितावच्छेदकसजातीयत्वेन विशेषणीयत्वात् । वस्तुतस्तु इहान्वयितावच्छेदकव्यापकत्वमन्वयितावच्छेदकावच्छिन्नानुयोगिताकभेदप्रतियोगिताकभेदप्रतियोगितावच्छेदकत्वरूपमेव निवेश्यमिति न कश्चिद्दोषः । एको न द्वाविति प्रत्ययस्य प्रतियोगिवैयधिकरण्यमनिवेश्यापि निर्वाहसंभवात् । वह्निघटोभयभेदमादाय वह्निर्न वह्निरिति प्रयोगापत्तेः । समनैयत्यनिवेशं विनापि वारणसंभवाच्च । एतेन व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपेण साजात्यनिवेशने इमौ न द्वाविति प्रत्ययप्रसङ्गः । अन्वयितावच्छेदकसमनियतत्रित्ववद्भेदसत्वादिति परास्तमित्याहुः । तदसत् । तथासति सत्तायां विशिष्टसत्ताभेदाभावेन सत्ता न सत्तेति प्रयोगवारणेऽपि गुणे न सत्तेति प्रयोगापत्तिः । विशिष्टसत्तात्वस्य सत्तात्वसमनियतत्वात् । तत्र विशिष्टसत्त्वभावसत्वात् । वस्तुतस्तु स्वविशिष्टसंबन्धिनिष्ठाभावः प्रतियोगिव्यधिकरणो बोध्यः तेन घटो न वह्निरित्यादौ वह्नित्वादेर्वह्निनिष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि न क्षतिः । संबन्धित्वं प्रतियोगिवैयधिकरण्यं चैकसंबन्धेन । तेन घटो न प्रमेयगगनमित्यादौ गगनाधिकरणाप्रसिद्धावपि तादात्म्येन विषयतया वा संबन्धिनः प्रसिद्धेर्न दोषः । तन्निष्ठगगनाभावस्य तेन संबन्धेन प्रतियोगिव्यधिकरणत्वाभावात् प्रतियोगितयोरेकसंबन्धावच्छिन्नत्वं बोध्यम् । अत्र लक्षणवाक्यात्साध्यवत्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावकूटवदवच्छिन्नत्वसंबन्धेन साध्यवत्त्वविशेषिता या प्रतियोगिता तादृशप्रतियोगिताकभेदवदधिकरणावृत्तित्वलाभेपि तावदंशो न व्याप्तिस्वरूपम् । साध्यवत्त्वं विहाय साध्यावच्छिन्नप्रतियोगिताकभेदं लक्षणे निवेश्य तावदंशस्यैव अनुमित्यौपयिकत्वादित्या-

न्यायरत्नं ।

अयं भावः । तत्र कम्बुग्रीवादिमत्प्रतियोगिकभेदभानोपगमे तस्य नीलघटेपि सत्वेन तादृशवाक्यस्य प्रामाण्यापत्तिरतोऽन्वयितावच्छेदककम्बुग्रीवादिमत्वावच्छिन्नत्वस्यैव प्रतियोगितायां भानमभ्युपेयं तस्य चाप्रसिद्धत्वात्संसर्गांशे भ्रमत्वमादाय तादृशवाक्यस्याप्रामाण्यं संपादनीयं तथासति पटः कम्बुग्रीवादिमदन्य इत्यादेः प्रामाण्यानिर्वाह इति । **तद्विशिष्टसंबन्धिनिष्ठाभावीया या या प्रतियोगितेति** । कम्बुग्रीवादिमत्वविशिष्टसंबन्धिनिष्ठाभावीयप्रतियोगितावच्छेदकतात्वापेक्षया घटत्वघटिततादृशावच्छेदकतात्वस्य लघुतया तादृशावच्छेदकत्वसामान्याभावप्रसिद्धिरतः कूटनिवेशः । अथात्र यत्संबन्धावच्छिन्नप्रतियोगितानिरूपितं पारिभाषिकावच्छेदकत्वं प्रत्यामनीयं तेन संबन्धेन संबन्धित्वं प्रतियोगित्वं च यदि विवक्ष्यते तदा समवायेन प्रमेयगगनं नास्तीत्यादावगतिः । समवाये गगनत्वविशिष्टसंबन्धिनोऽप्रसिद्धेः । यदिच तादात्म्यसंबन्धेनैकैकसंब-

ज्ञेयत्वेऽपि न क्षतिः। संबन्धज्ञानस्य विशिष्टबुद्धावनपेक्षितत्वात्[1]। अनुमितिं प्रति च साध्यावच्छिन्नप्रतियोगितावगाहिज्ञानमेव कारणं कल्प्यते लाघवात्। ननु साध्यसंबन्धावच्छिन्नप्रतियोगिताकत्वावगाहिज्ञानमित्यनुमित्यौपयिकव्याप्तिशरीरे तादृश्येव प्रतियोगिता निवे-

कृष्णंभट्टीयं।

शयवानाह—अनुमितिंप्रतीति। एवंच लक्षणवाक्यस्य साध्यावच्छिन्नप्रतियोगिताकभेदवदवृत्तित्वरूपार्थे तात्पर्यमित्याह—तादृश्येवेति। साध्यावच्छिन्नेत्यर्थः। ननु साध्यावच्छिन्नप्रतियोगिताकभेदस्यैव लक्षणघटकत्वेऽपि कम्बुग्रीवादिमत्त्वविशिष्टं घटाद्यपेक्षया गुरु यत्साध्यं तत्र साध्यावच्छिन्नप्रति-

न्यायरत्नं।

न्धेन वा तदा गुणे सत्ता नास्तीति स्यात्। गुणान्यत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगितानिरूपितनिरुक्तपारिभाषिकावच्छेदकत्वस्य सत्तात्वे सत्त्वादिति चेदत्र केचित्। येन येन संबन्धेन स्वविशिष्टसंबन्धित्वं प्रसिद्धं प्रत्येकं तत्तत्संबन्धावच्छिन्नत्वं संबन्धित्वप्रतियोगित्वयोर्निवेश्यावच्छेदकत्वाभावकूटरूपमेव व्यापकतावच्छेदकत्वं पारिभाषिकावच्छेद्यत्वशरीरे निवेशनीयम्। यदिच विषयितासंबन्धघटितं व्यापकतावच्छेदकत्वं कम्बुग्रीवादिमत्वनिरूपितं घटत्वे दुर्घटं तदा तत्संबन्धातिरिक्ता एव प्रसिद्धसंबन्धा ग्राह्या इति वदन्ति। परेतु यत्संबन्धावच्छिन्नप्रतियोगितानिरूपितपारिभाषिकावच्छेदकत्वं ग्राह्यं तेनैव संबन्धित्वं प्रतियोगित्वं च ग्राह्यं। नचैवं समवायेन प्रमेयगगनसंबन्धित्वाप्रसिद्धिरिति वाच्यम्। समवायेन तादृशगगनसंबन्धित्वं हि यदधिकरणानुयोगिकतत्संबन्धाप्रतियोगित्वतत्संबन्धप्रतियोगित्वोभयाभावः प्रमेयत्वविशिष्टगगने वर्तते तत्त्वमेव तच्च घटादौ प्रसिद्धम्। नचैवं तन्निष्ठाभावीयतत्संबन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं गगनत्वे दुर्घटमिति वाच्यम्। तन्निष्ठाभावीयतत्संबन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं हि तन्निष्ठाभावीयप्रतियोगितासामान्ये समवायावच्छिन्नत्वसमवेतनिष्ठत्वयद्धर्मावच्छिन्नत्वैतत्त्रित्वावच्छिन्नाभावस्तत्वमित्यस्य विवक्षितत्वादिति वदन्ति। **संबन्धज्ञानस्य विशिष्टबुद्धावनपेक्षितत्वादिति।** तत्प्रकारकबुद्धिं प्रत्येव तज्ज्ञानस्य हेतुत्वात्कूटसंसर्गकबुद्धौ कूटज्ञानानपेक्षणादिति भावः। ननु तादृशप्रतियोगितासंबन्धावच्छिन्नसाध्यसंबन्धवन्निष्ठप्रकारतानिरूपितभेदनिष्ठप्रकारतानिरूपितविशेष्यताशालिबोधजनकत्वप्रकारतानिरूपिताया वाक्यनिष्ठेच्छीयविशेष्यतातच्छाल्येतादृशतात्पर्यज्ञानस्यैव साध्यवदन्य इत्येतादृशवाक्यजन्यशाब्दबोधं प्रति हेतुतया तस्य च तादृशसंबन्धप्रकारताकत्वात्तज्ज्ञानाभावे तदनुपपत्तिरिति चेन्न। साध्यसंबन्धविशिष्टसंबन्धिनिष्ठाभावीयततत्प्रतियोगितावच्छेदकत्वाभावकूटवद्धर्मावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नसाध्यसंबन्धविशिष्टनिष्ठप्रकारतानिरूपितभेदनिष्ठप्रकारतानिरूपितविशेष्यताशालि-

---

१ ज्ञानेति का. पाठः.

श्यते कम्बुग्रीवादिमान्घटादित्यादौ विशेषदर्शिनामनुमितेः प्रामाणिकत्वे निरुक्तपारिभाषिकमवच्छिन्नत्वमेवानुमित्यौपयिकव्याप्तिघटकं । तादृशगुरुधर्मावच्छिन्नसाध्यकानुमानस्य केवलान्वयिसाध्यकसमशीलत्ववादिनस्तु स्वरूपसंबन्धावच्छिन्नत्वमेव व्याप्तिशरीरे निवेशयन्ति । **इति पञ्चलक्षणी समाप्ता ॥**

कृष्णंभट्टीयं ।

योगिताख्यप्रसिद्धेवेत्यत आह—**कम्ब्विति** । **निरुक्तेति** । साध्यविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकं यद्यत् तत्तद्व्यक्तित्वावच्छिन्नभेदकूटवद्धर्मावच्छिन्नप्रतियोगिताकभेदघटितं सर्वत्र लक्षणं कार्यमित्यर्थः । पारिभाषिकावच्छिन्नत्वं न निवेशनीयं । किंतु स्वरूपसंबन्धरूपावच्छिन्नत्वमिति मतान्तरमाह—**तादृशेति** । उभयसाधारणकेवलान्वयित्वं च अत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्साध्यकत्वं । तथाच कम्बुग्रीवादिमत्साध्यकाव्याप्तिरपि मूलकाराभिमतैवेति भावः । केवलान्वयिभिन्ने द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्वत्वविशिष्टस्य केवलद्रव्यत्वाद्गौरवेण तद्भेदाप्रसिद्ध्या अव्याप्तिरधिकैवेत्यस्वरसः ॥ **इति कृष्णंभट्टीये पञ्चलक्षणीविवरणम् ।**

न्यायरत्नं ।

बोधजनकत्वनिष्ठप्रकारतानिरूपितइच्छीयविशेष्यतासंबन्धेन साध्यसंबन्धविशिष्टप्रकारकवाक्यविशेष्यकज्ञानस्यैव तादृशशाब्दबोधहेतुतया तस्य च तादृशसंबन्धप्रकारकत्वाभावेन तादृशसंबन्धज्ञानाभावेपि न तदनुपपत्तिः । शाब्दबोधे संबन्धतात्पर्यज्ञानं न हेतुः किंतु प्रकरणज्ञानमेवेति मताभिप्रायेणेति केचित् । अनियतसंबन्धस्थल एव संबन्धतात्पर्यज्ञानं हेतुरित्यभिप्रायेणेदमुक्तसंबन्धस्य नियतत्वान्न तज्ज्ञानापेक्षेत्यपरे । यद्यपि प्रतियोगितानां तत्तद्व्यक्तित्वेन निवेशे तत्तत्प्रतियोगिताव्यक्त्यवच्छेदकत्वाभावकूटवद्धर्मावच्छिन्नत्वमेव पर्यवसितं तच्च न कम्बुग्रीवादिमत्त्वस्य संबन्धः कम्बुग्रीवादिमत्त्वप्रतियोगिकपदार्थाघटितत्वात्तथापि स्वसमानाधिकरणतादृशकूटवद्धर्मावच्छिन्नत्वमेव संबन्धतया विवक्षितं सामानाधिकरण्यघटकाधिकरणत्वांशस्य कम्बुग्रीवादिमत्वप्रतियोगिकतया तद्घटितस्य निरुक्तकूटवद्धर्मावच्छिन्नत्वस्य कम्बुग्रीवादिमत्त्वसंबन्धत्वनिर्वाहः । यद्वा स्वविशिष्टसंबन्धिनिष्ठाभावीयप्रतियोगितावच्छेदकत्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदकूटवद्धर्मावच्छिन्नत्वमेव संबन्धउभयावृत्तिपर्यन्तमुपलक्षणं । तस्य कम्बुग्रीवादिमत्त्वप्रतियोगिकपदार्थघटितत्वात्तत्संबन्धत्वनिर्वाह इति ध्येयम् । **(इति पञ्चलक्षणी संपूर्णा) ॥**

अथ सिंहव्याघ्रलक्षणे ।

नापीति । साध्यमसमानाधिकरणं यस्य, यदधिकरणान-

साध्यासामानाधिकरण्यानधिकरणत्वलक्षणे यदि तदधिकरणावृत्तिरूपासामानाधिकरण्यं निवेश्यते, तदा द्रव्यं सत्त्वादित्यादावतिव्याप्तिः। सत्तायाः द्रव्यत्वाधिकरणवृत्तितया तादृशासामानाधिकरण्यानधिकरणत्वात्। तदनधिकरणवृत्तित्वस्यासमानाधिकरणपदार्थत्वेऽनन्तरवक्ष्यमाणलक्षणाभेद इत्यतो व्याचष्टे—साध्यमिति। असामानाधि-

कृष्णंभट्टीयं ।

अथ सिंहव्याघ्रलक्षणविवरणम् ।

तदधिकरणेति । यद्यपि समानमधिकरणं यस्येति न तथा । अधिकरणतावद्वृत्त्यधिकरणतानिरूपकमितियावत् । तस्य भावः सामानाधिकरण्यम् । साध्यस्य सामानाधिकरण्यं साध्यसामानाधिकरण्यं साध्यसामानाधिकरण्यस्य अभावः साध्यासामानाधिकरण्यमित्यव्ययीभावः । तथाच साध्याधिकरणावृत्तित्वलाभः । तत्र ससंबन्धिकार्थबोधकोत्तरपदघटितसमुदायेन समं नञ्समास इति नञ्मध्यनिवेशोपपत्तिः । ननु न सामानाधिकरण्यमसामानाधिकरण्यमित्यव्ययीभावोत्तरं साध्यपदषष्ठीतत्पुरुषो भट्टाचार्यसंमतः। येन समासाप्रविष्टपदार्थान्वयस्याव्युत्पन्नतया अव्ययीभावसमासघटकसमानपदार्थे अधिकरणे साध्यपदार्थानन्वयप्रसंगभयेन समासपदस्य साध्याधिकरणे लक्षणायाः साध्यपदस्य तत्तात्पर्यग्राहकतायाश्च स्वीकारेण असा-

न्यायरत्नं ।

अथ सिंहव्याघ्रलक्षणविवरणम् ।

तदधिकरणावृत्तित्वरूपमिति । तदन्विताधिकरणवृत्तित्वाभावरूपमित्यर्थः । तेन साध्यस्यासामानाधिकरण्यपदार्थाघटकत्वेपि न क्षतिः । इदं च समानमधिकरणं यस्य स समानाधिकरणः। तस्य भावः सामानाधिकरण्यं साध्यस्य सामानाधिकरण्यं साध्यसामानाधिकरण्यं न साध्यसामानाधिकरण्यं साध्यासामानाधिकरण्यमिति व्युत्पत्तिमभिप्रेत्य। तादृशव्युत्पत्तौ समानमधिकरणं यस्येत्यत्र यत्पदोत्तरषष्ठ्या आधेयत्वमर्थः समानपदस्याधेयतानिरूपकत्वमर्थः अधिकरणपदार्थः स एव समानपदार्थैकदेशाधेयतायां षष्ठ्यर्थाधेयताया अन्वयः समानपदार्थस्याधिकरणपदार्थेऽभेदेनान्वयस्तथाच यन्निष्ठाधेयतानिरूपकाभिन्नमधिकरणमिति विग्रहवाक्याद्बोधः । समानाधिकरणेति समासवाक्ये आधेयतानिरूप-

करणं यस्येत्यत्रासमानाधिकरणपदस्य स्वानधिकरणाधिकरणार्थकत्वे

न्यायरत्नं ।

काऽधिकरणनिरूपिताधेयतावान् लक्षणयाऽधिकरणपदार्थः समानपदं। तादृशार्थे लक्षणा तात्पर्यग्राहकमेव । समानाधिकरणपदोत्तरभावप्रत्ययेन तादृशाधेयत्वं बोध्यते । साध्यस्य सामानाधिकरण्यमित्यत्र साध्यपदोत्तरषष्ठ्यर्थं आधेयत्वं तस्य सामानाधिकरण्यपदार्थघटकाधेयतायामन्वयस्तादृशसाध्यसामानाधिकरण्यपदार्थस्य नञर्थेऽभावेऽन्वय इति साध्यनिष्ठाधेयतानिरूपकाधिकरणनिरूपितवृत्तित्वाभावः साध्यासामानाधिकरण्यपदार्थः । **तदनधिकरणवृत्तित्वस्येति ।** समानमेव सामानं साध्यस्य सामानं न भवतीति साध्यासामानं तदधिकरणं यस्य स साध्यासामानाधिकरणस्तस्य भावः साध्यासामानधिकरण्यमिति विग्रहे, समानपदार्थः आधेयतानिरूपकं तदेकदेशाधेयतायां साध्यपदोत्तरषष्ठ्यर्थाधेयताया अन्वयः नञर्थो भेदवान् तदेकदेशे भेदे प्रतियोगितया समानपदार्थान्वयः तथाच साध्यनिष्ठाधेयतानिरूपकभेदवान्साध्यासामानपदार्थः साध्यासामानमधिकरणं यस्येति बहुव्रीहावधिकरणपदार्थः आधेयतानिरूपकं तदेकदेशाधेयतायां यत्पदोत्तरषष्ठ्यर्थाधेयताया अन्वयः तथाच यन्निष्ठाधेयतानिरूपकं साध्यनिष्ठाधेयतानिरूपकभिन्नमिति विग्रहवाक्यार्थः समासवाक्ये साध्यानधिकरणवृत्तिर्लक्षणयाऽधिकरणपदार्थः साध्यासामानपदं तादृशलक्षणातात्पर्यग्राहकं भावप्रत्ययेन तादृशवृत्तित्वं बोध्यत इति साध्यानधिकरणवृत्तित्वं साध्यासामानाधिकरण्यपदार्थ इति केचित् । परेतु साध्यपदं साध्याधिकरणलक्षणं समानपदस्याभिन्नमर्थः भावप्रधानो निर्देशः यद्वा अभिन्नत्वं तदर्थस्तथाच साध्यसमानमित्यस्य साध्याधिकरणाभिन्नत्वमित्यर्थः ततश्च साध्यसमानं न भवतीति व्युत्पत्त्या नञोऽभाववति लाक्षणिकतया साध्याधिकरणाभेदाभाववान्साध्याधिकरणभिन्नपर्यवसितः साध्यासामानपदार्थः अधिकरणत्वादिवद्भेदप्रतियोगिकाभावरूपस्य स्ववृत्त्युभयावृत्तिधर्मवत्वात्मकतादात्म्यरूपस्य वाऽभेदस्यापि ससंबन्धिकेन वृत्तित्वेन वा घटिततया ससंबन्धिकत्वान्नञो मध्यनिवेशस्यापि साधुत्वाविघटकत्वात्तादृशार्थकसाध्यासामानपदेनाधिकरणपदस्य बहुव्रीहौ भावप्रत्यये च साध्यानधिकरणवृत्तित्वं साध्यासामानाधिकरण्यपदाल्लभ्यत इति वदन्ति । **वक्ष्यमाणलक्षणाभेद इति ।** साध्यवैयधिकरण्यानधिकरणत्वरूपलक्षणार्थाभेद इत्यर्थः तत्रापि साध्यस्य वि अधिकरणं यस्य स साध्यव्यधिकरणस्तस्य भावः साध्यवैयधिकरण्यमिति विग्रहे वि पदस्याधिकरणं भेदश्च खण्डशक्त्यार्थः अव्ययानामनेकार्थत्वात्षष्ठ्यन्तसाध्यपदार्थान्विताधिकरणस्य भेदे तस्य चाधेयतानिरूपकरूपाधिकरणपदार्थेऽधिकरणपदार्थैकदेशाधेयतायां यत्पदोत्तरषष्ठ्यर्थाधेयत्वस्यान्वये यन्निष्ठाधेयतानिरूपकं साध्याधिकरणभिन्नमिति विग्रहवाक्याद्बोधः । समासे तु साध्याधिकरणभिन्नवृत्तिर्लक्षणयाऽधिकरणपदार्थः पूर्वपदे तात्पर्यग्राहके भावप्रत्ययेन तादृशवृत्तित्वं बोध्यत इति साध्यानधिकरणवृत्तित्वं साध्यवैयधिकरण्य-

द्रव्यं सत्त्वादित्यादावतिव्याप्तिः । द्रव्यत्वादेः सत्ताद्यनधिकरणकत्वविरहेण यत्पदेन सत्त्वादेरुपादानासंभवात् । सत्तावान् द्रव्यत्वादित्या-

कृष्णंभट्टीयं ।

मानाधिकरण्यशब्दादेव साध्याधिकरणावृत्तित्वलाभो भवेत् । तथाच कथं तदधिकरणावृत्तित्वरूपासामानाधिकरण्यमित्यभिधानमिति । तथापि तदन्विताधिकरणेत्यर्थविवक्षणान्न दोषः । स्वरीतौ ससंबन्धिकार्थत्वप्रकाशनायैव तथोक्तमिति बोध्यम् । समानमेव सामानं न सामानं असामानं साध्यस्य असामानं साध्यासामानम् तत् अधिकरणं यस्य सः साध्यासामानाधिकरणः तस्य भावः साध्यासामानाधिकरण्यं साध्यानधिकरणवृत्तित्वमिति यावत् । अस्मिन्पक्षे पौनरुक्त्यं दर्शयति । **तदनधीति** । साध्यमसमानाधिकरणं यस्येति विग्रहवाक्यं असमानाधिकरणमित्याकारकबहुव्रीहिरूपोत्तरपदगर्भमिति प्रथमतो समानाधिकरणमिति बहुव्रीहेर्विग्रहः प्रदर्शनीयः । नच न समानं अधिकरणं यस्येत्येवंरूपः तत्र यदि नञर्थभेदे समानपदार्थस्य शैवालाद्यधिकरणादेः प्रतियोगितया अन्वयस्तदा साध्याधिकरणनिष्ठभेदप्रतियोगिसमानपदार्थीभूतशैवालाद्यधिकरणं प्रत्याय्येत । तथासति साध्यं असमानाधिकरणं यस्येति द्वितीयबहुव्रीहिविग्रहवाक्यात् यदधिकरणत्वावच्छिन्नप्रतियोगिताकभेदानुयोग्यधिकरणकं साध्यं प्रतीयेत । तच्च अतिव्याप्त्यादिग्रस्तमित्याह—**असमानाधिकरणं यस्येत्यादिना** । एवं च प्रथमबहुव्रीहिविग्रहवाक्ये नञर्थभेदे समानपदार्थस्य प्रतियोगितयान्वय इति न भ्रमितव्यं ॥ किंतु अनुयोगितयैवेति द्वितीयबहुव्रीहिविग्रहवाक्यजन्यबोधे यादृशार्थो

न्यायरत्नं ।

पदार्थः । पौनरुक्त्यापत्तिरिति क्वचित्पाठः । भिन्नकर्तृकमप्येकं लक्षणं वाक्यद्वयेनोपन्यस्यतो मणिकृत इति शेषः । **स्वानधिकरणाधिकरणार्थकत्व इति** । असमानाधिकरणपदेन असमानमधिकरणं यस्य तदसमानाधिकरणमिति विग्रहे समानपदार्थस्याधेयतानिरूपकस्य भेदविशिष्टरूपनञर्थैकदेशे भेदेऽन्वयः । तथाचाधेयतानिरूपकभिन्नमसमानपदार्थः अधिकरणपदार्थः आधेयतानिरूपकं तदेकदेशाधेयतायां षष्ठ्यन्तयत्पदार्थस्य यन्निष्ठत्वस्यान्वयः तथाच यन्निष्ठाधेयतानिरूपकमाधेयतानिरूपकभिन्नमिति विग्रहवाक्यार्थः । यद्यप्यसमानपदेनाधेयतानिरूपकसामान्यभेदो न विवक्षितुं शक्योऽप्रसिद्धत्वात् । तथापि समानपदस्याधेयताविशेषनिरूपकलक्षकत्वादधिकरणविशेषभिन्नमेव तत्पदेन विवक्षितमेतल्लाभायैव स्वानधिकरणेत्यत्र स्वपदमुपात्तम् । समासे तु स्वाधिकरणरूपाधिकरणविशेषभिन्नाधिकरणकं लक्षणयाऽधिकरणपदार्थः अतः समानपदं तात्पर्यग्राहकमिति स्वानधिकराणाधिकरणमसमानाधिकरणपदार्थः । **तदधिकरणानधिकरणकत्वपरतयेति** । असमानाधिकरणेत्यत्र नञ्व्यत्यासेन समानानधिकरणेति शब्दकल्पनया समानं न अधिकरणं यस्येति

दावव्याप्तेश्च । सत्त्वादेर्द्रव्यत्वाद्यनधिकरणाधिकरणकत्वादतस्तदधिकरणतया तत्पदं व्याचष्टे—**यदधिकरणेति** । यदधिकरणानधिकरणकं साध्यं तत्त्वानधिकरणत्वस्य व्याप्तित्वे, व्याप्तेर्विशिष्टैकार्थतानुपपत्त्या विशिष्टपरामर्शस्यानुमितिहेतुत्वानिर्वाहः । यत्वतत्त्वाननुगमेन तत्त्वाधिकरणत्वाभावकूटस्य निवेशनीयतया गौरवंचेत्याशयेन य-

कृष्णंभट्टीयं ।

विषयः तादृशार्थपरतामाह । **तद्धिकरणपरतयेति** । सचार्थः यदधिकरणत्वावच्छिन्नप्रतियोगिकभेदप्रतियोग्यधिकरणकं साध्यमित्येवंरूपः । यत्तु जगदीशेन साध्यं असमानाधिकरणं यस्येत्यस्य साध्यं यदधिकरणावृत्तीत्यर्थः । तत्त्वानधिकरणत्वं च लक्षणं । तत्रच वह्निमान्धूमादित्यादौ वह्निमात्रस्य तत्तद्धूमाधिकरणावृत्तित्वादव्याप्तिरिति द्वितीयकल्पोऽवतारितः । तत्रैतादृशार्थवर्णने किं बीजं । न तावत् द्रव्यं सत्त्वादित्यादावतिव्याप्तिवारणं । द्रव्यत्वस्य सत्ताधिकरणवृत्तित्वेनातिव्याप्तेः । अवतार्यकल्पेन तदुद्धारस्यात्रानुपयोगात् । यदि तु साध्यं यदधिकरणसामान्यवृत्तिभिन्नमिति नार्थः किंतु यदधिकरणयत्किंचिद्व्यक्तिवृत्तिभिन्नमिति, तदा तदतिव्याप्त्युद्धारेऽपि तृतीयकल्पाभेद एवेत्यभिप्रेत्य स्वयं द्वितीयकल्पोऽन्यथावतारितः । स्वाधिकरणानधिकरणकसाध्यकत्वानधिकरणकत्वोक्तौ त्वाह । **यत्त्विति** । अन्यथा व्यभिचारिण्यतिव्याप्तेः ।

न्यायरत्नं ।

व्युत्पत्तौ यदधिकरणमधिकरणविशेषभिन्नमिति विग्रहवाक्यार्थः । समासवाक्ये यदधिकरणनिष्ठभेदप्रतियोग्यधिकरणवृत्तिर्लक्षणयोत्तरपदार्थः पूर्वपदं तात्पर्यग्राहकमिति, तदधिकरणानधिकरणकमसमानाधिकरणपदार्थ इति केचित् । असमानाधिकरणमित्यत्र न समानमधिकरणं यस्य साध्यस्येति व्युत्पत्तिः । तत्र च समानपदार्थे शैवालाद्यधिकरणे यत्पदार्थसाध्याधिकरणभेदो विधेयः । ननु समानपदार्थभेदः साध्याधिकरणे विधेय इति नञ्व्यत्यासं विनाप्युक्तार्थलाभ इत्यन्ये । परेतु न समानमधिकरणं यस्य साध्यस्येति व्युत्पत्तौ यत्पदार्थसाध्यस्य समानपदार्थेऽधिकरणेऽन्वयस्तादृशाधिकरणविशेषितनञर्थभेदस्याधिकरणपदार्थे शैवालाधिकरणरूपेऽन्वय इति स्वीकारान्नञ्व्यत्यासं विनैव दर्शितार्थलाभः संभवतीति वदन्ति । **यदधिकरणानधिकरणं साध्यं तत्त्वानधिकरणत्वस्य व्याप्तित्वेऽपीति** । यद्यप्ययमर्थो न साध्यासामानाधिकरण्यानधिकरणत्वमिति लक्षणवाक्याल्लभ्यते । किंतु साध्यमसमानाधिकरणं यस्य तत्त्वानधिकरणत्वमिति विग्रहवाक्यादेव । तथापि तस्य तादृशलक्षणवाक्यतात्पर्यविषयत्वान्नासङ्गतिः । लक्षणवाक्यतात्पर्यविषयीभूतार्थस्यैव लक्षणत्वस्यान्यत्रोक्तत्वाल्लक्षणवाक्यजन्यशाब्दबोधविषयीभूतार्थस्तूत्तरलक्षणार्थाभिन्न इति हृदयम् । **गौरवं चेति** ।

धिकरणं साध्यं तत्त्वं, साध्यनिष्ठासामानाधिकरण्यप्रतियोगि-

त्वतत्त्वाघटितसाध्यासामानाधिकरण्यपदार्थमाह—**साध्यनिष्ठेति** । साध्यनिष्ठं यदसामानाधिकरण्यं स्वाधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तित्वाभावः। तत्प्रतियोगित्वं च तत्प्रतियोगिकोटिनिविष्टाधिकरणकत्वम्। साध्यनिष्ठाभावीयाधेयत्वनिष्ठप्रतियोगितायां निरूपितत्वसंबन्धेन यदवच्छेदकं तद्वृत्तित्वमिति यावत्। वह्निमान्धूमादित्यादौ साध्यनिष्ठाभावो ह्रदाधेयत्वाभावस्तदीयप्रतियोगितायां निरूपितत्वं उक्तसंबन्धेनावच्छेदको ह्रदादिः। तद्व्यक्तिवृत्तित्वानधिकरणत्वं धूमादाविति लक्षणसमन्वयः। अत्र साध्यनिष्ठाभावप्रतियोग्याधेयत्वं साध्यतावच्छेदकसंबन्धावच्छिन्नं ग्राह्यम्। अन्यथा वह्निमान्धूमादित्यादौ पर्वतादिसमवेतत्वाद्यभावमादायानुपपत्तेः। तथाच सत्तावान् सम-

कृष्णंभट्टीयं।

पदार्थमिति । साध्यासामानाधिकरण्ये शब्दे साध्ये असामानाधिकरण्यं यस्येति व्युत्पत्त्यन्तराङ्गीकारेण भावप्रधाननिर्देशात्साध्यनिष्ठासामानाधिकरण्ये प्रतियोगित्वलाभः। द्रव्यं सत्वादित्यादेर्वारणाय यत्किंचिदिति। ननु प्रतियोगित्वशब्देन सामानाधिकरण्ये निरूपकत्वग्रहणे तत्राभावीयत्वबाधः। अभावप्रतियोगित्वस्य सामानाधिकरण्यमात्रनिष्ठतया अतिव्याप्तेर्गृहीतुमशक्यत्वादत आह। **तत्प्रतियोगित्वंचेति** । प्रतियोगिघटकत्वेनाधिकरणोपादाने शिरोवेष्टनेन नासास्पर्शरीतिभयेन तत्प्रतियोग्याधेयतानिरूपकत्वेन तदुपादेयं। स्वाधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तित्वप्रतियोगिकत्वरूपाभावविशेषणं हेयं। वैयर्थ्यात्। ननु संयुक्तत्वासंयुक्तत्वोभयाभावप्रतियोग्याधेयतानिरूपकतायाः पर्वतादौ सत्वादव्याप्तिरित्यतोऽवच्छेदकत्वं विवक्षयति। **साध्येति** । तादृशप्रतियोगितावच्छेदकस्य अयोगोलकवृत्तित्वत्वे पर्याप्तत्वादतिव्याप्तिः। हेतुतावच्छेदकसंबन्धावच्छिन्नतद्वृत्तित्वनिवेशे च

न्यायरत्नं।

इदमुपलक्षणम्। असर्वज्ञदुर्ज्ञेयतापि द्रष्टव्या। **साध्यनिष्ठेति** । साध्येऽसामानाधिकरण्यं स्वाधिकरणयत्किंचिद्व्यक्तिवृत्तित्वाभावो यस्य तत्साध्यासामानाधिकरण्यमिति व्युत्पत्त्या भावप्रधाननिर्देशात्साध्यनिष्ठासामानाधिकरण्यलाभ इति केचित्। असामानाधिकरण्यप्रतियोगित्वस्य सामानाधिकरण्य एव सत्त्वाद्व्यभिचारिणि वह्न्यादिहेतुकेऽतिव्याप्तिरत आह—**तत्प्रतियोगित्वंचेति** । **साध्येति** । तादृशावच्छेदकत्वस्यायोगोलकवृत्तित्वत्वे पर्याप्तत्वादतिव्याप्तिरतो

वायित्वादित्यादौ साध्यनिष्ठाभावीयसमवेतत्वनिष्ठप्रतियोगितावच्छेदकाधिकरणाप्रसिद्धेरव्याप्तिः। वह्निमान्धूमादित्यादावपि धूमादावयोगोलकीयवह्न्यादिनिष्ठपर्वतादिवृत्तित्वाभावप्रतियोगितावच्छेद-

कृष्णंभट्टीयं।

असंभव इत्यतो निरूपितत्वसंबन्धेनेत्युक्तं। **समवायित्वं**। समवायानुयोगित्वं। स्वरूपसंबन्धेन हेतुः। उत्तरकल्पेऽपि हेतुतावच्छेदकसंबन्धेन वृत्त्यप्रसिद्धेः समवायेन हेतूपेक्षा। ननु समवेतत्वासमवेतत्वोभयाभावमादाय तादृशप्रतियोगिताप्रसिद्धेरधिकरणाप्रसिध्यनुधावनं तादृशाभावप्रतियोगितावच्छेदकताया आधेयतात्वादौ सत्त्वेऽप्यधिकरणे तदसत्वादिति। ननु साध्यनिष्ठाभावप्रतियोग्यधिकरणमेव विवक्षणीयं तत्र साध्यतावच्छेदकसंबन्धावच्छिन्नाधेयतासंबन्धावच्छिन्नत्वेन प्रतियोगितानिवेशान्न दोषः। तादृशेन व्यधिकरणेन सत्तायां सामान्याद्यभावसंभवादित्यत आह—**वह्निमानिति**। **अयोगोलकेति**। अथ महानसीयवह्न्यादौ पर्वतवृत्तित्वाभावसत्वेनैवाव्याप्तेः सत्वादयःपिण्डीयवह्न्यनुधावनं व्यर्थम्। नच यद्रूपावच्छिन्नसामानाधिकरण्याभावः साध्यनिष्ठः तदन्यहेतुतावच्छेदकवत्वं तदर्थ इति तत्सार्थक्यमिति वाच्यं। द्रव्यं सत्वादित्यादावतिव्याप्त्युन्मार्जनापत्तेः यद्रूपावच्छिन्नयत्किंचिद्व्यक्तिवृत्तित्वाभावविवक्षणे अयःपिण्डीयवह्न्यनुधावनवैयर्थ्यतादवस्थ्यम्। मैवम्। यदि ह्रदादिवृत्तित्वाभावमादायातिव्याप्तेर्वारणाय यद्यद्व्यक्तिवृत्तित्वाभावकूटवत्साध्यं तत्तद्व्यक्तिवृत्तित्वानधिकरणत्वं विवक्ष्यते तदा वह्निमान्धूमादित्यादौ यावन्ति हेतुमन्ति तत्तद्व्यक्तिवृत्तित्वाभावकूट-

न्यायरत्नं।

निरूपितत्वसंबन्धेन यदवच्छेदकमिति। **समवायित्वं** समवायानुयोगित्वं स्वरूपसंबन्धेन हेतुः। साध्यतावच्छेदकसंबन्धावच्छिन्नत्वविवक्षणेऽपि समवायेन वृत्त्यप्रसिद्ध्याऽव्याप्तेर्दुर्वारत्वात्समवायेन हेतूपेक्षा। समवेतत्वासमवेतत्वोभयाभावमादाय तादृशप्रतियोगित्वप्रसिद्धेरवच्छेदकाधिकरणाप्रसिद्ध्युद्भावनम्। ननु साध्यनिष्ठाभावप्रतियोग्यधिकरणत्वमेव विवक्षणीयम्। प्रतियोगिता च साध्यतावच्छेदकसंबन्धावच्छिन्नाधेयतासंबन्धावच्छिन्नत्वेन विशेषणीया। सत्तायां समवायावच्छिन्नाधेयतया व्यधिकरणसंबन्धेन सामान्याभावसंभवान्न दोषः। नच वह्न्यादौ संयोगावच्छिन्नाधेयतासंबन्धेन पर्वतह्रदोभयाभावमादाय तत्प्रतियोगितायाः पर्वते सत्वादव्याप्तिरिति वाच्यम्। व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताया विवक्षणीयत्वादत आह—**वह्निमान्धूमादित्यादाविति**। **अयोगोलकीयेति**। अथ महानसीयवह्न्यादौ पर्वतवृत्तित्वाभावसत्त्वादव्याप्तिसंभवेऽयोगोलकीयवह्निपर्यन्तानुधावने किं बीजमिति चेद्धूमवान्वह्नेरित्यादौ ह्रदादिवृत्तित्वाभावमादायातिव्याप्तेर्वारणाय यद्यद्व्यक्तिवृत्तित्वाभाववत्साध्यं तत्तद्व्-

त्वम्, साध्यनिष्ठाधेयत्वनिरूपकाधिकरणवृत्तित्वमिति यावत् ।

कपर्वतादिवृत्तित्वादव्याप्तिः । साध्यतावच्छेदकव्यापकीभूततदभाव-निवेशे गौरवमित्याशयेन फलितार्थमाह—साध्यनिष्ठाधेयत्व-

कृष्णंभट्टीयं ।

स्यापि संभवमाविष्कर्तुं अयःपिण्डीयवह्न्यनुधावनात् । संख्यावान्परिमाणादित्यादौ यत्किंचिद्धटाद्येकतरवृत्तित्वाभावघटितकूटमादायाव्याप्तेः सत्वेऽपि न क्षतिः । विषमव्याप्तेति वदतां तर्कालंकाराणामेव तत्क्षतेः । वस्तुतस्तु साध्यनिष्ठो यद्रूपावच्छिन्नसामानाधिकरण्याभाव इत्येव साध्यनिष्ठासामानाधिकरण्ये प्रतियोगित्वमिति दीधित्यर्थः । तत्र साध्यासामानाधिकरण्येत्यादिलक्षणे प्रथमत एव द्रव्यं सत्वादित्यादावतिव्याप्तिः शङ्किता । तस्याश्चरमनिष्कर्षेणैव वारणं मध्यार्थाश्चाव्याप्तिवारका एवेति यथाश्रुतसंदर्भः । तमनुरुन्धानानामयःपिण्डीयवह्नेरनुधावनं संगच्छत एव । एवंच व्यधिकरणबहुव्रीहिरूपसाध्यासामानाधिकरण्ये शब्दार्थस्य द्रव्यं सत्वादित्यादावतिव्यापकतया अतिजघन्यत्वमालोच्योक्तद्वारकप्रकारस्य विषमव्याप्ते पर्वतीयादिवह्नौ महानसादिवृत्तित्वाभावमादाय समव्याप्ते चाव्याप्तौ न कश्चिद्विरोधः । नच सामानाधिकरण्यस्याव्याप्यवृत्तित्वमतमवलम्ब्य द्रव्यं सत्वादित्यादावतिव्याप्तिः कुतो न वार्यत इति वाच्यं । संख्यावान्परिमाणादित्यादिसमव्यापके क्रियाद्यवच्छेदेन साध्ये सामानाधिकरण्याद्यभावमादायाव्याप्तेः । साध्याधिकरणावच्छेद्यत्वविशेषणदाने च द्रव्यं सत्वादित्यादावतिव्याप्तेः हेयत्वाधिकरणावच्छेद्यत्वोक्तौ द्रव्यं गगनघटत्वान्यतरत्वादित्यादौ घटत्वादेः साध्यासंबन्धित्वेनानवच्छेदकत्वेनातिव्याप्तेः तदव्याप्यवृत्तित्वस्यानभिमतत्वाच्च । साध्यतावच्छेदकव्यापकेति । सर्वत्र सत्तावान्समवायत्वादित्यादावव्याप्तिर्नोद्धृतैव आधेयतासंबन्धावच्छिन्नाधिकरणाभावस्य वृत्त्यनियामकसंबन्धावच्छिन्नप्रतियोगिताकत्वेनाप्रसिध्या निवेशासंभवादिति चेत्तर्हि साध्यतावच्छेदकसंबन्धान्यसाध्यप्रतियोगिकसंबन्धान्यसंबन्धावच्छिन्नत्वं आधेयतायां निवेशनीयं । नन्वेवं वह्निमान्धूमादित्यादौ वह्नौ स्वरूपसंबन्धावच्छिन्नपर्वतवृत्तित्वसंयोगसंबन्धावच्छिन्नपर्वतवृत्तित्वोभयाभावस्य स्वरूपसंबन्धावच्छिन्नपर्वतवृत्तित्वाभावस्य च सत्वादव्याप्तिः । नच तत्प्रतियोगितावच्छेदककोटावाधेयतात्वस्याप्यन्तर्भावः । अन्यथा वह्नौ संयोगसंबन्धावच्छिन्नपर्वतवृत्तित्वसत्वेन तदभावदौर्लभ्यापातात् । तदन्तर्भावे च समानाधिकरणमात्रे तादृशसंबन्धेनावच्छेदकपर्याप्तिरित्येतादृशाभावो न लक्षणघटक इति वाच्यं । अधिकरणमात्रे निरूपकतासंबन्धेन अवच्छेदकपर्याप्तेः सकलमतसिद्धत्वात् । अन्यथा जलत्वप्रकारकप्रमाविशेष्यत्वादौ ताद-

मिति । अनिरूपकत्वमिह साध्यनिष्ठाधेयतात्वावच्छेदेन ग्राह्यम् । तेन वह्निमान्धूमादित्यादौ महानसादेः पर्वतीयवह्निनिष्ठाधेयत्वानि-

कृष्णंभट्टीयं ।

शाभावदौर्लभ्यापातादिति । मैवम् । तादृशाधेयतासामान्यवृत्तिप्रतियोगितानिवेशेनादोषात् । एवंच अवतारिकायां अयोगोलकीयवह्न्यादिवृत्तिपर्वतवृत्तित्वाभावशब्देनाप्येतन्मते साध्यतावच्छेदकान्यसाध्यप्रतियोगिकान्यसंबन्धावच्छिन्नसकलवृत्तित्वप्रतियोगिकाभावस्यैवाभिप्रेतत्वान्न तद्विरोधः । वस्तुतस्तु प्रमेयवान् घटादित्यादौ समवायसंबन्धेन साध्यतायां समवायान्यसाध्यप्रतियोगिकसंबन्धान्यसंबन्धः समवायसंबन्ध एव तदवच्छिन्नसामान्यवृत्तित्वमप्रसिद्धमेवेति नोक्तरीत्या आधेयताविशेषणं सम्यक् । किंतु साध्यतावच्छेदकसंबन्धावच्छिन्नत्वमेव । तथाच सत्तावान्समवायादित्यादावव्याप्तिमनुसृत्यैव वह्निमानित्यादिना दूषणान्तरारोपगौरवमित्यन्तग्रन्थ इत्येव सम्यक् । पूर्वं बहुव्रीहिविग्रहवाक्यजन्यबोधविषयस्य साध्यं यदधिकरणानुयोगिकभेदप्रतियोग्यधिकरणमित्येवंरूपस्य प्रदर्शनानन्तरं समानान्तरलब्धार्थं प्रदर्श्य पूर्वबहुव्रीहिर्व्यर्थ एव दीधितिकृता साध्यनिष्ठेत्यादिनाङ्गीकृतः । इदंतु बोध्यं । पूर्वबहुव्रीह्यात्मकसाध्यासामानाधिकरण्यशब्दस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमेवार्थः । आद्यो विग्रहार्थो तृतीयः समानान्तरार्थश्च परप्रत्ययार्थः नतु लक्षणघटक इति बोध्यं । अनिरूपकत्वं अनिरूपकत्वप्रतियोगिनिरूपकत्वं । आधेयतात्वावच्छेदेन आधेयतात्वव्यापकं । तथाच साध्यनिष्ठाधेयतात्वव्यापकनिरूपकत्वावच्छिन्नप्रतियोगिताकभेदवन्निरूपितवृत्तित्वानधिकरणत्वमिति निष्कर्षः । नच आधेयतात्वं आधेयतायामेव । वह्न्यधिकरणतारूपनिरूपकत्वंच पर्वतादावेवेति वैयधिकरण्यात्कथं व्यापकत्वमिति वाच्यं । स्वाश्रयाधेयताश्रयत्वसंबन्धेन आधेयतात्वं व्याप्यं,

न्यायरत्नं ।

त्तित्वानधिकरणत्वं यदि विवक्ष्यते, तदा वह्निमान्धूमादित्यादौ यावन्ति हेतुमन्ति तत्तद्व्यक्तिवृत्तित्वाभावकूटमपि संभवतीति ज्ञापयितुमित्यवेहि । **मू० साध्यनिष्ठाधेयत्वेति** । वैशिष्ट्यव्यासज्यवृत्तिधर्मातिरिक्तधर्मावच्छिन्नाधेयता अधिकरणभेदेन भिन्नैव नतु स्वावच्छेदकधर्मैक्येऽधिकरणभेदेऽप्यभिन्नेति मतानुसरणाद्वह्निनिष्ठसंयोगसंबन्धावच्छिन्नाधेयत्वानिरूपकाधिकरणे गुणादौ हेतुतावच्छेदकसंबन्धेन वृत्त्यप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तिरिति पूर्वपक्षानवकाश इति ध्येयम् । दर्शितदिशाऽधेयत्वभेदेऽपि यत्किंचिदाधेयतानिरूपकत्वाभावमादाय प्रसक्तामव्याप्तिशङ्कां साध्यनिष्ठाधेयतात्वरूपसामान्यधर्मपुरस्कारेण साध्यनिष्ठाधेयताया अनिरूपकत्वान्तविशेषणघटकता । नतु यत्किंचिदाधेयतात्वेनेति दीधित्याशयं प्रकटयन्वारयति । **अनिरूपकत्वमिहेति** । अनिरूपकत्वान्तविशेषणघटकाधेयत्वमित्यर्थः । **आधेयतात्वावच्छेदेनेति** । साध्यनिष्ठाधेय-

रूपकत्वेनाव्याप्तिः। एवं साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेनाधेयता निवेशनीया। तेन अयमात्मा आत्ममहाकालान्यतरत्वादित्यादौ कालस्य कालिकसंबन्धावच्छिन्नात्मत्वादिनिष्ठाधेयत्वादिनिरूपकत्वे-

कृष्णंभट्टीयं।

स्वनिरूपितवृत्तित्वसंबन्धेन स्वनिरूपकत्वं व्यापकमिति वह्न्यादिरूपसाध्यान्तर्भावेन व्यापकत्वोपपत्तेः। नच साध्यनिष्ठाधेयतात्वस्य द्रव्यत्वावच्छिन्नाधेयतासाधारणस्य निरुक्तसंबन्धेन जले सत्त्वात्तत्रोक्तसंबन्धेन वह्न्यधिकरणत्वरूपनिरूपकत्वासंभवः। यदि च द्रव्यत्वावच्छिन्नाधेयतानिरूपिताधिकरणत्वरूपस्य ह्रदादिसाधारणनिरूपकत्वस्य तादृशाधेयतात्वव्यापकतया गुणादेरेव तदवच्छिन्नप्रतियोगिताकभेदसत्त्वेन नाव्याप्तिः, तदा तुल्ययुक्त्या धूमवान्वह्नेरित्यादावतिव्याप्तिरिति वाच्यम्। आधेयतात्वव्याप्यत्वस्यापि निरूपकतायां निवेश्यत्वात्। आधेयतात्वव्याप्यत्वं च साध्यानुयोगिकत्वविशिष्टस्वाश्रयाश्रयत्वसंबन्धावच्छिन्नप्रतियोगिताकाधेयतात्वाभाववति स्वनिरूपितवृत्तित्वसंबन्धेनावृत्तित्वं स्वाश्रयनिरूपिताधेयताप्रवेशे वह्निसमानाधिकरणद्रव्यान्तरव्याप्यत्वभङ्गप्रसंगः। नचैवमपि वह्निमान् धूमादित्यादावव्याप्तिः। वह्न्यधिकरणयावन्मात्रनिष्ठवह्न्यधिकरणतारूपनिरूपकताया वह्निनिष्ठशैवालादिसाधारणद्रव्यत्वावच्छिन्नाधेयतात्वव्यापकत्वासंभवात्। द्रव्यत्वावच्छिन्ननिरूपकतायाश्च तादृशाधेयतात्वाव्याप्यत्वादिति वाच्यं। साध्यानुयोगिकत्वविशिष्टस्वाश्रयाश्रयत्वसंबन्धेन साध्यनिष्ठाधेयतात्वाधिकरणनिष्ठाभावप्रतियोगित्वरूपतादृशाधेयतात्वव्यापकत्वनिवेशात्। अथैवमभावे साध्यतावच्छेदकव्यापकत्वनिवेशे गौरवाभिधानमसंगतम्। ननु वैयत्यप्रवेशमपेक्ष्यलाघवात्। अत्रेदं समाधानमाकलयामहे। वृक्षवृत्त्याधेयताविशेषाभावस्य साध्यतावच्छेदकव्यापकत्वादव्याप्तिः। नच निरूपकतासंबन्धेन अधिकरणवदभावः प्रवेश्य इति वाच्यं। तथासति संयुक्तत्वसमवेतत्वयोः निरूपकताया एकजातीयत्वेन आधेयतायां साध्यतावच्छेदक-

न्यायरत्नं।

तात्वरूपसामान्यधर्मविशेषितमित्यर्थ इति केचित्। परेतु यद्याधेयतावच्छेदकभेदेनैवाधेयत्वतन्निरूपकत्वयोर्भेदस्तदाऽनिरूपकत्वम्। अनिरूपकत्वप्रतियोगिनिरूपकत्वम्। आधेयतात्वावच्छेदेन आधेयतात्वव्यापकम्। तथाच साध्यनिष्ठाधेयतात्वव्यापकनिरूपकत्वावच्छिन्नभेदो निवेश्य इति पर्यवसितम्। अत्र व्याप्यत्वं स्वाश्रयाश्रयत्वसंबन्धेन व्यापकत्वं तु स्वनिरूपिताधेयतावत्वसंबन्धेन ग्राह्यते नाधेयतात्वनिरूपकत्वयोर्वैयधिकरण्येऽपि न क्षतिः। नच धूमवान् वह्न्यधिकरणत्वादित्यादौ द्रव्यत्वावच्छिन्नाधेयतासाधारणसाध्यनिष्ठाधेयतात्वव्यापकनिरूपकत्वावच्छिन्नभेदस्य गुणादावेव सत्वादतिव्याप्तिरिति वाच्यम्। ताद-

कृष्णंभट्टीयं ।

संबन्धावच्छिन्नत्वविशेषणवैयर्थ्यात् । साध्यतावच्छेदकतदितरसंबन्धावच्छिन्नाधेयतयोर्व्यभिचारनिरूपकाधिकरणवत्वसत्वेन तदभावस्य साध्ये सत्वेनातिव्याप्तेश्च । तत्तन्निरूपकतात्वेन संसर्गत्वं तु विशेषरूपेण संबन्धत्वापत्तिपराहतं । नच साध्यतावच्छेदकसंबन्धावच्छिन्नाधेयतात्वावच्छिन्नत्वं प्रतियोगिताविशेषणमिति वाच्यं । एवमपि पूर्वक्षणवृत्तित्वविशिष्टपर्वतसंयुक्तत्वाभावमादायाव्याप्तेः । नच भावेऽव्याप्यवृत्तित्वं निरवच्छिन्नविशेषणतासंबन्धेन व्यापकत्वं वा निवेश्यमिति वाच्यं । एवमपि घटपर्वतसंयुक्तत्वोभयाभावावारणात् । नच प्रतियोगिवैयधिकरण्याघटितसाध्यतावच्छेदकव्यापकत्वोपादानादुक्ताभावद्वयनिरास इति वाच्यं । तथापि विरुद्धह्रदपर्वतसंयुक्तत्वोभयाभावावारणात् । तस्य केवलान्वयित्वेन तदभावासत्वादिति । नच तदवारणेऽपि न क्षतिः । पर्याप्तिसंबन्धेन तदवच्छेदकताया उभयत्रैव सत्वात् । तदुभयावृत्तित्वस्य धूमे संभवेनाव्याहयसत्वादिति वाच्यं । उभये पर्याप्तेः प्रत्येकपर्याप्तिनियतत्वात् । अतः साध्यतावच्छेदकसंबन्धावच्छिन्नाधेयतासामान्यवृत्तित्वं प्रतियोगिताविशेषणमावश्यकं । तच्चावच्छेदकताघटकनिरूपकत्वरूपसंबन्धनिरूपकतादृशसंबन्धावच्छिन्नाधेयतात्वव्यापकत्वमिति नासंभवः । स्वप्रतियोग्यसामानाधिकरण्यं चाभावविशेषणमिति पूर्वक्षणवृत्तित्वविशिष्टपर्वतसंयुक्तत्वाद्यभावनिरासः। तथाच साध्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदकव्यापकत्वमिति व्यापकताद्वयसत्वेऽप्यधिकविशेषणसत्वाद्गौरवाभाससंगतिरननुपादेयैवेति कृतबुद्धयो विदांकुर्वन्तु । अत्रेदं बोध्यं । ननु नैयत्यनिवेशं तत्र परंपराभेदानां संबन्धत्वं चापेक्ष्य द्रव्यत्वावच्छिन्नाधेयतावारणाय साध्यतावच्छेदकव्याप्ये धर्मान्तरावच्छिन्नसाध्यनिष्ठाधेयत्वान्तरनिष्ठन्यूनवृत्तितानिरूपकाधेयतान्यत्वं साध्यनिष्ठाधेयताविशेषणं तत्तद्वह्नित्वावच्छिन्नाधेयतामादायाव्याप्तिवारणायानवच्छिन्नान्तमन्तरविशेषणं । एतद्रूपादिसाध्यके तत्तत्क्षणावच्छिन्ने तद्रूपत्वावच्छिन्नाधेयतानामेव प्रसिद्धिः । साध्यनिष्ठाधेयतात्वावच्छेदेनेत्यस्यान्यत्रैव तात्पर्यम् । साध्यनिष्ठतादृशाधेयतानिरूपकत्वसामान्याभावश्च निवेश्यः । अथवा साध्यतावच्छेदकसमनियताधेयतैव निवेश्या । भङ्गीभेदलाभायैव लघुतरेऽप्याभासप्रकारे यथाश्रुतदीधित्यनुसारेण गौरवाभिधानम् । अथवा साध्यनिष्ठाधेयतायां साध्यतावच्छेदकावच्छिन्नाधेयतान्यत्वं, साध्यनिष्ठाधेयतात्वावच्छेदेनेत्येतल्लभ्यम् । अवच्छेदकानवच्छिन्नेत्यत्र पर्याहृयनुपादानात्सत्तात्वावच्छिन्नाधेयतायाः साध्यतावच्छेदकावच्छिन्नतया क्वचिद्व्यभिचारिणीति पङ्क्तिसंगतिः । तदतिव्याप्तिवारणाय पर्याहृयुपादानेतु नन्द्वयवैयर्थ्यात् । साध्यतावच्छेदकावच्छिन्नत्वोपादाने नायं दोष इत्यग्रिमग्रन्थसङ्गतिः । नच साध्यतावच्छेदकावच्छिन्नाधेयताया उपादानेऽपि पर्याहृयुपादानानुपादानाभ्यां पङ्क्तिग्रन्थौ संगच्छेते एवेति वाच्यम् । तथासति साध्यनिष्ठत्वपरित्यागेनोदक्षरता-

तदनधिकरणत्वमित्यर्थः । साध्यवद्भिन्नस्य च साध्यनिष्ठाधेय-

ऽपि नातिव्याप्तिः । तादृशाधेयत्वानिरूपकेत्यत्राधिकरणत्वमविवक्षितम् । तदनिरूपकमात्रं निविष्टम् । प्रथमतो द्रव्यं सत्त्वादित्यादावतिव्याप्तेराशङ्कितया व्यभिचारिसामान्य एवातिव्याप्तिमुद्धरति । **साध्यवद्भिन्नस्य चेति** । व्यभिचारनिरूपकाधिकरणस्येत्यर्थः ।

कृष्णंभट्टीयं ।

पत्तेः । एतत्सर्वमवच्छेदकभेदादाधेयताभेदमभ्युपेत्य । वस्तुतस्तु । साध्यनिष्ठाधेयतानिरूपकं यद्यत्तत्तद्भेदकूट एव निवेश्यः । अन्यथाधिकरणभेदेनैव निरूपकतानां भेदाद्वह्निमान्धूमादित्यादावव्याप्तेः । एवंच निरूपकताभेदेनैवाधेयतानां भेदात्साध्येतरवृत्त्याधेयतानां लक्षणघटकत्वादेव दोषः । साध्यनिष्ठाधेयतात्वावच्छेदेनेत्यस्याप्यत्रैव तात्पर्यं । एवंच तत्र समनैयत्यादिविवक्षणं सर्वं व्यर्थमेव । एतेन साध्यतावच्छेदकव्यापकाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वानधिकरणत्वे तात्पर्यमित्यपास्तम् । सत्तावान् समवायित्वादित्यादावव्याप्तितादवस्थ्याच्च । अथवा साध्यनिरूपितनिरूपकत्वाभावे तादृशनिरूपकभेदे वा तत्तात्पर्यम् । द्वितीये साध्येन रूपेणाधिकरणभेद इति नाभेद इति शिवम् ॥ अत्रापि समानाधिकरणपदे । अधिकरणपदद्वयमपि आधेयतानिरूपकपरं तत्र मध्ये नञ्प्रवेशे आधेयत्वानिरूपकवृत्तित्वलाभः स्यात्, नतु आधेयत्वानिरूपकाधिकरणवृत्तित्वलाभः । मध्यमाधिकरणलाभकासत्वात् । नचाधेयतानिरूपकाधिकरणं तदर्थः । तथाप्यनिरूपकाधिकरणतावदित्यनभिधायैवमभिधाने वक्रतैवेत्यालोच्य अधिकरणस्य लक्षणाघटकत्वमह । **तादृशेति** । यत्तु साध्यनिष्ठाधेयतानिरूपकत्ववदन्यत्वप्रवेशसंभवः । आधेयत्वाधिकरणत्वयोरधिकरणत्वान्तर्भावेनैवावश्यकनिरूपकभावव्यवहारोपपत्तौ साध्यवतः साध्यनिष्ठाधेयतानिरूपकत्वान्तरे मानाभावादित्यधिकरणपदं । तथाच तादृशाधेयतानिरूपकाधिकरणत्वावच्छिन्नभेदनिवेशान्न दोष इति । तन्न । अधिकरणमाधेयतानिरूपकमिति मुख्यव्यवहारानुरोधेन निरूपकत्वान्तरस्वीकारस्य सर्वाभिमतत्वात् । यदपि अधिकरणनिष्ठनिरूपकत्वान्तरोपगमेऽपि वह्निमान्पर्वतः तदधिकरणत्वैतदन्यतरत्वादित्यादौ हेतुमतः साध्यनिष्ठाधेयतानिरूपकत्वादतिव्याप्तेरधिकरणपदं विलक्ष-

न्यायरत्नं ।

शाधेयतात्वव्याप्यत्वस्यापि निरूपकत्वविशेषणत्वात्तादृशाधेयतात्वव्याप्यत्वं च साध्यानुयोगिकत्वविशिष्टस्वाश्रयाश्रयत्वसंबन्धावच्छिन्नप्रतियोगिताकतादृशाधेयतात्वाभाववति स्वनिरूपितवृत्तित्वसंबन्धेनावृत्तित्वम् । यदि चावच्छेदकैक्येऽप्यधिकरणभेदेनैवाधेयताभेदस्तदा साध्यनिष्ठाधेयतानिरूपकं यद्यत्तत्तद्भेदकूटमेव नि-

त्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसंगः । साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्व-

---

अत्राधिकरणवृत्तित्वं हेतुतावच्छेदकसंबन्धेन वाच्यम् । अन्यथा वह्निमान्धूमादित्यादौ वह्न्यादिनिष्ठाधेयत्वानिरूपकस्वावयवादौ धूमादेः समवायेन वृत्तेरव्याप्त्यापत्तेः । इत्थंच सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः । साध्यनिष्ठाधेयत्वानिरूपकत्वाधिकरणे सामान्यादौ हेतुतावच्छेदकसंबन्धात्मकसमवायादिना वृत्तेरप्रसिद्धेः । एवं द्रव्यं विशिष्टसत्वादित्यादावपि विशिष्टसत्वादेः सत्ताद्यनतिरिक्ततया साध्यनिष्ठाधेयतानिरूपकाधिकरणगुणादिवृत्तित्वानधिकरणत्वासंभवादव्याप्तिरित्यतो निष्कृष्टार्थमाह—साध्यनिष्ठेति । अत्रापि पूर्वदोषवारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेनाधेयत्वं निवेशनीयम् । एवमधिकरणत्वमप्यविवक्षितम् । तादृशाधेयत्वानिरूपकत्वव्यापकतैवाभावे निवेशनीया तादृशाधेयत्वानिरूपकवृत्तित्वमात्रनिवेशे धूमवान्वह्नेरित्यादौ वह्न्यधिकरणतासामान्याभावस्य धूमनिष्ठाधेयत्वानिरूपकह्रदादिवृत्तित्वादतिव्याप्तिरतो व्यापकतानिवेशः । व्यापकत्वं तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं नतु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम् । सर्वस्यैव तथाविधद्वित्वावच्छिन्नाभावप्रतियोगितया तदप्रसिद्धेः । नवा तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्वम् । तादृशाभावप्रतियोगितावच्छेदकीभूताभावत्वादिकमादाय वह्न्यधिकरणत्वसामान्याभावस्यापि धूमानधिकरणत्वव्यापकतया अतिव्याप्त्यापत्तेः । अनवच्छेदकत्वं चावच्छेदकताप-

कृष्णंभट्टीयं ।

णाधिकरणनिष्ठनिरूपकत्वलाभार्थं । सच तादृशाधेयतानिरूपकं यदधिकरणमिति योजनयेति । तत्तुच्छतरं । अधिकरणतासाधारणनिरूपकत्वत्वे मानाभावात् । विशिष्याधिकरणनिष्ठनिरूपकत्वविशेषस्यैव लब्धत्वात् । अन्यथा अधिकरणपदपूरणापत्तेः । नच तादृशनिरूपकभेदकूटलाभार्थमधिकरणपदमिति युज्यते तल्लाभस्य नञ्मात्राधीनत्वात् । नापि अधिकरणपदार्थतावच्छेदकाधिकरणत्वे साध्यनिष्ठाधेयत्वानिरूपकत्वान्वयार्थमधिकरणपदं । असंभवापत्तेः। साध्यवद्भिन्नस्येति पङ्क्तौ कथनमुत्तरलक्षणेऽतिव्याप्तिनिराससूचकं ।

र्यात्यनधिकरणत्वम्। अत उभयवच्छेदमादाय न दोषः। अथवा यदधिकरणासामान्याभावत्वं साध्यनिष्ठाधेयत्वानिरूपकवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकं तत्वमेव समुदायार्थः। अतो अभावत्वादिना व्यापकतामादाय न दोषः। अधिकरणता च हेतुतावच्छेदकसंबन्धावच्छिन्ना ग्राह्या। तेन वह्निमान्धूमादित्यादौ वह्न्यधिकरणधूमावयवादौ धूमाधिकरणत्वसामान्याभावासत्वेऽपि न क्षतिः। धूमवान्वह्नेरित्यादौ यत्किंचिद्वह्न्यधिकरणत्वाभावस्य धूमानधिकरणत्वव्यापकतयाऽतिव्याप्तिवारणाय सामान्यपदम्। तथाच तादृशाधेयत्वानिरूपकत्वव्यापकाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नाधिकरणतात्वं, यद्रूपावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वं वा तादृशानिरूपकत्वव्यापकतावच्छेदकं तद्रूपत्वमिति फलि-

कृष्णंभट्टीयं।

समवायेनेति। यत्किंचित्संबन्धेन वृत्तित्वोक्तौ चातिव्याप्तिर्द्रष्टव्या। हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतासंबन्धेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाभावस्य हेतुतावच्छेदकसंबन्धान्यहेतुप्रतियोगिकसंबन्धान्यसंबन्धावच्छिन्नतादृशवृत्तित्वाभावस्य वा निवेशेत्वाह—एवमिति। व्यापकत्वंचेति भेदत्वमखण्डोपाधिरिति न प्रतियोगितावच्छेदकसंबन्धनिवेशः। अवच्छेदकत्वं स्वरूपसंबन्धेन निवेश्यं तेन हेत्वधिकरणत्वाभावस्य विषयितासंबन्धेनावच्छेदकत्वेऽपि नाव्याप्तिः। तदयोगोलकभेदवान् तद्दीर्घदण्डादित्यादौ कालिकादिसंबन्धेन हेत्वधिकरणत्वाभावत्वविशिष्टरूपध्वंसादेः साध्यनिष्ठाधेयत्वानिरूपकत्वव्यापकतयातिव्याप्तिः। अतो हेत्वधिकरणत्वाभावत्ववैशिष्ट्यं स्वरूपसंबन्धेन निवेश्यमिति तु न शङ्क्यं। तथापि हेत्वधिकरणत्वाभावस्याव्यापकत्वात्। ननु एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ हेत्वधिकरणत्वाभावादेः केवलान्वयित्वादतिव्याप्तिरित्यत आह। अथवेति। इदंतु बोध्यं। तत्समानाधिकरणभेदप्रतियोगितानिरूपितनिरवच्छिन्नविशेषणतासंबन्धावच्छिन्नावच्छेदकताशून्यत्वे सति निरवच्छिन्नवृत्तित्वं व्यापकत्वम्। निरवच्छिन्नवृत्तित्वोपादानाजन्यज्ञानविषयत्वरूपव्यभिचारिहेत्वधिकरणत्वाभावस्य निरुक्तव्यापकत्वेऽपि नक्षतिः। व्यापकीभूताभावप्रतियोग्यधिकरणतानिवेशस्थाने व्यापकीभूतभेदप्रतियोगितावच्छेदकाधिकरणतानिवेशे वा। तथाचात्यन्ताभावघटितव्यापकत्वपरिष्कारोऽनाधेय इति। हेत्वधिकरणतात्वव्यापकप्रतियोगिताकत्वं निरस्यति। तथाचेति। तादृशेति। व्यापकाभावप्रतियोगितायामधिकरणतानिष्ठायां निरूपकतासंबन्धेनावच्छेदकताया अवच्छेदकहेतुताव-

तोऽर्थः । तेन धूमानधिकरणत्वव्यापकीभूतवह्न्यनधिकरणत्वधूमाधिकरणत्वोभयसामान्याभावप्रतियोगिताया वह्न्यनधिकरणत्वसामान्यनिष्ठत्वेऽपि नातिव्याप्तिः । यदधिकरणतामात्रनिवेशे द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः । द्रव्यत्वानधिकरणगुणादौ हेत्वधिकरणतात्वावच्छिन्नाभावसत्वात् । अतो यद्रूपावच्छिन्नेति । हेत्वभावस्य व्यापकतानिवेशे व्यापकताशरीरे हेतुतावच्छेदकसंबन्धेन तद्वन्निष्ठत्वं निवेश्यम् । अन्यथा वह्निमान्धूमादित्यादौ साध्यनिष्ठाधेयत्वानिरूपकह्रदादौ धूमात्मकाभावस्य कालिकसंबन्धेन वृत्तेरव्याप्त्यापत्तेः । तथासति सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः । साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्धेः । अतो हेत्वधिकरणत्वाभावस्य व्यापकताघटितमेव लक्षणं कृतम् । तथाचाधिकरणतायाः विशेषणताविशेषेण वृत्तिमत्तया तेन संबन्धेन तन्निष्ठत्वं निवेश्यं, अतो न दोषः । पूर्वकल्पपरित्यागे बीज-

कृष्णंभट्टीयं ।

च्छेदकवत्त्वस्य वाच्यतया विशिष्टपरामर्शानुपपत्तिः । यद्रूपेति । यद्रूपावच्छिन्नाधिकरणताप्रतियोगिकाभावस्य वह्न्यधिकरणत्वगगनोभयाभावाधिकरणतयाऽतिव्याप्तिः । तदवच्छिन्नाभावाप्रसिद्धेरतस्तथा नोक्तम् । तादृशनिरूपकाधिकरणवृत्त्यभावप्रतियोगितायां स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनानवच्छेदकीभूताधिकरणतानिरूपकतावच्छेदकं स्वावच्छिन्नाधिकरणताकत्वसंबन्धेन अनवच्छेदकं वा यद्धेतुतावच्छेदकं तद्वत्त्वमर्थइति न विशिष्टपरामर्शानुपपत्तिः । हेत्वभावस्येति । स्वमित्यादिवृत्त्यनियामकसंबन्धेन हेतुता तत्र धनादिसंबन्धस्य व्याप्यतयैवोपपत्तेः । वह्न्यादेः साध्यतायां रूपादेः संयोगेन हेतुतायां व्याप्त्युपगमेऽपि न क्षतिः । तत्र पक्षधर्मताविरहादेव परामर्शस्याप्रमात्वसंभवादिति भावः । हेत्वभावे प्रतियोगिवैयधिकरण्यासत्वेन व्यापकताघटकाभावस्य हेतुमत्ताग्रहविरोधितानियामकसंबन्धावच्छिन्नप्रतियोगितानिवेशेऽप्याह । अन्यथेति । कृतमिति । अधिकरणताचेह न संब-

न्यायरत्नं ।

वेश्यं साध्यनिष्ठेत्यादिग्रन्थस्याप्यत्रैव तात्पर्यमिति वदन्ति । अव्याप्यवृत्त्यधिकरणताया अव्याप्यवृत्तित्वमतेऽव्याप्यवृत्तिव्यभिचारिण्यतिव्याप्तिरभावे प्रतियोगिवैयधिकरण्यादिप्रवेशे गौरवमित्यालोच्याह—**अथवेति** । **अप्रसिद्धेरतो हेत्वधिकरणत्वाभावस्येति** । एतेन वृत्त्यनियामकेन व्यधिकरणेन वा संबन्धेन हेतुतास्थलेऽव्याप्तिरतिव्याप्तेर्वा वारणमधिकरणत्वनिवेशनप्रयोजनमिति

मिति निष्कर्षः। तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः। साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणत्वम्। चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तमपहाय स्वयमेकोक्त्यानूद्य दूष-

---

माह—तेनेति। न दोष इति। सामान्यादौ हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्धावपि तत्संबन्धावच्छिन्नाया: द्रव्यत्वाधिकरणतायाः द्रव्ये प्रसिद्धाया अभावस्य साध्यानधिकरणत्वादिति भावः। इति सिंहव्याघ्रलक्षणयोः प्रथमलक्षणं समाप्तम्।

अथ सिंहव्याघ्रलक्षणयोः द्वितीयलक्षणम्। साध्यवैयधिकरण्यस्य निरुक्तार्थकत्वे पौनरुक्त्यापत्तेस्तद्व्याचष्टे। साध्येति। इति सिंहव्याघ्रलक्षणयोः द्वितीयलक्षणं समाप्तम्॥

कृष्णंभट्टीयं।

न्धिना। तादात्म्यसंबन्धेन साध्यतायामिव तादात्म्येन साधनतायामपि व्याह्यङ्गीकारात्। इति सिंहव्याघ्रलक्षणयोः प्रथमलक्षणं समाप्तम्।

(अथ सिंहव्याघ्रलक्षणे द्वितीयलक्षणम्।) निरुक्तार्थकत्वमिति। साध्यं व्यधिकरणं यस्येति विग्रहः। व्यधिकरणमिति बहुव्रीहिरूपोत्तरपदघटितः। तत्र विभिन्नं अधिकरणभिन्नं आधेयतानिरूपकभिन्नं अधिकरणं यस्येति विग्रहात् यदाधेयतानिरूपकत्वावच्छिन्नप्रतियोगिताकभेदाधिकरणं प्रतीयते। व्यधिकरणमिति समासात्तु अधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावान् बुध्यत इति। शेषमग्रिमरीत्या द्रष्टव्यम्। साध्येतीति। विभिन्नमधिकरणं यस्य तत् व्यधिकरणं तस्य भावस्तत्वं साध्याद्वैयधिकरण्यं साध्यवैयधिकरण्यम्। साध्यपदस्य साध्याधिकरणे लक्षणेति साध्यानधिकरणवृत्तित्वलाभः। इति सिंहव्याघ्रलक्षणयोः द्वितीयलक्षणं समाप्तम्।

न्यायरत्नं।

वर्णयन्तो जगदीशाः परास्ताः। यत्स्थलीयाव्याप्तिवारणाय व्यापकताघटितपरिष्कारारम्भस्तत्रैव सत्तावान् द्रव्यत्वादित्यादावधिकरणत्वनिवेशप्रयोजनसंभवे तदुपेक्षाया निर्बीजत्वादिति ध्येयम्। इति सिंहव्याघ्रप्रथमद्वितीयलक्षणे: समाप्ते॥

यति—तदुभयमपीति । साध्येत्यादेः, साध्यं यदधिकरणा-

ननु मूले तदुभयमपि साध्यानधिकरणानधिकरणत्वमित्यनेनोक्त-लक्षणद्वयानुवादोऽसङ्गतः। असामानाधिकरण्यवैयधिकरण्ययोरधिक-रणताद्वयघटितत्वेन तादृशलक्षणयोरधिकरणतात्रयघटितत्वादनुवादे चाधिकरणताद्वयमात्रस्य निवेशादित्यतस्तादृशमूलं सङ्गमयति—**चरमेति । अनतीति ।** अनधिकरणत्वस्याधिकरणत्वाभावरूपतया तद्घटकाधिकरणत्वांशं परित्यज्य साध्यासामानाधिकरण्याभाववैयधि-करण्याभावनिवेशेनैवोपपत्तेरिति भावः । असामानाधिकरण्याद्यधि-करणत्वाभावस्याखण्डस्यासामानाधिकरण्याद्यभावाघटिततया न वै-यर्थ्यमित्यनतिप्रयोजनकतयेत्युक्तम् । **तदपहाय** चरमाधिकरणत्वांशं परित्यज्य । **द्वयम्** साध्यासामानाधिकरण्याभावसाध्यवैयधिकर-ण्याभावरूपनिष्कृष्टलक्षणार्थद्वयम् । साध्यानधिकरणाधिकरणत्वमि-त्यनेन सत्तावान् द्रव्यत्वादित्यादौ अव्याप्तिवारणाय विवक्षितस्य प्रथमलक्षणनिष्कृष्टार्थस्य कथंचिदपि प्रतिपादनासंभवात्तदनुवाद-कतानुपपन्ने(त्तिरि)ति यथाश्रुतार्थानुवादपरतया सङ्गमयितुं अनुव-दनीयलक्षणार्थद्वयमाह—**साध्येत्यादेरिति ।** लक्षणद्वयस्य क्रमेणेति

कृष्णंभट्टीयं ।

[अथ सिंहव्याघ्रलक्षणदूषणम् ।] दीधितौ एकोक्त्येत्यनेन तदुभ-यमपि तदुभयशब्दप्रतिपाद्यमपि साध्यानधिकरणानधिकरणत्वशब्दप्रतिपा-द्यमित्यर्थादनुवादत्वलाभः। नचानुवादार्थदूषणेऽपि पुरोवादार्थो निर्दिष्ट एवेति वाच्यम् । समनियतानुवादार्थसुखस्य पुरोवादार्थसुखानन्यत्वात् । **प्रथम-लक्षणेति ।** साध्यानधिकरणं अनधिकरणं यस्येति विग्रहः । येन यथा असाध्यानि साध्यविरोधीनीति पूर्वपदार्थतावच्छेदकसाध्यविरोधव्यापकत्व-लाभः । तथेहापि साध्यवद्भेदव्यापकत्वलाभ आशङ्क्येत । तथासति अनधि-करणमिति प्राथमिकसमासासंभवादित्यनेन । विरोधात् । किंतु साध्यानधिक-

न्यायरत्नं ।

[अथ सिंहव्याघ्रलक्षणदूषणम् ।] **पूर्वनिपातितस्यैव नञ इति ।** अत्र यद्यत्यन्ताभावार्थकेन नञा उत्तरपदार्थाभावे विद्यमानं यदव्ययं तत्समस्यत

---

१ मै. पु. अ.

गादा. प. ११

शेषः । तत्वाभाव इत्यन्तेन प्रथमलक्षणार्थकथनम् । एवंच साध्याधिकरणानधिकरणशब्देन साध्यं यदधिकरणानधिकरणकं तद्बोध्यते । तदुत्तरत्वप्रत्ययेन तत्त्वं साध्यपदोत्तरसन्निविष्टनञा तदभावः प्रत्यायत इति प्रथमलक्षणार्थबोधकत्वं साध्यानधिकरणानधिकरणत्वमित्यस्य । नच साध्याधिकरणानधिकरणत्वपदेन नञ्समासे सत्येव

कृष्णंभट्टीयं ।

रणमधिकरणं यस्येत्यनेन । नचैवमपि पश्चान्नञ्समासे वक्ष्यमाणरीत्या नञः साध्यनिवेशाद्यधिकरणत्वाभावलाभः संभवति । नञो मध्यनिवेशेऽपि भावप्रत्ययान्तबहुव्रीह्यर्थीभूततथाविधाधेयत्वेनैव तदन्वयात् । नत्वधिकरणतया । नञो यद्धर्मावच्छिन्नोपस्थापकपदसमभिव्याहारस्तद्धर्मावच्छिन्नप्रतियोगिताकत्वेनाभावबोधकत्वव्युत्पत्तेः । तेन दर्शितसमास एव प्रथमाधिकरणपदस्याधेयतानिरूपकार्थत्वमुपगम्यं । सत्तावान् द्रव्यत्वादित्यादिस्थलीयाव्याप्तिवारकार्थसंभवात्प्रथमेत्यसंगतमिति न शङ्क्यं । अथ तर्कालङ्कारमते अनधिकरणमिति प्राथमिकसमासः कथंचित्संभवतीति चेत् तदा पुरोवादरीत्यैवेदृशस्थलानुवादकत्वनियमः । तत्र प्रथमे पुरोवादस्य बहुव्रीहिगर्भबहुव्रीहित्वात्तत्पुरुषगर्भबहुव्रीहित्वमनुवादस्य न युज्यते । बहुव्रीहिगर्भबहुव्रीहित्वेतु सत्तावान् जातेरित्यादावव्याप्तिवारकार्थप्रतिपत्तिः । द्वितीयेच पुरोवादपदस्य तत्पुरुषगर्भबहुव्रीहित्वादनुवादकत्वं । तत्र पुरोवादस्य तथाविधनञ्समासगर्भबहुव्रीहित्वेऽप्यनुवादस्य तथाविधनञ्समासबहुव्रीहित्वोपगमेन, सत्तावान् जातेरित्यादावव्याप्तिवारकार्थलाभ इति प्रथमेत्युपादानं भवति विशेषकं । वस्तुतस्तु अनुवादपुच्छस्य पुरोवादपुच्छसाजात्ये पुच्छदूषणत्वभ्रमः स्यात् । दूषणानौपयिकाभिधानेच विग्रह इति तदविवक्षा तन्मते सुवचैव । प्रथमेत्युपलक्षणं द्वितीयेऽपि द्रष्टव्यमिति । साध्यमधिकरणानधिकरणं यस्येति विग्रहे अधिकरणमाधेयतानिरूपकं यस्येति समस्यं नञ्समासरूपमुत्तरपदं । तत्रोत्तरपदस्य ससंबन्धिकार्थाबोधकतया नञो मध्यनिवेशस्यासाधकत्वमेवेत्यन्यत्र शङ्कते—न चेति । साध्याधिकरणाधिकरणत्वस्याभावः साध्यानधिकरणानधिकरणत्वमिति नञोऽव्ययी-

न्यायरत्नं ।

इत्यर्थकेन 'अव्ययं विभक्ती'त्यादिसूत्रेण सिद्धोव्ययीभावः । यदि वा 'सुबन्तेन नञ् समस्यत' इत्यर्थकेन 'नञिति' सूत्रेण सिद्धस्तत्पुरुषो वाश्रीयते उभयथापि नञ एव पूर्वनिपातस्तस्यैवाव्ययमिति नञिति च प्रथमान्तपदप्रतिपाद्यत्वेन समासशास्त्रे प्रथमान्तशब्दप्रतिपाद्यमुपसर्जनसंज्ञं स्यादित्यर्थकेन 'प्रथमानिर्दिष्टं समासउपसर्जनमि'ति सूत्रेणोपसर्जनसंज्ञत्वात् 'उपसर्जनं पूर्वमिति' पाणिनिनाऽभिधानादिति

तदर्थाभावो नञा प्रत्याययितुं शक्यते। तथाच साध्यपदोत्तरं नञो निपातोऽसंभवी। समस्यमानपदपूर्वनिपतितस्यैव नञः साधुत्वादन्यथा अचित्रगुरित्यादौ चित्रादिपदोत्तरमपि नञ्[1]प्रयोगापत्तेरिति वाच्यम्। ससंबन्धिकार्थबोधकोत्तरपदघटितसमुदायेन समं नञ्समासस्थले नञो मध्यनिवेशस्यापि साधुत्वसंपादकत्वात्। अन्यथा घटानधिकरणत्वं साध्याभाववदवृत्तित्वमित्यादौ घटाधिकरणत्वाभावसाध्याभाववद्वृत्तित्वाभावप्रत्ययानुपपत्तेः। नहि तत्रानधिकरणत्वपदानां घटादिपदैः समासे तादृशार्थप्रतीतिरुपपद्यते। अनधिकरणत्वपदादिजन्यप्रतीतिविशेष्यीभूताभावेन सममेव घटादिसंसर्गभानात्समस्यमानपदप्रतिपाद्यतावच्छेदककोटिनिविष्टेनापरपदार्थान्वये राजपुरुषादन्य इत्यर्थे राजाऽपुरुष इत्यादिसमासापत्तेः। एवं नञान्वयितावच्छेदकावच्छि-

कृष्णंभट्टीयं।

भावसमासः। **ससंबन्धिकत्वं** नित्यसाकाङ्क्षितत्वं। विद्यमानो नियतः संबन्धी यस्येत्यर्थात्। **संबन्धित्वं** जिज्ञास्यत्वं। संबन्धोपस्थितिनियतोपस्थितिकत्वं वा। चैत्रस्य भार्येत्यादौ भार्यात्वादौ घटानधिकरणमित्यादौ अधिकरणपदार्थैकदेशात्मनः भावप्रत्ययार्थादेः चैत्रघटाद्यन्वयात् साध्यनिवेशः। संबन्धिकार्थबोधकपदात्पूर्वस्थानं। **जगदीशमतं** निराकरोति—**नहीति**। **घटानधीति**। घटस्य न अधिकरणमिति त्रिपदसमासस्तु न। अनुशासनाभावात्। **तादृशार्थः** घटाधिकरणत्वाभावः। **घटादिसंसर्गभानादिति**। **नत्वधिकरणादिनेति**। नाभिमतलाभः। **समस्येति**। अनधिकरणत्वादिपदप्रतिपाद्यतावच्छेदकम्। प्रकृते अधिकरणत्वाभाववत्त्वादिति। **राजाऽपुरुष इति**। राज्ञः अपुरुषइति विग्रहः। एतेन न अधिकरण-

न्यायरत्नं।

भावः। **प्रत्ययानुपपत्तेरिति**। तथा चागत्या पृषोदरादिगणपाठकल्पनया पृषोदरादीनि यथोपदिष्टमित्यनेनैव निरुक्तप्रयोगाणां साधुत्वमुपपादनीयमिति भावः। केचित्तु घटानधिकरणत्वमित्यादावधिकरणपदमेव घटाधिकरणलाक्षणिकं घटपदं तु तात्पर्यग्राहककाङ्क्षानिर्वाहकम्। आगमविकरणशब्दादिवत्। एवं सति न प्राथमिकसमासासंभवः। असमानाधिकरणपदस्य यदधिकरणानधिकरणत्वरूपार्थस्य दीधित्युक्तस्य न समानमसमानमित्याद्यधिकरणविशेषार्थकसमानपदस्य नञा प्राथमिकसमासमभ्युपेत्यैव वक्तव्यत्वाच्च। नच घटपदमेव घटाधिकरणलाक्षणिकमधिकरणपदं तात्पर्यग्राहकमिति कुतो न स्यादिति वाच्यम्। नञः

---

१ निपात मै. पु. पा.

ञाभावस्यैव बोधनादधिकरणसामान्यभेदवानेवानधिकरणपदार्थः स्यात्, तस्य चाप्रसिद्ध्या नञ्पदाधिकरणपदयोः प्राथमिकसमासासंभवाच्चेति। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपः प्रथमलक्षणस्य निष्कृष्टयथाश्रुतार्थोऽपि साध्यानधिकरणानधिकरणत्वमिति शब्देन प्रतिपाद्यते। तथाहि। आधेयतानिरूपकार्थकचरमाधिकरणपदघटितेन अधिकरणानधिकरणपदेन अधिकरणमनधिकरणं आधेयतानिरूपकं यस्येति व्युत्पत्त्या अधिकरणनिष्ठभेदप्रतियोगितावच्छेदकनिरूपकताकाधेयतात्वेनान्यपदार्थो बोध्यते। बहुव्रीहौ विग्रहाद्यादृशविशेषणविशेष्यभावापन्नस्य बोधस्तद्विपरीतविशेषणविशेष्यभावापन्नस्य प्रत्ययात्। चित्रा गौर्यस्येति विग्रहवाक्यात् यत्पदार्थसंबन्धित्वेन चित्रगोश्चित्रगुरित्यतः चित्रगोनिष्ठसंबन्धप्रतियोगित्वेन यत्पदार्थबोधात्। प्रकृतस्थले च विग्रहवाक्यात् [1]यत्पदार्थनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवत्वेनाधिकरणप्रतीतेः। एवंच साध्यं यस्याधिकरणानधिकरणकं यदधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूत-

कृष्णंभट्टीयं।

मनधिकरणं घटस्यानधिकरणं घटानधिकरणं तत्राधिकरणपदस्य घटाधिकरणे लक्षणा। घटपदं तात्पर्यग्राहकमित्यपास्तं। तथासति पुरुषपदस्य राजपुरुषे लक्षणा। राजपदं तात्पर्यग्राहकमित्यस्यापि सुवचत्वात्। अप्रसिध्येति। एतेन शब्दशास्त्रप्रणेतापि कटाक्षितः। नच शशशृङ्गादिशब्दवदयमपि समासः। "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति ही"ति न्यायादिति वाच्यम्। तत्र ज्ञानशब्देनान्यथाख्यातेरुक्तत्वात्। इह प्रमाणसमासस्यासंभवोक्तेः। अप्रमाणसमासगर्भसमासप्रामाण्यस्यादृष्टचरत्वात्। अप्रसिद्धार्थोपगन्त्रनुरोधेन वा तेषां सूत्रप्रणयनं। नैतावता तदनुपगन्त्रनुरोधेन नञो मध्यनिवेशो न

न्यायरत्नं।

उत्तरपदार्थभेदबोधकत्वव्युत्पत्तिभङ्गापत्तेरिति। न अधिकरणमनधिकरणमिति दर्शितव्युत्पत्त्यैव विवक्षितार्थलाभसंभवे नञो मध्यनिवेशोऽप्रामाणिक एवेति वदन्ति। **साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूप इति।** इदमुपलक्षणं साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वरूपस्याप्यर्थस्य लाभः संभवति। तथाहि साध्येऽधिकरणानधिकरणत्वं यदधिकरणवृत्तित्वाभावो यस्य तत्साध्याधिकरणानधिकरणत्वं भावप्रधानतया तत्त्वलाभस्तदभावश्च साध्यपदोत्तरनञा बोध्यत इति साध्यनिष्ठासामानाधिकरण्यसंबन्धित्वाभावलाभः संबन्धश्च प्रतियोगित्वमेवेति। परेतु साध्यनिष्ठाधेयत्वानिरूपकत्वस्य साध्यवद्भिन्नत्वस्य

१ अन्य. का. पा.

नधिकरणं तत्वाभावः। साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः । तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपका-

---

निरूपताकाधेयतावदिति व्युत्पत्त्या साध्यनिष्ठाधेयत्वानिरूपकत्वावच्छिन्नभेदवदधिकरणवृत्तित्वं साध्याधिकरणानधिकरणशब्देन प्रत्याय्यते । तदभावः साध्यपदोत्तरनञ्पदघटिततद्वाक्येनेति ।

द्वितीयलक्षणार्थमाह—**साध्यस्येति** । तथाच साध्यानधिकरणमधिकरणं आधेयतानिरूपकं यस्येति व्युत्पत्त्या साध्यानधिकरणाधिकरणत्वशब्देन साध्यानधिकरणवृत्तित्वं प्रत्याय्यते । तदभावो द्वितीयनञेति उक्तशब्दस्य एतदर्थानुवादकतेति भावः । पूरणसंवलितं तत्रेति ग्रन्थं व्याचष्टे—**तत्रेत्यादिना** । मूले केवलान्वयिनि वह्निमान्धूमादित्यादौ चाव्याप्तौ हेत्वकथनात् । प्रथमलक्षणे केवलान्वयिन्यव्याप्तिहेतुं पूरयति—**साध्येत्यादिना, अप्रसिद्धेरित्यन्तेन** । साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनि-

कृष्णंभट्टीयं ।

सुमतः । न्यूनतापत्तेः । तेषांपद एव स्वातन्त्र्यात् । अतएवोक्तं साधुवेत्यादि । ननु साध्यानधिकरणेत्याद्यनुवादस्य यदधिकरणानधिकरणं साध्यमित्याद्यर्थप्रतिपादकत्वमुक्तमसंगतं । साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिध्येत्यग्रिमहेत्वलग्नकतापत्तेः । तस्य साध्यनिष्ठाधेयत्वानिरूपकेत्याद्यर्थाप्रतिपादकतया अप्रसिद्धिकथनस्याकिंचित्करत्वात् । अतस्तादृशानुवादस्य तत्प्रतिपादकत्वं अधिकरणानधिकरणेति व्याससमासभेदेन पदद्वयाबोधं दर्शयित्वा साध्याधिकरणानधिकरणेति तद्भेदेन पदद्वयीयबोधं क्रमेण दर्शयन्नेव दर्शयति—साध्यनिष्ठेति । व्युत्पत्त्येति । अधिकरणं न अधिकरणं यस्येति त्रिपदबहुव्रीहिः । अन्यथा अनधिकरणपदे प्रसिध्या प्राथमिकः समासो न स्यादिति न शङ्क्यं । साध्यपदाधिकरणाधिकरणपदयोर्बहुव्रीह्युत्तरं नञ्समासे नञो मध्यनिवेशेन साध्याधिकरणानधिकरणशब्दे तात्पर्यात् । अस्य पदार्थः प्रकृते साध्यरूपः । हेत्वकथनादिति । साध्याधिकरणानधिकरण इति शब्दाभा-

न्यायरत्नं ।

वा व्यापकीभूतोऽभावस्तत्प्रतियोग्यधिकरणतासामान्यकत्वरूपोप्यर्थः साध्यानधिकरणानधिकरणत्वशब्दात्प्रतिपादयितुं शक्यते । तथाहि साध्यान-

---

१ वृत्तित्वेन रूपेण नौकादिरूढान्यपदार्थः । साध्याधिकरणानधिकरणपदेन तद्वृत्तिधर्मश्च वा. पु. अ.

धिकरणाप्रसिध्या, नानाव्यक्तिसाध्यके च एकसाध्यव्यक्तिनि-[1]

वेशाभिप्रायेणाप्रसिद्धिरभिहिता। यत्किंचिन्निरूपकभेदनिवेशे च तादृशभेदवदधिकरणे हेतोर्वृत्तेरव्याप्तिर्बोध्या। वक्ष्यमाणक्रमेण नानाव्यक्तिसाध्यके हेत्वन्तरेऽव्याप्तेः सत्वात् धूममात्रे तत्कथनं मूलकृतां न्यूनतासंपादकमतो धूम इत्यस्योपलक्षणत्वाभिप्रायेण पाठमधृत्वैव व्याचष्टे—**नानाव्यक्तिकेति**। अत्रच यथासंभवमव्याप्तिर्बोध्या। तेनैतद्वृत्तियावद्धर्मवानेतत्वादित्यादौ वक्ष्यमाणरीत्या अव्याप्तिविरहेऽपि न क्षतिः। अतएव नानाधिकरणकसाध्यके सर्वत्रेति

कृष्णंभट्टीयं।

वात्। **वक्ष्यमाणेति**। एतच्च यत्किंचित्साध्यनिष्ठाधेयत्वनिरूपकत्वमभिप्रेत्य। अन्यथा तदसंगतेर्दुर्वारत्वात्। **यथा संभवतीति**। नानाव्यक्तिसाध्यकहेतुत्वसामानाधिकरण्येनेत्यर्थः। अवच्छेदकावच्छेदकेनान्वये बाधकमाह—**तेनेति**। यद्यपि शब्दवान् गगनत्वादित्यादावपि नाव्याप्तिः। तथाप्यग्रिममिथःपदप्रयोजनं न तत्रेति तत्त्यागः। **वक्ष्यमाणरीत्या** एकसाध्यव्यक्तिनिष्ठाधेयत्वेत्यादिरीत्या। **अतएव** नानाव्यक्तिसाध्यक इति ग्रन्थस्य सामानाधिकरण्येनाव्याप्तिपरत्वादेव। सर्वत्रेत्यनेन द्वितीयलक्षण एवावच्छेदकावच्छेदेनाव्याप्तिं वक्ष्यति। अन्यथा तत्रापि सर्वत्रेति किं न

न्यायरत्नं।

धिकरणमधिकरणं यस्येति व्युत्पत्तिस्तत्र साध्यानधिकरणमित्यस्य साध्यनिष्ठाधेयत्वानिरूपकं साध्यवद्भिन्नं वार्थः। अनधिकरणं यस्येत्यत्राधिकरणपदमन्यपदार्थहेत्वधिकरणलाक्षणिकं यस्येति तात्पर्यग्राहकम्। अथवाऽधिकरणपदमाधेयताविशेषनिरूपकरूपाधिकरणे लाक्षणिकं तदैकदेशाधेयताविशेषे यस्येति षष्ठ्यन्तार्थहेतुनिष्ठत्वस्यान्वयः भावप्रधाननिर्देशाच्चानधिकरणमित्यनेन हेत्वधिकरणत्वाभावलाभः। इत्थं चोद्देश्यतावच्छेदकव्यापकत्वमसति बाधके विधेये भासत इति व्युत्पत्तिबलाद्धेत्वधिकरणत्वाभावरूपे विधेये साध्यानधिकरणत्वरूपोद्देश्यतावच्छेदकव्यापकत्वलाभ इति वदन्ति। **यथासंभवमिति**। नानाव्यक्तिसाध्यकहेतुत्वसामानाधिकरण्येनेत्यर्थः। अवच्छेदकावच्छेदेनान्वये बाधकमाह—**तेनेति**। यद्यपि शब्दवान् गगनत्वादित्यादावपि नाव्याप्तिस्तथाप्यग्रे विवक्षणीयमिथोव्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वरूपनानाव्यक्तिसाध्यकत्वशरीरनिविष्टमिथः पदप्रयोजनं न तत्रेति तत्त्यागः। **वक्ष्यमाणरीत्या** एकसाध्यव्यक्तिनिष्ठाधेयत्वेत्यादिरीत्या। अतएवाग्रे **नानाधिकरणसाध्यके सर्वत्रेति वक्ष्यतीति**। अत्र सर्वत्रेत्यस्यानुक्तौ पूर्ववदेव सामानाधिकरण्ये-

---

१ व्यक्तिका. पु. ना.।

ष्ठाधेयत्वानिरूपकत्वं साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः। क्वचिद्व्यभिचारिण्यतिव्याप्तिश्चाद्ये[२]। द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको बोधो विवक्षितः तदा

वक्ष्यति। यद्वा नानाधिकरणकसाध्यकेत्यस्य मिथो व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककइत्यर्थः। अत्राव्याप्तेर्हेतुं पूरयति—**एकेत्यादिना** इतीत्यन्तेन। अनया रीत्याऽव्याप्तिश्च। यत्किंचित्साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदनिवेशाभिप्रायेण साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशे च केवलान्वयिन्यव्याप्तिरेव दोष इति ध्येयम्। **क्वचिदिति**। पृथिव्यन्यत्वविशिष्टद्रव्यत्ववान्द्रव्यत्वादित्यादौ। **अतिव्याप्तिरिति**। विशिष्टद्रव्यत्वस्य द्रव्यत्वानतिरेकितया पृथिव्यादेः साध्यनिष्ठाधेयत्वानिरूपकत्वासंभवादितिभावः। आधेयतायां साध्यतावच्छेदकाव-

कृष्णंभट्टीयं।

वदेदिति भावः। उद्देश्यतावच्छेदकावच्छेदो न विधेयान्वयस्यौत्सर्गिकस्य रक्षणायेत्याह—**यद्वेति**। **मिथ इति**। यत्किंचित्साध्यप्रतियोगिकाभावाधिकरणं यत्किंचिद्यत्साध्यवद्यत्किंचित्साध्यप्रतियोगिकाभावसमानाधिकरणं यत्किंचित्तत्साध्यं तदुभयवृत्तित्वं वृत्तित्वान्तार्थः। तत्र च सत्ता द्रव्यत्वपृथिवीत्वान्यतमवान् जलत्वादित्यादौ अव्याहृयलाभान्न्यूनतेति चेन्न। यत्किंचित्साध्यप्रतियोगिताकाभावाधिकरणीभूतहेत्वधिकरणवृत्तिसाध्यतावच्छेदकवत्त्वस्य समुदायार्थत्वात्। यत्किंचिदिति निरूपकत्वेन्वेति। अत्र विशिष्टधर्मावच्छिन्नाधेयताया अनतिरिक्तत्वात्साध्यतावच्छेदकावच्छिन्नत्वनिवेशवैयर्थ्यमिति मतनिराकरणायाह—**आधेयतायामिति**। **यत्किंचित्त्वं व्यक्तावन्वेति**।

न्यायरत्नं।

नान्वयभ्रमः स्यादित्याशय इति केचित्। अग्रएव सर्वत्रेति वक्ष्यतीत्यर्थस्तथा चाग्र इवेहाप्यवच्छेदकावच्छेदेनान्वयस्य विवक्षितत्वेऽत्रापि सर्वत्रेति पठेदित्यपरे। **मिथो व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदक इति**। यद्यपि मिथो व्यधिकरणत्वं न परस्परानधिकरणवृत्तित्वं भूतलाभावमूर्तत्वाभावान्यतरवान् गुणत्वादेरप्युद्देश्यतावच्छेदकाक्रान्ततया तत्राव्याप्तिरूपविधेयाभावेन बाधापत्तेः। नापि परस्पराधिकरणावृत्तित्वं[१]। तादृशान्यतरसाध्यकमनस्त्वहेतोरसंग्रहापत्तेः। एतेन परस्परानधिकरणहेत्वधिकरणवृत्तित्वमपि निरस्तम्। तथापि

---

१ अधिकरणत्वं का. पा.।	२ प्रसंगः का. पा.।

केवलान्वयिनि यदि च यत्किंचित्साध्यवद्व्यक्तिभेदः तदा नानाधिकरणसाध्यके सर्वत्राव्याप्तिः ॥ इति दीधितौ सिंहव्याघ्रलक्षणे ॥

च्छिन्नत्वनिवेशेच नैष दोषः। अधिकरणतानिरूपकतावच्छेदकस्यैव आधेयतावच्छेदकतया पृथिवीनिष्ठाधिकरणतानिरूपकतानवच्छेदकपृथिव्यन्यत्वविशिष्टद्रव्यत्ववत्त्वादेः पृथिवीनिरूपिताधेयतानवच्छेदकत्वादिति ध्येयम्। द्वितीयलक्षणे साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदनिवेशे धूमादौ नाव्याप्तिरेव। यत्किंचित्साध्यवद्व्यक्तिभेदनिवेशे च उभयस्थल एवाव्याप्तिरिति। मूलाभिप्रायं स्फुटयन्ति—**द्वितीयेचेत्यादिना**। साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदः साध्यवैयधिकरण्ये विवक्षितः। साध्यवैयधिकरण्यघटकतया विवक्षित इत्यर्थः। **केवलान्वयीति**। केवलान्वयिन्येव। **नानाधिकरणकेति**। एकव्यक्तिसाध्यके सत्तावान्द्रव्यत्वादित्यादौ एकस्य साध्यवतो भेदस्यान्यस्मिन्साध्यवति सत्त्वादव्याप्तेः नानाव्यक्तिसाध्यकेऽपि एतद्वृत्तिद्धर्मवानेतत्वादित्यादौ अव्याप्त्यसंभवान्नानाव्यक्तिसाध्यकेति

कृष्णंभट्टीयं।

तथाच साध्यवत्तद्व्यक्तित्वावच्छिन्नभेद इत्यर्थः। तेन नासंभवः। **मूलेति**। यद्यपि तत्रेति शब्दलभ्या केवलान्वयिन्यव्याप्तिः साध्यवत्त्वावच्छिन्नभेदनिवेशपक्ष एव। तथापि धूमेचेति चकारेण तत्रेत्यस्यानुषङ्गाद्यत्किंचित्त्वनिवेश-

न्यायरत्नं।

यत्किंचित्साध्यानधिकरणहेत्वधिकरणवृत्तित्वे तात्पर्यान्न दोषः। **अधिकरणनिरूपकतावच्छेदकस्यैवेति**। अत्र **जगदीशमथुरानाथौ** विशिष्टसत्ता गुणवृत्तिरिति धीः प्रमैव विशिष्टसत्तावान्गुण इति धीरप्रमैवेति स्वानुभवानुसारेण कल्पयन्तौ विशिष्टसत्तात्वं गुणनिष्ठाधिकरणतानिरूपकतानवच्छेदकमपि गुणनिरूपिताधेयतावच्छेदकं भवत्येवेति मन्येते। **गदाधरास्तु** विशेषेण दर्शितधीद्वयस्याप्रमात्वं मन्यमाना विशिष्टसत्तात्वस्य गुणनिरूपिताधेयतावच्छेदकत्वं न क्षमन्त इति ध्येयम्। **नानाव्यक्तिकेति नोक्तमिति**। अथैवमप्यत्र सर्वत्रेति पदं किमर्थं पूर्ववदेव यथासंभवमव्याप्त्यापि निर्वाहात्। अथ सर्वत्रेत्यनुक्तौ द्वितीयस्य

---

१ नाव्याप्तिरतत्कल्पे केवलान्वयिसाध्यकाव्याप्तिरेव का० पा०।

नोक्तम् । तथाच द्वितीयलक्षणाभिप्रायेण धूम इति मूलं नानाधिकरणसाध्यकसामान्योपलक्षणमिति भावः । इति सिंहव्याघ्रलक्षणदूषणम् ।

कृष्णंभट्टीयं ।

ककल्पे यत्किंचित्साध्यानधिकरणानधिकरण इत्युभयत्रैव हेतुरिति भावः । अव्याप्तेरिति । संभवेन न्यूनतापत्तेरिति शेषः ।

इति कृष्णंभट्टीये सिंहव्याघ्रलक्षणविवरणम् ॥

न्यायरत्नं ।

वैकल्पिकस्यार्थस्य केवलान्वयिभिन्न एव नानाधिकरणसाध्यकेऽव्याप्तिरिति भ्रमः स्यादतः सर्वत्रेति वक्तव्यं। एतत्सूचनायैव सर्वत्रेत्यस्य केवलान्वयिनि व्यतिरेकिणि चेति भवानन्दादीनां व्याख्यानमिति चेन्न। एवं सति नानाव्यक्तिक इति पूर्वग्रन्थेपि सर्वत्रेति वक्तव्यं स्यात् । अन्यथा प्रथमलक्षणीयद्वितीयवैकल्पिकार्थस्याव्याप्तेस्तत्र सत्त्वेन तदकथनेन न्यूनतासाम्यात् । मैवं नानाव्यक्तिसाध्यके चेति चकारेण केवलान्वयिनोऽपि समुच्चयात्सर्वत्रेति तत्रानुक्तावपि न्यूनताविरहात् । नन्वत्रापि सर्वत्रेति स्थाने चकारं पठित्वा केवलान्वयिसाध्यकसमुच्चयः कुतो न कृतः वैरूप्यस्यान्याय्यत्वादितिशङ्क्यम् । उपायस्योपायान्तरादूषकत्वात् । अथ नानाव्यक्तिकेत्यस्य स्थाने नानाधिकरणकेति कुतो नोक्तं द्रव्यं पृथिवीत्वादित्यादौ पूर्वलक्षणस्याव्याप्तिविरहेऽपि यथासंभवमव्याप्तौ तात्पर्यस्य वक्तुं शक्यत्वादिति चेन्न। पूर्वलक्षणे साध्याधिकरणनानात्वं नाव्याप्तिप्रयोजकं। किंतु साध्यनानात्वमित्याशयेन पूर्वं नानाव्यक्तिसाध्यकेत्युक्तं । तदपि एतद्वृत्तियावद्धर्मसाध्यके व्यभिचारेण यथाश्रुतं न प्रयोजकमिति मिथ इत्यादिरीत्या पारिभाषिकं तदनुसृतमिति ध्येयम् ॥ इति सिंहव्याघ्रलक्षणदूषणं समाप्तम् ॥

अथ सार्वभौमपरिष्कारः ।

केचित्तु । साध्येति । साध्यासामानाधिकरण्यं हेतुताव-
च्छेदकसंबन्धेन हेत्वधिकरणे, तेनैव संबन्धेन साध्यवद्वृत्तित्वा-

---

साध्यासामानाधिकरण्यानधिकरणत्वमित्यत्र साध्यासामानाधि-
करण्यपदेन साध्याधिकरणवृत्तित्वाभावविवक्षणेपि द्रव्यं सत्वादित्या-
दावतिव्याप्तिर्न संभवति। सामानाधिकरण्यस्याव्याप्यवृत्तितया सत्ता-
दावपि गुणाद्यवच्छेदेन द्रव्यत्वादिसामानाधिकरण्याभावसत्वात् ।
किंतु वह्निमान्धूमादित्यादावव्याप्तिः । स्वावयवावच्छेदेन धूमादावपि
वह्न्यादिसामानाधिकरण्याभावासत्वात्। सापि हेतुतावच्छेदकसंबन्धे-
न यद्धेतुमत्तदवच्छिन्नत्वेनाभावं विशेष्य वारयितुं शक्यत इत्यभिप्रा-
येण तत्पदं तादृशाभावपरं वर्णयतः सार्वभौमस्य मतमुपन्यस्यति ।

केचित्त्विति । हेत्वधिकरण इति । सप्तम्यर्थो भावान्वय्यव-
च्छिन्नत्वम् । तेनैव संबन्धेनेति । तृतीयार्थोऽपि वृत्त्यन्वितमव-
च्छिन्नत्वम् । वृत्तिपदस्य संबन्धार्थकत्वे तु अभेद एव तदर्थः । अ-
नधिकरणत्वपदस्याधिकरणत्वाभावः अभावमात्रं वा यद्यर्थः स्यात्तदा

कृष्णंभट्टीयं ।

अथ सार्वभौमपरिष्कारप्रारम्भः ।

हेतुमदिति । यत्किंचित्पदार्थवदित्युक्तौ संयोगेन शैवालादिमज्जदाव-
च्छेदेन तृणादिमत्स्वावयवावच्छेदेन च धूमे वह्निसामानाधिकरण्याभावस-
त्वादव्याप्तिरतो हेतुपदं । अभावमात्रमिति । चरमाधिकरणत्वांश-

न्यायरत्नं ।

अथ सार्वभौमपरिष्कारविवरणम् ।

यद्धेतुमदिति । यत्किंचित्पदार्थवदित्युक्तौ तृणादिमत्स्वावयवावच्छेदेन
वह्निसामानाधिकरण्याभावस्य धूमादावक्षतत्वात्तद्दोषतादवस्थ्यमतो हेतुनिवेशः ।
धूमे पर्वते न वह्निमत्संयुक्तत्वमिति प्रतीतेरधिकरणभेदेन क्लृप्तधूमनिष्ठातिरि-
क्ताधिकरणतायामेव पर्वतावच्छिन्नत्वभानमुपगम्य वारणसंभवात्पर्वतावच्छि-
न्नत्वविशिष्टतादृशाभावनिरूपितविलक्षणाधिकरणतास्वीकारो व्यर्थ इत्यभिप्राये-

---

१ अन्वित का. पा.

(स्या)भावस्तदधिकरणभिन्नत्वमर्थः । तेन धूमस्य स्वावयवे सं-

अव्याप्यवृत्त्यधिकरणताया अप्यव्याप्यवृत्तितायाः सत्तादौ द्रव्याद्य-वच्छेदेन साध्यासामानाधिकरण्याभावाधिकरणत्वाभावस्य सामाना-धिकरण्यरूपतदभावाभावस्य चाक्षतत्वादतिव्याप्तिस्तदवस्थैवत्यनधि-करणपदं अधिकरणभेदवदर्थकतया व्याकरोति—**तदधीति** । यद्यपि अधिकरणभेदेनाभावभेदाभावात्संयोगादिना धूमाद्यधिकरणपर्वताद्य-वच्छिन्नो यः संबन्धान्तरेण तद्वृत्तिरूपादिनिष्ठवह्न्यादिमत्संयुक्तत्वा-भावः तस्यैव स्वावयवावच्छेदेन धूमादौ वर्तमानतया धूमादेस्तादृ-शाभावानधिकरणत्वं दुर्घटम् । तथापि तादृशहेत्वधिकरणावच्छिन्न-त्वविशिष्टाभावानधिकरणत्वस्यैव विवक्षणीयतया न दोषः । रूपे पर्वते न वह्निमत्संयुक्तत्वमितिवत्, धूमे पर्वते न वह्निमत्संयुक्तत्व-मिति प्रतीत्यनुदयात्पर्वतत्वावच्छिन्नत्वविशिष्टनिरूपितायाः वह्निम-त्संयुक्तत्वा(द्य)भावीयविलक्षणाधिकरणताया रूपादावेवोपगमात् । अभावाधिकरणतायामेव वाधिकरणविशेषावच्छिन्नत्वं निवेशनीयम् । तावतापि धूमरूपयोरभिन्नस्याप्यभावस्य परस्परानवच्छेदकावच्छि-न्नाधिकरणताभेदेन कथितदोषनिराकरणसंभवात् । उभयत्र हेतुता-वच्छेदकसंबन्धनिवेशप्रयोजनं क्रमेण दर्शयति—**तेनेति** । स्वावयवे

कृष्णंभट्टीयं ।

त्यागमभिप्रेत्य । **अधिकरणभेदवदिति** । भेदस्तु नाव्याप्यवृत्तिरिति भावः । नन्विदमयुक्तं । विशिष्टातिरिक्ततापक्षे साध्याघटितमूर्तेर्विशिष्टश-ब्दबोध्यवस्तुनोऽनधिकरणत्वस्य साध्यनिरूपितव्याप्तित्वासंभवात् । तच्छब्द-बोध्यस्य साध्यसामानाधिकरण्याभावानात्मकत्वात् हेत्वधिकरणावच्छिन्न-त्वस्याधिकरणतानिरूपकतावच्छेदकत्वे मानाभावाद्गौरवाच्चेत्यत आह—

न्यायरत्नं ।

णाह—**अभावाधिकरणतायामेव वेति** । यद्यपि पूर्वकल्पे विशिष्टा-धिकरणतानिवेशो व्यर्थः । सार्वभौममते विशिष्टातिरिक्तत्वाद्धेत्वधिकरणावच्छि-न्नत्वविशिष्टानधिकरणत्वनिवेशादेवाव्याप्तिवारणसंभवात् । तथापि मतद्वयसा-धारण्येन तन्निवेशो बोध्यः । **परस्परेति** । यथा रूपनिष्ठायां तदधिकरण-तायां स्वावयवो नावच्छेदकस्तथा धूमनिष्ठतदधिकरणतायां पर्वतो नावच्छे-

संयोगेनावृत्तावपीत्यन्वयः। तथाच स्वावयवावच्छेदेन साध्यवत्संयुक्तत्वासत्वेन तदभावस्याक्षततया प्रथमतो हेतुतावच्छेदकसंबन्धानिवेशे स्वावयवरूपस्वाधिकरणावच्छिन्नसाध्यवत्संयुक्तत्वाभावानधिकरणत्वविरहेण संयोगेन धूमहेतौ कस्यापि साध्यस्य व्याप्तिर्न स्यादिति भावः। यद्यपि तादृशसंबन्धनिवेशेऽपि वह्निमत्संयुक्तत्वादेः कालिकाव्याप्यवृत्तितया धूमादावुत्पत्तिकालावच्छेदेन वह्निमत्संयुक्तत्वाभाववृत्तेः पर्वतादेरपि कालोपाधितया तादृशाभावावच्छेदकत्वादव्याप्तितादवस्थ्यम्, तथापि इदानीमिति प्रतीतिनियामककालस्यावच्छेदकत्वादिहेति प्रतीतिनियामकदेशनिष्ठावच्छेदकताया वैलक्षण्यं दुरपह्नवम्। यदभावात्पर्वते धूमे न वह्निमत्संयुक्तत्वमिति

कृष्णंभट्टीयं।

अभावाधीति। **पर्वतेति**। यथा रूपनिष्ठायां तदधिकरणतायां स्वावयवो नावच्छेदकः तथा धूमनिष्ठायां तदधिकरणतायां पर्वतो नावच्छेदक इत्यर्थः। **कस्यापीति**। वह्निमतीत्यस्यासंबन्धसूचनाय। इदानीं धूमे न वह्निमत्संयुक्तत्वमिति प्रतीतिस्तत्र प्रमाणं। नतु तत्र पर्वत इति देशत्वेन पर्वतान्तर्भाव इत्याशयेन कालोपाधिविधयेति वैलक्षण्यानुपगमे बाधकमाह— **यदिति**। यत्पदं विलक्षणावच्छेदकतापरं। कालविधयाऽवच्छेदकतायाः देशविधयाऽवच्छेदकतावैलक्षण्यानुपगमे पर्वतरूपकालस्य धूमनिष्ठसाध्यसामानाधिकरण्याभावावच्छेदकतया पर्वते धूमे न वह्निमत्संयुक्तत्वमिति प्रतीत्यापत्तिः। **तस्य** विलक्षणावच्छेदकताविरहस्येत्यर्थः। तादृशावच्छेदकतयोर्भेदे किं प्रमाणमित्याशङ्कानिराकरणाय इदानीमिति। **प्रतीतिनियामकेति**। **इहेति प्रतीतिनियामकेति** चोक्तं। तेन कालविधयावच्छेदकतात्वादिकं चाखण्डोपाधिः। तदवच्छिन्नं कालत्वादिभाननियतभानकमिति लभ्यते। यत्तु इदानीमिति प्रत्ययनिरूपितकालनिष्ठविषयतानिरूपितविषयत्वाभाव एव वैलक्षण्यमिति। तत्तुच्छं। इहेदानीमिति विभिन्नप्रतीत्योर्विषयभेदासिद्धौ प्रतिनियतविषयता तदभावरूपवैलक्षण्यासिद्धेः। विभिन्नप्रत्ययरूपप्रमाणस्य तदविषयत्वतदभावरूपवैलक्षण्यासाधकत्वाच्च। नहि घटः घट इत्यादिप्रत्ययानां स्वविषयत्वतदभावादिविषयकत्वं। अनुव्यवसायस्यैव तथात्वादिति। अत्र धूमनिष्ठसाध्यसामानाधिकरण्याभावीया देशविधया अव-

न्यायरत्नं।

दक इत्यर्थः। **कालोपाधितयेति**। कालत्वेनेत्यर्थः। एतेन पर्वतस्य तादृशाभावावच्छेदकत्वे इदानीमित्यादिप्रतीतिरेव नियामिका। न त्विह पर्वते इत्यादिप्रतीतिरिति सूचितम्। **वैलक्षण्यमिति**। अखण्डोपाधिरूपमिति

प्रत्ययाभावः । हेतुमन्निष्ठतादृशावच्छेदकतानिरूपकत्वमेव निवेश्यमतो न दोषः । नच कालोपाधेरवच्छेदकतायां अवच्छेद्याधिकरणेनावच्छेदकस्य कालिकसंबन्धो अवच्छेदकतानियामकः । इत्थंच तादृशसंबन्धानवच्छिन्नत्वमेव देशस्यावच्छेदकतायां वैलक्षण्यं, अन्यस्य दुर्वचत्वात् । तथाच व्यभिचारिणि कालिकसंबन्धेन हेतौ

कृष्णंभट्टीयं ।

च्छेदकता तदीयकालविधया अवच्छेदकतातो विलक्षणा कालत्वाविषयकप्रमाविषयधूमनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकतात्वादिति प्रयोगः। तेन पर्वते धूमे न वह्निमत्संयुक्तत्वमिति प्रत्ययासिद्धावपि न क्षतेः। अथवा पर्वतादौ देशविधयाऽवच्छेदकत्वस्याभावात्तत्र तादृशावच्छेदकताविषयकप्रत्ययाभावः तादृशावच्छेदकताविषयतानिरूपितविषयतासंबन्धावच्छिन्नधूमनिष्ठवह्निमद्वृत्तित्वप्रत्ययाभावो वा । विशेष्यैतद्वृत्त्वस्य प्रमात्वविशिष्टतद्वृत्ताज्ञाननियामकत्वादिति ऋजुः पन्थाः । **व्यभिचारिणि कालिकसंबन्धेन हेताविति** । संयोगेन वह्निमान्कालिकेन धूमादित्यादिव्यभिचारिणीत्यर्थः । व्यभिचारनिरूपकहेत्वधिकरणीभूतह्रदाद्यवच्छेदेन वह्निमन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वाभावस्य हेतौ सत्वेऽपि तस्य हेत्वधिकरणीभूतह्रदनिष्ठकालिकसंबन्धावच्छिन्नावच्छेदकताकत्वनियमेन न लक्षणघटकता। किंतु ह्रदाद्यवच्छेदेन ह्रदसमवेतरूपादावेव तादृशाभावस्य प्रसिद्धिरिति तद्भिन्नत्वस्य हेतौ सत्वादतिव्याप्तिः । नच धूमावयवावच्छेदेन कालिकसंबन्धावच्छिन्नतथाविधवृत्तित्वाभावस्यैव हेत्वधिकरणीभूतो यः स्वावयवः तन्निष्ठसमवायसंबन्धावच्छिन्नावच्छेदकताकत्वान्नातिव्याप्त्यवकाश इति वाच्यम् । एवमपि समवायेन पृथिवीत्ववान्कालिकेन घटत्वादित्यादौ निरवयवे व्यभिचारिणि विपक्षीभूतजलसमवेतरूपस्यैव तादृशसाध्यवद्वृत्तित्वाभावाधिकरणतया हेतोस्तद्भिन्नत्वादतिव्याप्तेः । नच तत्रापि जन्यज्ञानावच्छेदेन साध्यवद्वृत्तित्वाभावसत्वान्नातिव्याप्तिरिति वाच्यम् । तथाप्येतत्क्रियाभिन्नं कालिकेन घटादित्यादावतिव्याप्तेः । तत्रैतत्क्रियाया एव व्यभिचारनिरूपकाधिकरणतया तस्याः कालिकेनैव हेतुनिष्ठसाध्यवद्वृत्तित्वाभावस्यावच्छेदकतया हेतुनिष्ठस्तादृशवृत्तित्वाभावो न लक्षणघटकः । किंतु क्रियात्व एवेत्यतिव्याप्तिः । एवं महाकालभिन्नं कालिकेन कालभेदात्, स्पन्दान्यो घटत्वात्, प्रलयभिन्नं कालिकेन गोत्वादित्यत्राप्यतिव्याप्तेः। महाकालादौ हेतोः कालिकेतरसंबन्धाप्रसिद्धेरित्याशयात् । कालभेदवान् कालिकेन कालभेदादित्यादौ विरुद्धे साध्यवन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धेरुक्तं व्यभिचारिणीति । कालिकादीत्या-

न्यायरत्नं ।

शेषः । प्रकारान्तरेण वैलक्षण्यमाशङ्क्य निराकुरुते—**नचेति** । **व्यभिचारि-**

वर्तमाने साध्यसामानाधिकरण्याभावे व्यभिचारनिरूपकाधिकरणीयावच्छेदकतायां कालिकसंबन्धानवच्छिन्नत्वविरहादतिव्याप्तिरिति वाच्यम् । कालिकव्याप्यवृत्तावपि कालिकसंबन्धघटितात्मत्वाकाशत्वादिसामानाधिकरण्ये[1] दैशिकसंबन्धेनात्मत्वाद्यनधिकरणकालस्य देशविधयैवावच्छेदकत्वात् । कालविधया तस्यावच्छेदकत्वे तादृशसामानाधिकरण्यस्य कालिकाव्याप्यवृत्तित्वापत्तेः कालिकसंबन्धानवच्छिन्नत्वादन्यस्यैव वैलक्षण्यस्य देशविधया अवच्छेदकतायां स्वीकरणीयत्वात् । हेत्वधिकरण[2] इत्यत्र हेतुपदं अधिकरणभिन्नत्वानुयोगितत्तद्धेतुपरम् । अतो धूमाद्यन्तरसंयु-

कृष्णंभट्टीयं ।

दिना संबन्धसामान्यपरिग्रहः । **कालिकव्याप्यवृत्तौ । कालानवच्छिन्ने ।** दैशिकसंबन्धेनात्मत्वाद्यनधिकरणकालस्येति च कालिकसंबन्धेनैव अवच्छेद्याधिकरणसंबन्धित्वं वक्तुं युक्तं। तथाचात्मत्वसामानाधिकरण्यावच्छेदको यः कालस्तन्निष्ठावच्छेदकतायाः कालिकसंबन्धावच्छिन्नत्वेऽपि तस्या देशविधयैवावच्छेदकतारूपत्वमिति शास्त्रीयं । इह घटे आकाशत्वे आत्मत्वसामानाधिकरण्यमिति प्रत्ययादिति । **कालिकाव्याप्यवृत्तित्वापत्तेरिति** । तत्काला-

न्यायरत्नं ।

नीति । महाकालभिन्नो घटत्वादित्यादावित्यर्थः । नच महाकालावच्छेदेन महाकालान्यवृत्तित्वाभावस्य महाकालवृत्तिवृत्तितया कालिकसंबन्धावच्छिन्नतादृशाधिकरणत्वाप्रसिद्ध्यैव नातिव्याप्तिरिति शङ्क्यम् । महाकालपरिमाणनिष्ठतादृशाधिकरणतायां महाकालस्य कालिकसंबन्धेनेव समवायेनाप्यवच्छेदकत्वसंभवात्समवायावच्छिन्नाधिकरणतायां कालिकसंबन्धानवच्छिन्नत्वप्रसिद्धिसौलभ्यात् । **कालिकव्याप्यवृत्तावपीति** । आकाशत्वे इदानीमात्मत्वसामानाधिकरण्यं न तदानीमिति प्रत्ययाभावादिति भावः । यद्यपि व्याप्यवृत्तावित्यस्य सामानाधिकरण्ये इति क्लीबविशेषणत्वात्क्लीबत्वमपेक्षितमिति व्याप्यवृत्तिनीत्येव वक्तुमुचितम् । तथापि व्याप्यवृत्तिपदे व्याप्या निरवच्छिन्ना वृत्तिर्यस्येति विग्रहा''तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति'' सूत्रेण तृतीयादिविभक्तौ परतः पुरुषसाधारणप्रवृत्तिनिमित्तकशब्दस्य पुंवद्भावविधानात्प्रकृते व्याप्यवृत्तिशब्दप्रवृत्तिनिमित्तस्य निरवच्छिन्नवृत्तित्वस्य पुरुषसाधारण्यान्न पुंवद्भावानुपपत्तिरिति ध्येयम् । **दैशिकसंबन्धेनात्मत्वानधिकरणेति** । एतेन कालिकसंबन्धातिरिक्तसंबन्धेन तस्यावच्छेदकत्वाभावः सूचितः । **कालिकाव्याप्यवृत्तित्वापत्ते-**

१ संबन्धान्तरेण वर्तमानप्रमेयत्वादिनिष्ठप्रत्ययाद्यवच्छेद्यसाध्यसामानाधिकरण्यावच्छेदकताया एव तादृशत्वाभावदृशाभाघाधिकरणे प्रमेयत्वादिभिन्नत्वस्य सत्त्वादिति । २ वैयधिकरण्य ।

क्तस्वावयवावच्छेदेन धूमादेस्तादृशाभावसत्त्वेऽपि न क्षतिः । एवंच व्याप्तेः प्रतिधूमादिकं भिन्नत्वेऽपि केनापि रूपेणानुगतानां

कृष्णंभट्टीयं ।

वच्छिन्नत्वस्य तदन्यकालावच्छेदेन तद्वद्वृत्त्यभावप्रतियोगित्वव्याप्यतया तदुपगमे तादृशप्रतियोगित्वापत्तेरित्यर्थः । तद्देशावच्छिन्नत्वंतु न तदन्यदेशावच्छेदेन तद्वद्वृत्त्यभावप्रतियोगित्वव्याप्यं । ज्ञेयत्वादौ वटाद्यवच्छिन्नवाच्यत्वसामानाधिकरण्यं तदन्यदेशावच्छिन्नतद्वद्वृत्त्यभावप्रतियोगित्वस्यासत्त्वादिति न दैशिकाव्याप्यवृत्तित्वापत्तिः । ननु व्याप्तेस्तत्तद्व्यक्तित्वरूपत्वे धूमत्वादेर्व्याप्यतावच्छेदकत्वं न स्यात् । व्याप्त्यघटकत्वात् । प्रत्येकं तत्तद्व्यक्तित्वरूपव्याप्त्यतिरिक्तवृत्तित्वाच्चेत्यत आह—एवंचेति । तत्तद्व्यक्तित्वान्यतमत्वं तावत्तत्तद्विषयकज्ञानव्यक्तिरेववा विशेष्यतासंबन्धेन अनुगमकं रूपं । नचैवमपि द्रव्यवान् संयोगेन प्रमेयादित्यादौ प्रमेयत्वमतिप्रसक्तमेवेति वाच्यं । स्वविशिष्टव्यापक-

न्यायरत्नं ।

रिति । तत्कालावच्छिन्नत्वस्य तदन्यकालावच्छेदेन तद्वृत्त्यभावप्रतियोगित्वव्याप्यत्वात्तदुपगमे तादृशप्रतियोगित्वापत्तेरित्यर्थ इति केचित् । वस्तुतस्तु आकाशत्वमिहात्मत्वसमनाधिकरणमिति प्रतीतिवदाकाशान्तर्भावेणाकाशत्वमात्मत्वसमानाधिकरणमिह नेति प्रतीतिरप्यनुभवसिद्धा । तत्र प्रथमप्रतीतौ कालिकसंबन्धावच्छिन्नरूपं कालविधयाऽवच्छेदकत्वं यदि भासते तदा नेदानीमिति प्रतीत्यापत्तेरिति भावः । धूमाद्यन्तरसंयुक्तेति । यद्यपि स्वावयवसंयुक्तधूमादौ तादृशाभावानधिकरणत्वसंभवान्न हेतुपदस्य तद्धेतुपरत्वं युक्तं । तथापि धूमवान्वह्नेरित्यादौ पर्वतीयवह्नौ तादृशाभावानधिकरणत्वमादायातिव्याप्तेर्वारणाय हेतुतावच्छेदकावच्छेदेन तदनधिकरणत्वविवक्षणावश्यकत्वाद्युक्तं तद्धेतुपरत्वं हेतुपदस्य । ननु हेतुपदस्य तद्धेतुपरत्वे व्याप्तेस्तत्तद्व्यक्तिरूपतापत्त्या न कस्यापि तद्व्यक्तित्वस्याऽनतिप्रसक्तं धूमत्वमिति धूमत्वस्य व्याप्यतावच्छेदकत्वं न स्यान्न चेष्टापत्तिः । धूमत्वावच्छिन्नहेतुकानुमित्यपलापापत्तेर्धूमादित्यादिन्यायप्रयोगासाङ्गत्यापत्तेश्चेत्यत आह—एवं चेति । केनापि रूपेणेति । अन्यतमत्वादिनेत्यर्थः । धूमत्वादिकमवच्छेदकमिति । तावत्तत्तद्व्यक्तित्वान्यतमत्वावच्छिन्नानतिप्रसक्तस्य धूमत्वादेर्व्याप्यतावच्छेदकत्वं निरावाधं । तावद्व्याप्तीनां स्वप्रतियोगिवृत्तित्वस्वसमानाधिकरण्योभयसंबन्धेन भेदविशिष्टान्यत्वरूपानुगततद्व्यक्तित्वरूपसामान्यप्रत्यासत्त्या ज्ञातुं शक्यत्वान्न दुर्ज्ञेयतापीति भावः । अथैवमपि सत्तावान्समवायेन प्रमेयादिति प्रयोगानुपपत्तिरसमवेतप्रमेयस्य निरुक्तव्याप्त्यघटकत्वेन प्रमेयत्वस्य समवेतप्रमेयनिष्ठतत्तद्व्यक्तित्वान्यतमत्वावच्छिन्नातिप्रसक्ततया तदवच्छेदकत्वविरहादिति चेन्न । तादृशान्यतमत्वावच्छिन्नानतिप्रसक्तशब्देन तादृशान्यतमत्वं हेतुतावच्छेदकसंबन्धप्रतियोगिनि यद्धर्मविशिष्टे वर्तमानाभावप्रतियोगितायामनवच्छेदकं तत्त्वस्य विवक्षितत्वात् । अनुगतव्याप्तिं वदतां

तासां धूमत्वादिकमवच्छेदकम् । यत्तु हेतुपदं हेतुतावच्छेदकाव-

कृष्णंभट्टीयं ।

तावच्छेदकतावच्छेदकतादृशरूपकत्वेनैव तस्याप्यवच्छेदकत्वात् । व्याप्तिघट-
कत्वं तु नावच्छेदकतायां तत्रमिति धूमत्वादित्यादौ न तदसिद्धिः । धूमवा-
न्वह्नेरित्यादौ साध्यसमानाधिकरणहेतौ व्याप्तिसत्वेपि वह्नित्वादेर्हेतुताव-
च्छेदकस्य नावच्छेदकत्वमित्यवच्छेदकाङ्गीकारफलं । हेतुपदमिति ।
ग्रन्थकारमते नानाव्यक्तिहेतुके हेतुव्यक्तिभेदाद्व्याप्तिभेदः नत्वेतन्मत इत्ये-
तावन्मात्रप्रदर्शनाय हेत्वधिकरणावच्छिन्नत्वविशेषणवैयर्थ्यात् । अथवा
हेत्वधिकरणावच्छेदेनैवेति एवप्रकारः पूरणीयः । हेतुतावच्छेदकावच्छिन्नत्वं
च स्वानुयोगित्वरूपमग्रे विवक्षणीयमिति प्रथमतो यथाश्रुतार्थाभिधानं ।
एवंच स्वानुयोगित्वादेर्विशेषणीयत्वादित्यन्तस्य हेत्वधिकरणावच्छेदेनेत्यस्य
तत्रैव तात्पर्यादित्यर्थः । तदनवच्छिन्नाधिकरणतान्यत्वस्य एवकारार्थत्वात् ।
अत्र केचित् । हेतुपदं हेतुतावच्छेदकावच्छिन्नपरमिति । अन्यथा द्रव्यं विशि-
ष्टसत्वादित्यादावव्याप्तेः । तत्र सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति
प्रतीतिसिद्धायाः सत्तानिष्ठद्रव्यत्वसामानाधिकरण्याभावाधिकरणतायाः स्वा-
नुयोगिसत्तानिरूपितसमवायसंबन्धावच्छिन्नाधिकरणतावन्निष्ठावच्छेदकताक-
त्वेन तदभावविरहात्स्वपदेन तदुपादानासंभवात् । तादृशस्वान्यत्वात्, हेत्वधि-
करणावच्छिन्नत्वाच्च । हेतुतावच्छेदकावच्छिन्नत्वोक्तौ च तस्यास्तादृशहेत्वधिक-
रणीभूतद्रव्यानवच्छेद्यत्वेन तथाविधाधिकरणतायाः द्रव्यत्वनिष्ठाया एव गृहीतुं
शक्यत्वेपि तस्या स्वानुयोग्यधिकरणानवच्छिन्नत्वेन तद्भिन्नाया घटाभावादि-
निष्ठायास्तथाविधाभावाधिकरणताया आश्रयघटाभावादिभिन्नत्वस्य विशिष्टस-
त्तायां सत्वेन लक्षणसमन्वयात् । तथाच स्वानुयोगिनिष्ठहेतुतावच्छेदकसंबन्धा-
वच्छिन्नाधेयतानिरूपिताधिकरणतावन्निष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नाव-
च्छेदकतानिरूपितावच्छेद्यत्वावच्छिन्नभिन्ना या याधिकरणता तद्भेदकूटवति या
हेतुतावच्छेदकसंबन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकर-
णतावन्निष्ठावच्छेदकतानिरूपितावच्छेद्यताशालिसाध्यवद्वृत्तित्वाभावाधिकरण-
ता तद्वदन्यत्वं समुदायार्थः । नच दीधित्युक्तहेत्वधिकरणावच्छिन्नत्वं व्यर्थमिति
वाच्यम् । स्वानुयोग्यधिकरणानवच्छिन्नस्वभिन्नानामनन्तानां शैवालादिनिष्ठा-
धिकरणतानां व्यावृत्तये तदुपादानात् । द्रव्यं विशिष्टसत्वादित्यादौ विशिष्टसत्ता-
याः शुद्धसत्तानतिरेकितया सत्तानिष्ठसाध्यवद्वृत्तित्वाभावाधिकरणतायाः स्वा-
नुयोगिसत्ताधिकरणगुणावच्छेद्यतया स्वपदेन दुर्धरत्वात् । तादृशस्वान्यत्वात् ।
अतः प्रकृतहेतुघटिततदुपादानमित्याहुः । तदसत् । विशिष्टातिरिक्तत्वं विशे-
षणविशेष्यसंबन्धस्य व्याप्यत्वमितिकल्पयोर्द्वयं विशिष्टसत्वादित्यत्राव्याप्य-
सत्वाद्दीधित्युक्तविशेषणस्यैव वैयर्थ्येन हेतुपदमिति संदर्भासंगतेर्दुर्वारत्वात् ।
विशिष्टस्यातिरिक्तत्वादितिपंक्तौ विशिष्टपदं विशिष्टाधिकरणतापरमिति चेदस्तु
कथंचित्तथा । तथापि विशिष्टातिरिक्तताकल्पस्यैव यत्तुकाराणामभिमतत्वाददो-

च्छिन्नपरमेव । हेतुतावच्छेदकसंबन्धेन स्वानुयोगिनो यदधिकरणं त-

कृष्णंभट्टीयं ।

वः । अन्यथा तन्नसाध्विलग्रिमदूषणासंगत्यापत्तेः । गगननिष्ठसाध्यसामानाधिकरण्याभाववत्तायाः हेत्वधिकरणानवच्छिन्नत्वात् । भवन्मते द्रव्यं विशिष्टसत्वादित्यादेस्संग्रहाय तदावश्यकत्वात् । तदनुपादाय दूषणाभिधानासंगतेः । स्वानुयोग्यधिकरणानवच्छिन्नत्वस्य परिचायकत्वादनुगतेन तत्तद्भेदकूटविशिष्टसाध्यसामानाधिकरण्याभावाधिकरणतात्वेनैवानन्तशैवालाद्यधिकरणतानां निवेश्यतया, विशिष्यानिवेश्यतया तद्व्यावृत्यनावश्यकत्वं चेति । परेतु । स्वानुयोगिनो हेतुतावच्छेदकावच्छिन्नस्य यधिकरणमिति रीत्या स्वानुयोगित्वविशेष्यतया हेतुतावच्छेदाकावच्छिन्ननिवेशार्थमाह—हेतुपदमिति । विशिष्टानतिरिक्ततापक्षे द्रव्यं विशिष्टसत्वादित्यादिसंग्रहाय स्वावयवावच्छेद्यशैवालादिवृत्तिसाध्यवद्वृत्तित्वाभावाधिकरणतानामनन्तानां व्यावृत्तये च तथा तन्निवेशः । तथासति जन्यगुणाद्यवच्छेदेन विशिष्टसत्तायां साध्यवद्वृत्तित्वाभावसत्वाल्लक्षणसमन्वयः । हेत्वधिकरणावच्छेदेनैवेत्येवकारपूरणात् प्रकृतहेतोः स्वानुयोगित्वविशेषणदानाच्च तादृशार्थलाभः । पर्वतरूपादाविति पङ्क्तिस्वरसोऽप्यत्रैव । इदं वाच्यं ज्ञेयत्वादित्यादौ हेतौ स्वरूपसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावाप्रसिद्धिः । आत्माद्यवच्छेदेन कालिकसंबन्धाद्यवच्छिन्नवाच्यवद्वृत्तित्वाभावसत्वेऽपि तदधिकरणता स्वानुयोगिज्ञेयत्वाधिकरणावच्छेद्यैवेति आकाशाभावाद्यधिकरणतैव तादृशी निरवच्छिन्नत्वादिति लक्षणसंगतिरित्याहुः ॥ स्वानुयोगिन इति स्वपदमन्यत्वप्रतियोग्यधिकरणतापरं । वह्निमान् धूमादित्यादौ च स्वं धूमादिनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणता तदनुयोगिनो धूमादेः संयोगेनाधिकरणं पर्वतादि, तदनवच्छेद्या स्वावयवावच्छेद्या सैव । तद्भेदकूटवति च रूपादिनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतैव । एवं सत्तावान् द्रव्यत्वादित्यादौ च जन्यगुणावच्छेदेन द्रव्यत्वे या साध्यसामानाधिकरण्याभावाधिकरणता सैव स्वानुयोगिद्रव्यत्वाधिकरणानवच्छेद्या तद्भिन्ना चाभावादिनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतैव । एवं इदं वाच्यं ज्ञेयत्वादित्यादौ घटावच्छेदेन घटत्वप्रकारकप्रमाविशेष्यत्वे साध्यवन्निरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वसत्वेऽपि घटाद्यवच्छेदेन तद-

न्यायरत्नं ।

मतमाह—यत्त्विति । हेतुतावच्छेदकसंबन्धेन स्वानुयोगिनो यदधिकरणमिति । स्वपदमधिकरणतासामान्यपरं तथाच हेतुतावच्छेदकसंबन्धेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्ना या या स्वात्मिकाधिकरणता तत्तदन्यसाध्यसामानाधिकरण्याभावाधिकरणतावद्भिन्नत्वमित्यर्थस्तेन धूमवान्वह्नेरित्यादौ स्वपदग्राह्यघटादिनिष्ठाधिकरणताश्रयानुयोग्यनवच्छिन्नाधिकरणतासामान्यभेदस्य स्वस्मिन्नेव सत्वेऽपि नातिव्याप्तिः । अथोत्पत्तिकाले धूमे न वह्निमत्संयुक्तत्वमिति

कृष्णंभट्टीयं।

भावसत्वात् स्वशब्देनोपात्ता या साध्यसामानाधिकरण्याभावाधिकरणता तदनुयोगिनो घटत्वप्रकारकप्रमाविशेष्यत्वस्याधिकरणे घटे या हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकता तन्निरूपितावच्छेद्यतावद्भिन्ना सैव। तद्भिन्ना च संयुक्तसमवेतपदार्थवृत्तिसाध्यसामानाधिकरण्याभावाधिकरणतेति हेतोस्तद्भिन्नत्वात्तत्र तत्र लक्षणसमन्वयः। जन्यगुणस्य घटादेश्च कालिकसंबन्धेनैवावच्छेद्याधिकरणसंबन्धितया तन्निष्ठावच्छेदकता कालिकसंबन्धावच्छिन्ना बोध्या। एवं स्वानुयोग्यधिकरणावच्छेद्यं शैवालसामानाधिकरण्याभावाधिकरणत्वादिकं तत्र सूक्ष्ममतिभिरूह्यम्॥ स्वानुयोगिन इति स्वपदमुदासीनाधिकरणतासाधारणाधिकरणतामात्रपरम्। नतु साध्यसामानाधिकरण्याभावीयाधिकरणतामात्रपरम्। प्रयोजनाभावादित्यनादेयम्। अव्यावर्तकाधिकरणताभेदनिवेशे गौरवात्। नच स्वानुयोग्यधिकरणावच्छिन्नं यत्स्वं तदन्याधिकरणतान्यत्वमेव कुतो नोक्तम्। तथासति धूमरूपयोरधिकरणताया दुर्धरत्वेऽपि दीर्घदण्डशैवालादिनिष्ठाधिकरणतामादायैव लक्षणसंगतिसंभवादिति वाच्यम्। जातिमान् सत्वादित्यादौ ध्वंसावच्छेदेन साध्यवद्वृत्तित्वाभावाधिकरणतायाः सत्तायां सत्वेऽपि अधिकरणतावच्छेदकतयोर्हेतुतावच्छेदकसंबन्धावच्छिन्नत्वसत्वेन सा स्वशब्देन दुर्धरा। किंतु द्रव्यवृत्तित्वाद्यभावाधिकरणतैवेति सर्वस्या अपि साध्यसामानाधिकरण्याभावाधिकरणतायास्तदन्यत्वेनाव्याप्तेः। धूमान्तरसंयुक्तस्वावयवेत्यादिरीत्या व्याप्तेः स्वानुयोगित्वनिवेशः। केचित्तु। **स्वानुयोगिनो यदधिकरणमिति**। स्वानुयोगिनो यद्यदधिकरणमित्यर्थः। अन्यथा द्रव्यं सत्वादित्यादावतिव्याप्तिः। सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिसिद्धा गुणावच्छेद्या द्रव्यवृत्तित्वाभावाधिकरणता स्वं तदनुयोगिसत्ताया अधिकरणं किंचिद्द्रव्यमेव तदनवच्छेद्या सैव, तद्भिन्ना च गुणत्वादिनिष्ठा द्रव्यवृत्तित्वाभावाधिकरणतेति हेतौ तदन्यत्वस्य सत्वात्। नन्वेवमेतद्रूपवानेतद्रसादित्यादौ स्वानुयोग्यधिकरणस्यैकव्यक्तिकतया नानात्वाभावादव्याप्तिरिति चेन्न। तत्रैकस्यैवाधिकरणस्य स्वानुयोगिनिष्ठा या हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयता तन्निरूपिता या अधिकरणता तदवच्छेदकावच्छिन्ननिष्ठावच्छेदकत्वस्य वा निवेश्यत्वात्। स्वानुयोग्यधिकरणताव्यापकावच्छेदकताकान्यत्वं तादृशाधिकरणतावच्छेदका ये ये धर्माः तदवच्छिन्ननिष्ठावच्छेदकतानिरूपकत्वसमुदाया-

न्यायरत्नं।

प्रतीतिसिद्धाभावाधिकरणतामादाय धूमादावव्याप्तिवारणाय स्वानुयोग्यधिकरणानवच्छिन्नत्वमित्यत्र स्वानुयोग्यधिकरणनिष्ठावच्छेदकतायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वस्यावश्यं निवेश्यतया हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकान्या या अधिकरणता तदन्या या साध्यासामानाधिकरण्याभावाधिकरणता तद्वद्भिन्नत्वमेव लक्षणमस्तु हेतुतावच्छेदकसंबन्धेन स्वानुयोग्यधिकरणांशस्य वैय-

दनवच्छिन्ना या या अधिकरणता तत्तदन्यत्वेन साध्यसामानाधिक-

कृष्णंभट्टीयं ।

भाववत्त्वं वा द्रव्यं सत्वादित्यादावव्याप्तिग्रस्तमित्याहुः ॥ वस्तुतस्तु । हेतुताव-च्छेदकसंबन्धावच्छिन्नस्वानुयोग्यधिकरणतावदनवच्छेद्यत्वं सम्यक् । द्रव्यं स-त्वादित्यादौ स्वानुयोगिसत्ताधिकरणतावदनवच्छेद्यत्वं न स्वस्येत्यनतिप्रसंगात् । अत्र स्वानुयोगिनो यद्यदधिकरणमिति निवेशपक्षे कालिकसंबन्धेन धूमानुयो-गिध्वंसादेर्यद्यदर्थान्तर्गततया तन्निष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदक-त्वाप्रसिद्धिः । वस्तुतस्तुकल्पे च, संबन्धान्तरेण वर्तमाननिष्ठाधिकरणताया अपि स्वानुयोग्यधिकरणानवच्छिन्नत्वमेव । गगनादेरपि विषयतासंबन्धेनाधि-करणसंभवात् । एवं वह्निमान् संयोगेन रूपादित्यादावतिव्याप्तिः । स्वानु-योग्यधिकरणनिष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकान्यत्वस्य हेतुनिष्ठा-धिकरणतायां सत्वात् । अतः स्वानुयोग्यधिकरणतायां हेतुतावच्छेदकसंबन्धा-वच्छिन्नत्वनिवेशः । धूमान्तरसंयुक्तेत्यादिरीत्या व्याप्तिवारणं तु न तत्फलम् । हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकतानिवेशसत्वेनाव्याप्त्यसत्वात् । धू-मान्तरसंयुक्तस्वावयवावच्छिन्नधूमनिष्ठतादृशाधिकरणतायां धूमान्तरनिष्ठता-दृशाधिकरणताभेदसत्वादुक्तदोषतादवस्थ्यमिति ये य इति वीप्सा । स्वावच्छि-न्नानुयोग्यधिकरणावच्छेद्यतानवच्छेदकाधिकरणत्वावच्छिन्नैकभेदस्तु नोक्तः । रूपधूमशैवालादिवृत्त्यधिकरणतासाधारणसाध्यवद्वृत्तित्वाभावाधिकरणता-

न्यायरत्नं ।

श्र्यमिति चेन्न । तथासति हेतुतावच्छेदकसंबन्धावच्छिन्नातीतानागतदेशान्तरी-यकालान्तरीयावच्छेदकतानामपि लक्षणे निवेशापत्त्या गौरवात् । किंच सत्ता-वान्द्रव्यत्वादित्यादावव्याप्तिः, तत्रासमवेतवृत्त्यधिकरणताया हेतुतावच्छेदकसंब-न्धावच्छिन्नावच्छेदकताकान्यत्वात्समवेते च साध्यसामानाधिकरण्याभावाधिकर-णताया असत्वेन हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकान्याधिकरणतान्य-तादृशाधिकरणताया अप्रसिद्धेः । नचोत्पत्तिक्षणविशिष्टे द्रव्ये गुणे न सत्तावत्समवे-तत्वमिति प्रतीत्योत्पत्तिक्षणविशिष्टद्रव्यावच्छेदेन सत्तावत्समवेतत्वाभावाधिकरण-ताया गुणादौ प्रसिद्ध्या तस्या एव हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताका-न्याधिकरणतान्यसाध्यसामानाधिकरण्याभावाधिकरणतात्वात्तद्भिन्नत्वस्य हेतौ सत्वाल्लक्षणसमन्वयः संभवतीति वाच्यम् । स्वानुयोग्यधिकरणांशनिवेशेऽप्युत्पत्ति-क्षणविशिष्टपर्वते धूमे न वह्निमत्संयुक्तत्वमिति प्रतीतिसिद्धसाध्यसामानाधिकर-ण्याभावाधिकरणाभावाधिकरणतामादायाव्याप्तेर्वारणाय तादृशप्रतीतेरुत्पत्तिक्ष-णविशिष्टपर्वतावच्छेद्यत्वाभावविषयकत्वस्यैवोपगमनात्तत्समशीलोत्पत्तिक्षणविशि-ष्टद्रव्ये इत्याद्याकारकदर्शितप्रतीतेरुत्पत्तिक्षणविशिष्टद्रव्यावच्छेद्यत्वाभावविषयक-तया तादृशाधिकरणतान्यसाध्यसामानाधिकरण्याभावाधिकरणतायाः सत्तावा-न्द्रव्यत्वादित्यादावप्रसिद्धेरिति हेतुतावच्छेदकसंबन्धेन स्वानुयोग्यधिकरणांशनि-

रण्याभावाधिकरणतायाः विशेषणीयत्वान्नोक्तदोषः। नवाऽननुगमः। एवंच कालोपाधिविधया हेत्वधिकरणस्य देशस्यावच्छेदकत्वेन उक्तदोषस्य अनवच्छिन्नप्रतियोगिकोटौ हेतुतावच्छेदकसंबन्धावच्छिन्ना-

कृष्णंभट्टीयं ।

त्वस्य स्वपदेनोपादानेऽपि तस्यातिप्रसक्तत्वेन तादृशावच्छेद्यतानवच्छेदकतया तदवच्छिन्नभिन्नसाध्यवद्वृत्तित्वाभावाधिकरणताया अप्रसिद्धेः । संबन्धान्तरेणावर्तमानवृत्त्यधिकरणताव्यावृत्तस्य स्वावयवायःपिण्डरूपवह्नेदकभिन्नाधिकरणताद्वयमात्रवृत्त्यधिकरणताविशेषत्वादेः स्वपदार्थत्वे तस्यातिप्रसक्ततया तादृशावच्छेद्यतानवच्छेदकतया तदवच्छिन्नभिन्नायाः संबन्धान्तरेण वर्तमानवृत्त्यधिकरणताया एव प्रसिद्धेरतिव्याप्तेः। तत्तदधिकरणतानुयोग्यधिकरणानवच्छेद्यत्वकूटविशिष्टाधिकरणतात्वानवच्छिन्नभेदस्तु नोक्तः। येयेत्यन्तस्य परिचायकतया ततोऽपि यथोक्तकल्पे लाघवात्। स्वाधिकरणावच्छेद्यसाध्यसामानाधिकरण्याभावाधिकरणतावच्छिन्नत्वनिवेशेऽनुगमात् स्वानुयोगीत्यादिरीत्या निवेश इत्याह—**नवेति** । इदानीं धूमे न वह्निमत्संयुक्तत्वमिति प्रतीतिसिद्धतदधिकरणतामादाय प्रसंजितदोषं देशविधया विलक्षणावच्छेदकत्वानिवेशेऽप्युद्धरति । **एवंचेति** । यद्यप्येवं सति स्वानुयोगित्वं व्यर्थम्। धूमान्तरसंयुक्तस्वावयवनिष्ठसाध्यसामानाधिकरण्याभावावच्छेदकताया हेतुतावच्छेदकसंबन्धावच्छिन्नत्वात्तत्राव्याप्त्यभावात्। तथापि प्रसिद्धानुमाने हेतुनिष्ठानां संबन्धान्तरेण वर्तमाननिष्ठानां अवृत्तिनिष्ठानां च साध्यवद्वृत्तित्वाभावाधिकरणतानां हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकत्वानिरूपकतया तद्भिन्नतादृशाधिकरणतानामप्रसिद्धिरतस्तन्निवेशः। ननु लाघवात् स्वानुयोगिनो हेतोर्वा यदधिकरणं तन्निष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकत्वमेव निवेश्यम्। एवंच हेतुतावच्छेदकसंबन्धेनाधिकरणं नञ्द्वयं च

न्यायरत्नं ।

वेशः। तत्रैव स्वानुयोगित्वविशेषतया हेतुतावच्छेदकावच्छिन्नस्य निवेशाय हेतुपदं हेतुतावच्छेदकावच्छिन्नपरमित्युक्तम्। अन्यथा द्रव्यं विशिष्टसत्वादित्यादावव्याप्त्यापत्तेः सत्तानिष्ठद्रव्यत्वसामानाधिकरण्याभावाधिकरणतायाः स्वानुयोग्यधिकरणगुणाद्यनवच्छेद्यत्वविरहेण स्वपदेनोपादानासंभवात्। **उक्तदोषस्येति**। उत्पत्तिकाले धूमे न वह्निमत्संयुक्तत्वमिति प्रतीतिसिद्धधूमनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतामादायाव्याप्तेरित्यर्थः। **हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकत्वनिवेशेनापीति**। अपिना विलक्षणदेशविधयाऽवच्छेदकत्वनिवेशेनाप्युक्तदोषवारणं कर्तव्यमिति सूचितम्। अत्रेदं बोध्यम्। स्वानुयोग्यधिकरणनिष्ठावच्छेदकतायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे हेतुतावच्छेदकसंबन्धेन स्वानुयोग्यधिकरणत्वनिवेशो व्यर्थः। स्वावयवावच्छिन्नायाः साध्यसामा-

वच्छेदकत्वनिवेशेनापि वारणसंभवः। पर्वतरूपादौ हेतुतावच्छेदकसंबन्धावच्छिन्नपर्वतादिनिष्ठावच्छेदकताकसाध्यसामानाधिकरण्याभाववत्वाप्रसिद्धावपि रूपादिनिष्ठतादृशावच्छेदकतायां[1] धूमादिप्रसिद्धे-[2]

कृष्णंभट्टीयं ।

व्यर्थमित्याशङ्क्याह—पर्वतरूपादाविति। अप्रसिद्धाविति। नच संबन्धान्तरेण वर्तमाननिष्ठतादृशाधिकरणतानिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकत्वाप्रसिद्धावपि साध्याधिकरणतदनधिकरणमात्रवृत्तिदीर्घदण्डादौ साध्यानधिकरणावच्छेदेन साध्यसामानाधिकरण्यप्रसिद्धेर्लक्षणसंगतिसंभवः। प्रयोजनाभावेन निष्ठान्तमनुपादाय हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकत्वमात्रोपादानादिति वाच्यम्। एवमपि जातिमान्सत्वादित्यादौ तदप्रसिद्धेर्दुर्वारत्वात्। लक्षणगमनादिति। नचैवमसंभवः संबन्धान्तरेण वर्तमाननिष्ठतथाविधाधिकरणत्वीयहेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकत्वाप्रसिद्धेरिति वाच्यम्। प्रसिद्धानुमानादौ साध्याधिकरणतदनधिकरणसाधारणदीर्घदण्डादौ पर्वताद्यवच्छेदेन शैवालादिमद्वृत्तित्वाभाववत्तायां तादृशसंबन्धावच्छिन्नावच्छेदकतात्वस्य प्रसिद्धेः। जातिमान् सत्वादित्यादौ ध्वंसाद्यवच्छिन्नसाध्यवद्वृत्तित्वाभावानुयोगिसत्ताधिकरणघटावच्छेदेन द्रव्यत्वे द्वित्वादौ वा न समवायावच्छिन्नावच्छेदकताका पटवृत्तित्वाभाववत्ता गुणरूपवत्वादित्यादौ तन्नीलावच्छेदेन नीलत्वादौ क्रियावृत्तित्वाभावरूपत्वादौ रक्तरूपादिवृत्तित्वाभाववत्ता वेत्यादिरीत्याऽवगन्तव्यम्॥

न्यायरत्नं ।

नाधिकरण्याभावाधिकरणताया हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकान्यत्वेन स्वानुयोग्यधिकरणानवच्छिन्नत्वानपायेन तादृशं यत्स्वं तदन्यत्वविरहेण तामादायाव्याप्त्यनवकाशात्। नचैवं रूपनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणताया अपि स्वानुयोग्यधिकरणनिष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकान्यत्वेन तादृशं यद्यत्स्वं तदन्यसाध्यसामानाधिकरण्याभावाधिकरणताया अप्रसिद्धिरिति वाच्यम्। साध्यशून्ये हेतुतावच्छेदकसंबन्धेन यो वृत्तिमांस्तन्निष्ठसाध्यसामानाधिकरण्याभावाधिकरणतायाः स्वानुयोग्यधिकरणनिष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकत्वेन स्वपदेनोपादानासंभवात्तस्या एव तादृशं यद्यत्स्वं तदन्यसाध्यसामानाधिकरण्याभावाधिकरणतात्वात्तामादायैव सर्वत्र लक्षणसमन्वयसंभवात्। यत्तु स्वानुयोगिनो यदधिकरणमित्यत्र यद्यदधिकरणमिति वक्तव्यमन्यथा द्रव्यं सत्वादित्यादौ सत्तानिष्ठद्रव्यत्वसामानाधिकरण्याभावाधिकरणतायाः स्वानुयोग्यधिकरणं यद्द्रव्यं तदनवच्छिन्नत्वेन तदन्य-

---

१ निरुक्ताधिकरणतायां मै. पा.　२ वह्निमत्संयुक्तत्ववति वा. पा.

योगेन वह्निमतिच समवायेनावृत्तावपि न क्षतिः ।

निरुक्ताधिकरणतानां भेदस्याप्यक्षततया तद्वदन्यत्वेन धूमादौ लक्षणसमन्वयसंभवादिति । तन्न साधु । तथासति किंचेत्याद्यग्रिमदोषासङ्गतेः । गगननिष्ठसाध्यसामानाधिकरण्याभावाधिकरणताया एवोक्ताधिकरणताभिन्नायाः प्रसिद्धेः। **वह्निमति चेति** । तथाच तेनैव संबन्धेनेत्यनुक्त्वा यत्किंचित्संबन्धेनेत्युक्तौ पर्वताद्यवच्छिन्नवह्निमत्संयुक्तत्ववत्यपि तदवच्छिन्नवह्निमत्समवेतत्वाभावसत्वाद्धूमस्य वह्निव्याप्यत्वं नोपपद्यत इति भावः । साध्यवत्संबन्धत्वसामान्याभावनिवेशे वह्निमत्समवेतत्वसामान्याभावस्य लक्षणघटकत्वेपि वह्निमत्संबन्धत्ववति हेत्वधिकरणविशेषावच्छिन्नसाध्यवत्संबद्धत्वसामान्याभावस्याप्रसिद्ध्या असंभवो बोध्यः। साध्यवदसंबन्धस्य हेतुमति संबन्धासंभवादवच्छेद्याधिकरणसंबन्धिन एवावच्छेदकतया तन्निष्ठाभावे हेतु-

कृष्णंभट्टीयं ।

गगननिष्ठेति । आत्मावच्छेदेन साध्यवन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वाभाववत्वात्तादृशाभावाधिकरणता स्वपदेन ग्राह्या । स्वरूपसंबन्धेन गगनादेरपि वृत्तिमत्वपक्षावलंबनात्तत्र न साध्यसामानाधिकरण्याभाववत्वमिति तु न वाच्यम् । तथासति हेत्वधिकरणावच्छेदेनेत्यस्यासंगतेः। अत्र विषयतासंबन्धेन साध्यतायां हेतुतायां च घटत्वे पटावच्छेदेन साध्यवन्निरूपितविषयतासंबन्धावच्छिन्नवृत्तित्वाभावसत्वात् स्वपदेन तदधिकरणतोपादेयेति गगने साध्यवद्वृत्तित्वस्यैव सत्वात् तद्भिन्नसाध्यवद्वृत्तित्वाभावाधिकरणताया अप्रसिद्धिरित्यव्याप्तिरपि बोध्या । **तदवच्छिन्नेति** । यद्यपीदानीमेतन्निवेशो नास्ति वैयर्थ्यात् । तथापि तदवच्छिन्नवह्निमत्समवेतत्वाभावो वर्तते नतु तदवच्छिन्न वह्निमत्संयुक्तत्वाभाव इत्यर्थावेदनाय तदुत्कीर्तनम् । घटात्यंन्ताभावस्तद्व्यक्तित्वादित्यादौ संयोगादिसंबन्धावच्छिन्नमिव विषयताप्रतियोगित्वयोर्वृत्यनियामकतया तत्संबन्धावच्छिन्नं च घटाभाववृत्तित्वमप्रसिद्धमिति स्व-

न्यायरत्नं ।

त्वाभावादतिव्याप्तेः तथाच हेतुतावच्छेदकसंबन्धेन स्वानुयोग्यधिकरणत्वानिवेशे वह्निमान्धूमादित्यादौ कालिकसंबन्धेन स्वानुयोग्यधिकरणध्वंसादिनिष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताया अप्रसिद्धेर्धूमावयवावच्छिन्नसाध्यसामानाधिकरण्याभावाधिकरणतायाः स्वपदेनोपादानासंभवेन तादृशं यत्स्वं तद-

मतोऽनवच्छेदकत्वात् । **नक्षतिरिति** । नाव्याप्तिः । नासंभवश्चेत्यर्थः । साध्यवत्ता च साध्यतावच्छेदकसंबन्धेन बोद्ध्या । तेन समवायेन वह्नौ साध्ये संयोगेन हेतौ धूमे पर्वताद्यवच्छिन्नवह्निमद्वृत्तित्वसामान्याभावासत्वेऽपि नातिव्याप्तिः । नवा सद्धेतावपि यत्किंचित्संबन्धेन यः साध्यवान् तद्वृत्तित्वाभावस्य स्वाधिकरणावच्छेदेन सत्वेऽपि न दोषः । साध्यवत्वं चोपलक्षणविधया अभावप्रतियोगितावच्छेदककोटौ निवेशनीयम् । ननु विशेषणविधया तेनोत्पत्तिक्षणावच्छिन्नघटादौ गन्धाद्यसत्वात्तादृशघटाद्यवच्छेदेन पृथिवीत्वादौ गन्धादिविशिष्टवृत्तित्वाभावसत्वेऽपि गन्धवान् पृथिवीत्वादित्यादौ मूलावच्छिन्नवृक्षादौ कपिसंयोगाभावसत्वात्तादृशवृक्षाद्यव-

कृष्णंभट्टीयं ।

रूपसंबन्धावच्छिन्नवृत्तित्वाभावमादाय लक्षणगमनादुक्तं धूमस्येति; अग्रे नाव्याप्तिरितिच । असंभवप्रकारस्य पूरितत्वादाह—**नासंभवश्चेति** । **तेनेति** । संबन्धसामान्येन साध्यवत्तानिवेशे अत्र पूर्वोक्तन्यायेन वह्न्यवयवे धूमान्तरसंभवात्साध्यतावच्छेदकसमवायसंबन्धेन साध्यवह्निरूपितसंयोगसंबन्धावच्छिन्नवृत्तित्वाभावस्य धूमान्तरे असत्वेपिवह्न्यवयवेन यद्धूमसंयोगस्तत्र तादृशाभावस्य पर्वतावच्छेदेन सौलभ्यम् । अन्यथा व्यभिचारित्वानुपपत्तेरिति बोध्यम् । **साध्यवत्वंचेति** । साध्यवत्तासमानाधिकरणाधिकरणताकत्वत्वावच्छिन्नाभावनिवेशान्नसाध्यनिष्ठवृत्तित्वाभावस्य लक्षणघटकेतेत्यर्थः। अवच्छेदकतापर्याप्त्युपादानाच्च साध्यविशिष्टवृत्तित्वाभावव्युदासः । तत्प्रतियोगितावच्छेदकतायाः

न्यायरत्नं ।

न्यत्वेनाव्याप्तिप्रसङ्ग इति तन्निवेश इति । तन्न । स्वानुयोग्यधिकरणतावन्निष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकत्वसामान्याभावरूपस्वानुयोग्यधिकरणानवच्छिन्नत्वनिवेशेन द्रव्यं सत्वादित्यादावतिव्याप्तिवारणाद्यद्यदिति निवेशानावश्यकत्वात् । यदपि हेतुतावच्छेदकसंबन्धेनेति तृतीयान्तं स्वानुयोग्यधिकरणांशे । नान्वेति किंतु स्वानुयोग्यधिकरणानवच्छिन्नेत्यत्रावच्छेदकतायामेवेति न तद्वैयर्थ्यमिति तदपि न । तथा सति "रूपादिनिष्ठनिरुक्ताधिकरणतायां धूमादिप्रसिद्धनिरुक्ताधिकरणतानां भेदसाक्षततया तद्वदन्यत्वेन धूमादौ लक्षणसमन्वयादिति" ग्रन्थविरोधादिति । **साध्यवत्त्वं चोपलक्षणविधयेति** । तथा च "यदुपलक्षितनिरूपितसमवायादेरवच्छेदकताघटकसंबन्धत्वं तस्योपलक्षणतयाऽवच्छेदकत्वमिति" सिद्धान्तलक्षणे वक्ष्यमाणरीत्या साध्यस्योपलक्षणतयाऽवच्छेदकत्वविवक्षायां साध्योपलक्षिताधिकरणप्रतियोगिकनिरूपितत्वसंबन्धा-

च्छेदेन एतद्वृक्षादौ कपिसंयोगादिविशिष्टवृत्तित्वाभावसत्वेपि कपिसंयोगी एतद्वृक्षत्वादित्यादौ वा नाव्याप्तिः। तत्तत्कालदेशावच्छिन्नतत्तधिकरणावच्छेदेनापि तत्र तत्र हेतौ तादृशसाध्योपलक्षिततत-

कृष्णंभट्टीयं।

देशकालावच्छेद्यत्वविशिष्टपर्याप्तत्वात्। सत्तावान् जातेरित्यादौ सत्तावत्समवेतत्वाभाव एव लक्षणघटकः। उपलक्षणस्यापि प्रतियोगितावच्छेदककोटिप्रवेशात्। गुरुधर्मस्य प्रतियोगितावच्छेदकत्वाच्च। नच साध्याधिकरणातिरिक्तविशेषणाविशेषितवृत्तित्वाभाव एव निवेश्यः। गुरुधर्मस्य प्रतियोगितावच्छेदकत्वेऽपि न समवेतत्वाभावमदायोपपत्तेरिति वाच्यम्। तथासति साध्यस्य व्याप्त्यघटकत्वापत्तेः। साध्यविशिष्टवृत्तित्वाभावस्य लक्षणघकत्वेऽपि अवच्छेदकतायां निरवच्छिन्नत्वनिवेशान्न गन्धवान् पृथिवीत्वादित्यादौ अव्याप्तिरिति प्रकाशिकाकृन्मतं निराकर्तुमाह—**नत्विति**। साध्याधिकरणतावैशिष्ट्यावच्छिन्नवृत्तित्वाभावनिवेशे निरवच्छिन्नविशेषणनिवेशेच गौरवादिति भावः। निरवच्छिन्नत्वानुक्तौ विशेषणतया साध्यवत्वनिवेशेऽव्याप्तिं प्रदर्श्योपलक्षणतया तन्निवेशाद्वारणमाह—**तेनेत्यादिना**। **एवमपि**। साध्यवत्वस्योपलक्षणत्वेपि। **देशः** शिखरादिः। **कालो** वह्निप्रागभावादिः, तथाच धूमाधिकरणतायाः स्वभावतएव नितम्बाद्यवच्छिन्नतया तन्निरूपकत्वाभावसत्वादव्याप्तिरतः निरवच्छिन्नत्वमावश्यकमित्यभिसंधिः। विशिष्टधर्मिपर्याप्त्यावच्छेदकताया

न्यायरत्नं।

वच्छिन्नसाध्याधिकरणनिष्ठावच्छेदकताकवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः साध्यसामानाधिकरण्याभावपदेन विवक्षणीयः। यद्वा स्वावच्छिन्ननिरूपकताकत्वसंबन्धावच्छिन्नसाध्यनिष्ठावच्छेदकत्वानिरूपितवृत्तित्वनिष्ठप्रतियोगिताकाभावस्तत्पदेन विवक्षणीयः। साध्यविशिष्टाधिकरणवृत्तित्वाभावप्रतीतौ च साध्यस्याधिकरणांशे भासमानस्य धर्मिपारतन्त्र्येण वृत्तित्वरूपप्रतियोग्यंशे भाननियमात्तादृशप्रतीतिविषयाभावः स्यात्तथात्वान्न तमादायोत्पत्तिकालीनघटो गन्धवान्पृथिवीत्वादित्यादावव्याप्तिः। ननु गन्धानधिकरणोत्पत्तिकालविशिष्टपृथिव्यां पृथिवीत्वेन गन्धवत्समवेतत्वमिति प्रतीतिर्यथोत्पत्तिकालविशिष्टपृथिविव्यवच्छेदेन पृथिवीत्वे गन्धविशिष्टनिरूपितसमवेतत्वाभावमवगाहते तथा धूमनिष्ठपर्वतवृत्तितानवच्छेदकनितम्बधूमासमानकालादिविशिष्टपर्वते धूमे न वह्निमत्संयुक्तत्वमिति प्रतीतिरपि तादृशविशिष्टपर्वतावच्छेदेन वह्निमत्संयुक्तत्वाभावमवगाहत इति तद्विषयाभावमादायाव्याप्तिः। यदिच विशेष्यस्य पर्वतादेः प्रतियोग्यवच्छेदकतया विशिष्टस्य तस्य नाभावावच्छेदकत्वमिति तादृशाभावो धूमादावसिद्ध इत्युच्यते तदा शुद्धपृथिव्या अपि प्रतियोग्यवच्छेदकतया विशिष्टपृथिव्या अभावावच्छेदकत्वासंभवेन तादृशाभावोऽपि पृथिवीत्वादावसिद्ध इत्यधिकरणांशे

त्तद्धर्मिवृत्तित्वसत्वात् । नचैवमपि धूमादौ पर्वतवृत्तेरनवच्छेदको यो देशः कालो वा तदवच्छिन्नपर्वताद्यवच्छेदेन वह्न्यादिमद्वृत्तित्वाभावस्य धूमादौ सत्वादव्याप्तिर्दुर्वारैवेति वाच्यम् । तत्तद्देशकालावच्छिन्नपर्वतादेर्धूमाद्यसंबन्धितया धूमादावभाववृत्तावपि तादृशस्यानवच्छेदकत्वात् । नचैवमुत्पत्तिक्षणविशिष्टपर्वते न वह्निमत्संयुक्तत्व(मित्यादि)मिति प्रतीत्यनुपपत्तिः । द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमित्यादिवदुक्तप्रतीतेः सामानाधिकरण्यावच्छेदकत्वाभावावलम्बनता न संभवति विशेषस्यावच्छेदकत्वे विशिष्टस्यानवच्छेदकत्वासंभवादिति वाच्यम् । तादृशप्रतीतीनां सामानाधिकरण्ये विशिष्टपर्वताद्यवछेद्यत्वाभावावगाहितयैवोपपत्तेः । उत्पत्तिक्षणे पर्वते धूमस्य

कृष्णंभट्टीयं ।

विशिष्टधर्म्यनुयोगिकसंबन्धनियतत्वमित्याशयेन समाधत्ते । **तत्तद्देशेति** । नच देशकालान्तरावच्छेदेन धूमसंबन्धित्वं तत्कालावच्छेदेन संबन्धस्यैव तत्कालावच्छिन्नावच्छेदकतानियामकत्वात् । तथाच धूमनिष्ठाभावस्य हेत्वधिकरणावच्छिन्नत्वं नास्तीति भावः । नचैवमपि शिखराद्यवच्छिन्नपर्वतस्य कालिकसंबन्धेन साध्यवद्वृत्तित्वाभावानुयोगिधूमवत्वात्कथं नावच्छेदकत्वमिति वाच्यम् । तदवच्छेदकताया देशविधया तद्भिन्नत्वात् तदवच्छिन्नतत्संबन्धावच्छिन्नतदधिकरणताया एव तन्निष्ठधर्मनिरूपिततदवच्छिन्नतत्संबन्धावच्छिन्नावच्छेदकतानियामकत्वमित्यवच्छिन्नावच्छेदकतास्थलीयनियमः । एतेन रूपवान् रसादित्यादावव्याप्तिवारणायैव निरवच्छिन्नत्वमित्यपास्तम् । यत्कालावच्छेदेनावच्छेद्याधिकरणसंबन्धता तत्कालावच्छेदेन हेतौ साध्यव-

न्यायरत्नं ।

साध्यस्योपलक्षणतयावच्छेदकत्वनिवेशो निरर्थक इत्यभिप्रायेण शङ्कते—**नचैवमपि धूमादाविति** । एवं विशेष्यस्य प्रतियोग्यवच्छेदकत्वेऽपि किंचिद्रूपेणाभावावच्छेदकत्वे । **अनवच्छेदकत्वादिति** । अवच्छेदकघटकीभूतविशेषणविशेष्ययोरवच्छेदकतया भाने तयोरवच्छेद्याधिकरणाधिकरणत्वं नियामकमन्यथा ह्रदविशिष्टपर्वते धूमे न वह्निमत्संयुक्तत्वमिति प्रतीत्यापत्तेः । एवं च धूमवृत्तितानवच्छेदकदेशकालयोरवच्छेद्याधिकरणधूमानधिकरणत्वाद्धूमादौ तादृशाभावासिद्ध्या न तमादायाव्याप्तिरुत्पत्तिक्षणपृथिव्योः पृथिवीत्वस्य नित्यतयाऽवच्छेद्याधिकरणतदधिकरणत्वसंभवेनोत्पत्तिक्षणविशिष्टपृथिव्यां पृथिवीत्वेन गन्धविशिष्टसमवेतत्वमिति प्रतीतिसंभवादधिकरणांशे साध्यस्योपलक्षणतयाऽवच्छेदकविवक्षणं सार्थकमिति भावः । **न चैवमिति** । एवं विशिष्टस्यावच्छेदकत्वे विशेषण-

न वह्निमत्संयुक्तत्वमित्यादौ पर्वताद्यवच्छिन्नं यद्धूमस्य वह्निमत्संयुक्तत्वं तस्योत्पत्तिक्षणो नावच्छेदक इत्यादिरप्यर्थः संभवति । धूमनिष्ठवह्निमत्संयुक्तत्वाभावे उत्पत्तिक्षणपर्वतोभयावच्छिन्नत्वं तु नार्थः । पर्वतस्य प्रतियोग्यवच्छेदकतया तदन्तर्भावेन द्वयोरभावावच्छेदकत्वस्यासंभवात् घटपटयोर्घटत्वाभावाधिकरणतावत् । एतेनोक्तोभयावच्छिन्नसाध्यासामानाधिकरण्याभाववत्वव्यावर्तनाय हेत्वधिकरण-

कृष्णंभट्टीयं ।

वृत्तित्वाभावासत्वेनैवाव्याप्तिभावात् । इत्यादिरपीत्यादिना तत्रोत्पत्तिक्षणानवच्छिन्नत्वं पर्वतावच्छिन्नत्वोत्पत्तिलक्षणावच्छिन्नत्वोभयाभावो वा ग्राह्यः । अपिना उक्तप्रकारसमुच्चयः । **असंभवादिति** । तथाच नाव्याप्तिः । **हेत्वधिकरणमात्रेति** । तच्च यद्यपि हेत्वधिकरणभिन्नानवच्छिन्नत्वे सति हेत्वधिकरणावच्छिन्नत्वम् । एवंचावच्छेदकताभेदेनाधिकरणताभेदात्पर्वतरूपादेः कालिकसंबन्धेन ह्रदादौ सत्वेऽपि तन्निष्ठावच्छेदकत्वनिरूपकसाध्यवद्वृत्तित्वाभावाधिकरणतामादाय लक्षणगमनेऽपि तथासतीत्यादिना दोषाभिधानासंगतिः। तथापि केवलान्वयिनि हेत्वधिकरणभिन्नाप्रसिद्धेरव्याप्तेः केवलान्वयिनीत्यादिग्रन्थविरोधः । अतो हेत्वधिकरणत्वं यन्निष्ठसाध्यवद्वृत्तित्वाभावावच्छेदकताव्यापकमित्यर्थान्नासंगतिः । अथैवमपि पर्वतरूपादेः कालिकसंबन्धेन ह्रदादौ सत्वात् तन्निष्ठकालिकसंबन्धावच्छिन्नावच्छेदकताया देशविधयावच्छेदकतात्वाच्चाव्याप्तिः । कालिकेतरसंबन्धावच्छिन्नतन्निष्ठसाध्यसामानाधिकरण्यावच्छेदकस्यैवहि तन्निष्ठतदभावीयकालिकसंबन्धावच्छिन्नावच्छेदकत्वस्य अतथात्वम् । अन्यथा स्वनिष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतादृशसंबन्धावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वमिति लक्षणे देशविधया अवच्छेदकत्वघटिते सत्तावान् जातेरित्यादौ ध्वंसाद्यवच्छेदेन हेतौ साध्यवद्वृत्तित्वाभावप्रसिद्धेरनुपयोगित्वेन अव्याप्तेरिति चेन्न । एतन्मते अवच्छेदकतायां कालिकसंबन्धावच्छिन्नत्वस्यैव निवेशात् । क्रियाभिन्नं कालिकेन घटादित्यादावुक्तरीत्याऽदोषेऽपि न क्षतिः । अतिव्याप्तिरूपत्वात् । यदिच तथासतीत्यादिना अतिव्याप्त्यभिधानं धूमवह्न्यादिवदस-

न्यायरत्नं ।

विशेष्ययोरुभयोरेवावच्छेद्याधिकरणाधिकरणत्वस्य नियामकत्वे इत्यर्थः । **इत्यादिरप्यर्थ इति** । आदिपदेन तादृशप्रतीतेरवच्छेद्यत्वाभावावगाहित्वमपि संभवतीति सूचितम् । **हेत्वधिकरणमात्रावच्छिन्नेति** । अथ हेत्वधिकरणमात्रावच्छिन्नत्वस्य हेत्वधिकरणान्यानवच्छिन्नत्वसहितहेत्वधिकरणावच्छिन्नत्वरूपत्वे केवलान्वयिनीदं वाच्यं ज्ञेयत्वादित्यादावव्याप्तिर्हेत्वधिकरणान्याप्र-

मात्रावच्छिन्नत्वनिवेशनं केषांचिदनुपादेयमेव । तथासति वह्न्यादि-

कृष्णंभट्टीयं ।

त्वात् । संयोगेन व्यभिचारिणि धूमवान् वह्नेरित्यत्रैव । नतु कालिकसंब-न्धेन व्यभिचारिण्यपि । तथावच्छेदकतायां कालिकसंबन्धावच्छिन्नत्वहेतु-तावच्छेदकसंबन्धावच्छिन्नत्वोभयाभावनिवेशो बोध्यः । एवंच वह्निमान् धूमादित्यादौ कालिकेन हेतौ परमाणोर्द्व्यणुकधूमनिष्ठसाध्यसामानाधिकर-ण्याभावीयसमवायसंबन्धावच्छिन्नावच्छेदकतावतः कालिकसंबन्धेन हेतुशू-न्यत्वेऽपि न क्षतिः। संयोगेन व्यभिचारिसमत्वात् । यदिचैवंसति उत्पत्ति-क्षणपर्वतयोः धूमनिष्ठसाध्यसामानाधिकरण्याभावावच्छेदकत्वे पर्वतनिष्ठाव-च्छेदकताया एतादृशविशेषणवत्तया हेत्वधिकरणताव्याप्यत्वेन चाव्याप्तिता-दवस्थ्यान्मात्रपदं व्यर्थं । तदापि प्रतियोग्यवच्छेदके पर्वते तदभावावच्छेद-कत्वं न स्यात् । पर्वते तत्काले धूमस्य संयोगासत्वात् । अतः कालिकसंबन्ध एवावच्छेदकतानियामको वाच्यः । तथाच पर्वतनिष्ठावच्छेदकताया नोभ-याभावत्वमिति नाव्याप्तिः । यदिच पूर्वमुत्पत्तिक्षणविधया पर्वतस्यावच्छेद-कत्वाभिधानादिदानीं सिद्धान्ते च तदनङ्गीकारे विरोधः तदा पर्वतधूमयोः संयोग एवावच्छेदकतानियामकः सिद्धान्ते प्रतियोग्यवच्छेदकतया अभावा-वच्छेदकता नास्ति एतन्मते कालनिष्ठावच्छेदकतासाचिव्येन नास्तीति विशेष इति मन्यते । तदा कालिकसंबन्धावच्छिन्नत्वहेतुतावच्छेदकसंबन्धाव-च्छिन्नत्वोत्पत्तिक्षणत्वावच्छिन्नत्वेतत्रितयाभाव एवावच्छेदकतायां निवेश्यः । तथासति पर्वतनिष्ठावच्छेदकतायां कालिकसंबन्धावच्छिन्नत्वेन उत्पत्तिक्षण-निष्ठावच्छेदकतायां उत्पत्तिक्षणत्वावच्छिन्नत्वेन त्रितयाभावसत्वेऽपि हेतुशू-न्योत्पत्तिक्षणसत्वेन हेत्वधिकरणत्वस्य तदव्यापकत्वान्नाव्याप्तिः । उभयाभाव-त्रितयाभावविशेषिततद्विशेषितकल्पयोर्दोषमाह—तथासतीति । यदिच

न्यायरत्नं ।

सिद्धेः । अत एव हेत्वधिकरणनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकत्वसहि-तहेत्वधिकरणनिष्ठावच्छेदकतानिरूपकत्वं तदित्यपि न । सर्वस्या अप्यवच्छेदक-तया हेत्वधिकरणनिष्ठत्वात्तदन्यावच्छेदकतायास्तत्राप्रसिद्धत्वात् । नच हेत्व-धिकरणनिष्ठा देशविधया याऽवच्छेदकता तदन्यावच्छेदकत्वानिरूपकत्वादिकमेव तदिति नोक्तस्थलेऽव्याप्तिरिति वाच्यम् । एवं सति तथा सतीत्यादिना वक्ष्यमा-णातिव्याप्त्यसंभवः । रूपादिनिष्ठाधिकरणतायामप्ययोगोलके रूपेण धूमवत्संयुक्त-त्वमिदानीं रूपेण धूमवत्संयुक्तत्वमिति प्रतीतिभ्यामयोगोलकोत्पत्तिकालोभयाव-च्छिन्नत्वावगाहनात्तादृशाधिकरणताया अप्रसिद्धेः । एतेन स्वावच्छेदकताव्या-पकहेत्वधिकरणताकत्वमेव तदिति निरस्तम् । यदि च गगनादिनिष्ठाधिकरणतैव तादृशीत्युच्यते तदा वह्निमान्धूमादित्यादावपि तस्या एव प्रसिद्धत्वात्तत्रैव संब-न्धान्तरेण वर्तमान इति ग्रन्थविरोध इति चेन्न । तादृशग्रन्थस्य यथाश्रुताभिप्रा-

तादृशाभावश्च तत्रैव संबन्धान्तरेण वर्तमाने सुलभः ।

निष्ठधूमसामानाधिकरण्याभावस्यापि अयोगोलकस्वावयवोभयाव-च्छिन्नतया हेतुतावच्छेदकसंबन्धेन हेतुमन्मात्रानवच्छेद्यतयाऽति-व्याप्तिप्रसङ्गाच्च । केचित्तु । विशिष्टपर्वतादेरवच्छेदकतामादायाव्याप्तेर्वारणायावच्छेदकान्तरानवच्छिन्नहेत्वधिकरणावच्छिन्नत्वमभावे निवेशनीयम् । एवंच पर्वतादेः कालविधया धूमनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वस्यापि व्यावृत्तिः । पर्वतादेः स्थूलकालतया वह्निमत्संयुक्तत्वादिरूपप्रतियोगिनोऽपि अवच्छेदकत्वात्तन्निष्ठाभावावच्छेदकतया अविरोधाय अवान्तरकालावच्छिन्नत्वोपगमादित्यप्याहुः ॥ हेतुमत्संबद्धे साध्यासामानाधिकरण्याभावस्योक्तयुक्त्या हेत्वधिकरणावच्छिन्नत्वविरहात् । हेतुतावच्छेदकसंबन्धेन हेतुमत्संबद्धे हेतुमदवच्छिन्नतादृशाभावप्रसिद्धिमाह—**तादृशेति** । हेतुतावच्छेदकसंबन्धेन साध्यवद्वृत्तित्वस्य तेन संबन्धेन हेतुमदवच्छिन्नाभावश्चेत्यर्थः । **तत्रैव**—तादृशहेतुमत्येव । नच तथाविधरूपादौ वह्निमत्संयुक्तत्वाभा-

कृष्णंभट्टीयं ।

स्वावच्छेदकताव्यापकहेत्वधिकरणताकसाध्यवद्वृत्तित्वाभावाधिकरणताया तत्तद्भेदकूटवत्वं निष्कर्षः । तदा नैष दोषः । स्वावयवायोगोलकयोरवच्छेदकताभेदेनाधिकरणताभेदात् । यदिचैवमपि पर्वते प्रतियोग्यवच्छेदके अवच्छेदकता न भिद्यते । किंतु क्षणनिष्ठैव संबध्यत इत्युच्यते, तदा हेत्वधिकरणपर्याप्तावच्छेदकतैव मात्रपदार्थः । तादृशपर्याप्तिसत्वेच न कोपि दोष इत्यवधेयं । **अवच्छेदकान्तरेति** । सप्तमीपदनिर्देश्यं देशकालयोरेवावच्छेदक-

न्यायरत्नं ।

यकत्वात् । वस्तुतस्तु हेत्वधिकरणनिष्ठा या देशविधयाऽवच्छेदकता तदन्यहेतुतावच्छेदकसंबन्धावच्छिन्नस्वानुयोगिनिरूपिताधिकरणतानवच्छेदकनिष्ठावच्छेदकताकं यद्यत्स्वं तत्तद्भिन्नसाध्यसामानाधिकरण्याभावाधिकरणतावद्भिन्नत्वमिति निष्कर्षो विवक्षितः । इत्थंच रूपनिष्ठाधिकरणतायाः स्वानुयोगिनिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नाधिकरणत्वाप्रसिद्ध्या स्वपदेनोपादानायोगेन संबन्धान्तरेणेति ग्रन्थसङ्गतिः । धूमवह्न्यादिनिष्ठाधिकरणताया हेतुतावच्छेदकसंयोगसंबन्धावच्छिन्नस्वानुयोगिनिरूपिताधिकरणतानवच्छेदकोत्पत्तिकालस्वावयवादिनिष्ठावच्छेदकतानिरूपकतया स्वपदेनोपादानसंभवान्नाव्याप्तिर्वक्ष्यमाणातिव्याप्त्यभावो वेति ध्येयम् । **अवच्छेदकान्तरानवच्छिन्नेति** । किंचिन्निष्ठावच्छे-

वो व्याप्यवृत्तिरेवेति तत्राधिकरणविशेषस्यावच्छेदकत्वं निर्युक्तिकं प्रतियोगिमति अभाववृत्तावेव विरोधभञ्जनार्थं अवच्छेदकभेदापेक्षणात्। धूमवत्कपालादिसमवेत एव वह्निमन्महानससंयुक्तघटादौ महानसाद्यवच्छेदेन वह्निमत्संयुक्तत्ववति हेतुमत्कपालाद्यवच्छेदेन वह्निमत्संयुक्तत्वाभावसौलभ्येऽपि एतद्रूपवानेतद्रसादित्यादौ एतद्रूपादिमत्समवेतत्ववति हेत्वधिकरणावच्छेदेन प्रतियोगिसत्वात्तदवच्छेदेन साध्यासामानाधिकरण्याभाववत्वासंभवात्।एतद्रूपादिमति संबन्धान्तरमात्रेण वर्तमाने साध्यवत्समवेतत्वाभावस्य व्याप्यवृत्तितया हेत्वधिकरणानवच्छिन्नत्वविरहेण निरुक्ताभावाप्रसिद्धेर्दुवारत्वादिति वाच्यम्। पर्वते रूपे न वह्निमत्संयुक्तत्वमिति प्रतीतिबलेन व्याप्यवृत्तेरपि साध्यासामानाधिकरण्याभावाधिकरणविशेषावच्छिन्नत्वोपगमात् । यत्तु व्याप्यवृत्तेरभावस्याधिकरणविशेषावछिन्नत्वानुपगमे हेतुतावच्छेदकसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये हेत्वनुयोगिकत्वहेत्वधिकरणविशेषावच्छिन्नत्वोभयाभावो विवक्षणीयः । तथाच धूमादिनिष्ठस्वावयवाद्यवच्छिन्नतदधिकरणतायां हेतुतावच्छेदकसंबन्धेन हेतुमदवच्छिन्नत्वस्य रूपादिनिष्ठवह्निमत्संयुक्तत्वाद्यभावाधिकरणतायां घटादिनिष्ठधूमवत्कपालावच्छिन्नतदधिकरणतायां च हेत्वनुयोगिक-

कृष्णंभट्टीयं ।

त्वमित्याविष्कर्तुं । यत्तु तद्गन्धप्रागभाववान् तद्गन्धध्वंसादित्यादौ हेतौ साध्यविशिष्टवृत्तित्वाभावसत्वादव्याप्तिरिति। तन्न, तत्र कालविशेषस्यावच्छेदकघटकत्वात् । तद्गन्धध्वंसे घटवृत्तित्वस्यानवच्छेदककालावच्छिन्नघटस्य तदसंबन्धित्वाच्च उक्तरीत्यैवोपपत्तौ विशेषणपूरणमस्वरसः । व्याप्यवृत्तेर्नावच्छेदकमिति वादिनां निष्कर्षमुत्थापयति । यत्त्विति । अयोगोलकवृत्तितृ-

न्यायरत्नं ।

दकत्वानिरूपितहेत्वधिकरणनिष्ठावच्छेदकताकेत्यर्थः । अत्राहुरित्यस्वरसः तद्वीजं तु रूपनिष्ठवह्निमत्संयुक्तत्वाभावाधिकरणतावच्छेदकतायां पर्वतनिष्ठायामपि पर्वतत्वस्यावच्छेदकतयाऽवच्छेदकान्तरानवच्छिन्नहेत्वधिकरणनिष्ठावच्छेदकत्वाप्रसिद्ध्याऽसंभवः । अवच्छेदकान्तरनिष्ठविलक्षणावच्छेदकतानिवेशेऽपि तत्तदवान्तरकालावच्छिन्नपर्वतादेस्तत्तत्क्षणत्वकल्पनापेक्षया तत्तदवान्तरकालस्यैव क्षणत्वसंभवेनोत्पत्तिक्षणनिष्ठावच्छेदकतायामप्यवच्छेदकान्तरानवच्छिन्नत्वाक्षतेरव्याप्तिर्वेति । यत्त्विति । अयोगोलकवृत्तितृणादिनिष्ठाधिकरणतायामुभयाभाव-

व्यभिचारिण(स्तु)श्च व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्त्वम् ।

त्वस्याभावेनोभयाभावस(व)त्वाल्लक्षणसमन्वय इति तन्न । व्याप्यवृत्तेरवच्छेदकानुगमे पृथिवी रूपादित्यादावतिव्याप्तिः । पृथिवीत्वादिव्यभिचारिजलीयरूपादिनिष्ठसाध्यासामानाधिकरण्याभावस्य व्याप्यवृत्तितया तदधिकरणतासामान्ये निरुक्तोभयाभावस्याक्षतत्वात् । हेत्वधिकरणावच्छिन्नत्वोभयाभावस्यैव[1] तत्र निवेशनीयत्वान्नायं दोषः । जलरूपनिष्ठपृथिवीसमवेतत्वाभावाधिकरणतायां अवच्छिन्नत्वविरहेणोभयाभावसत्वात् । एवंच तावतैवोपदर्शिताप्रसिद्धेरपि निवारितत्वात् । तादृशोभयाभाववदधिकरणतावदन्यत्वमेव निवेशनीयम् । न तूक्ताधिकरणतासामान्ये हेत्वनुयोगिकत्वतादृशोभयाभाववत्त्वोभयाभावः प्रयोजनविरहादिति चेदेवमपि वक्ष्यमाणायाः कालिकादिसंबन्धेन हेतावव्याप्तेरसङ्गतिर्दुर्वारैवेति । तत्र कालिकसंबन्धेनावृत्तिगगनादावेव दर्शितोभयाभाववत्साध्यसामानाधिकरण्याभावाधिकरणतायाः प्रसिद्धेः । अवृत्तावेव सर्वत्र तादृशाभावप्रसिद्ध्या संबन्धान्तरेण वर्तमानपर्यतानुधावनविरोधश्च । तस्माद्व्याप्यवृत्तेरप्यवच्छेदकत्वमेव ग्रन्थकारानुमतमित्यवधेयम् । द्रव्यं सत्वादित्यादावाशङ्कितामतिव्याप्तिमुद्धरति । **व्यभिचारिणश्चेति । तादृशीति ।** हेतुतावच्छेदकसंबन्धेन हेतुमतीत्यर्थः । अवच्छेदकत्वं सप्तम्यर्थः । **तादृशाभाववत्त्वम् ।** हेतुतावच्छेदकसंबन्धेन साध्याभावव-

कृष्णंभट्टीयं ।

णादिनिष्ठधूमवद्वृत्तित्वाभाववत्तायामुभयाभावसत्वादतिव्याप्तेः सामान्यपदं । तदर्थो व्यापकत्वं तथाच तादृशाधिकरणत्वव्यापकः हेत्वनुयोगिकत्वयद्धर्मावच्छिन्नाधिकरणविशेषावच्छिन्नत्वोभयाभावः तद्धर्मवत्वमित्यर्थः । धूमादिरूपादिनिष्ठेत्यादि तदुभयप्रयोजनम् । नच धूमाद्यनन्तरसंयुक्तस्वावयवावच्छेदेनेत्यादिरीत्या व्याप्तिः । दलद्वयेऽपि तद्व्यक्तित्वात्मकैकधर्मस्यैव यद्धर्मपदेनोपादानात् एतन्मते तादृशस्वावयवस्यासत्वाच्च धूमान्तरेण वृत्त्यनियामक-

न्यायरत्नं ।

सत्त्वादतिव्याप्तेः सामान्यपदम् । **पृथिवीरूपादित्यादाविति ।** यद्यपि धूमवान्वह्नेरित्यादावप्ययोगोलकीयवह्निनिष्ठतादृशाधिकरणताया व्याप्यवृत्तितया-

---

१ त्वस्थाने अवच्छिन्नत्वहेत्वधिकरणानवच्छिन्नत्व बा. पा.

सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति [1]प्रतीतेः । नचैवं विशिष्टसत्वेऽव्याप्तिः । विशिष्टस्यातिरिक्तत्वात् ।

वृत्तित्वाभाववत्त्वम् । अत्र प्रमाणाकाङ्क्षायामाह—**सत्तायामिति ।** ईदृशप्रतीत्या द्रव्यत्वसामानाधिकरण्यवत्यामपि सत्तायां तदनवच्छेदकगुणाद्यवच्छेदेन तदभाववत्त्वावगाहनादिति भावः । एवं सत्तायां द्रव्यत्वसामानाधिकरण्याभावोपगमे । **विशिष्टसत्वे** गुणान्यत्ववि[2]शिष्टसत्तात्वाद्यवच्छिन्ने । **अव्याप्तिरिति ।** गुणाद्यवच्छेदेन साध्यसामानाधिकरण्याभाववति केनापि रूपेण तदनधिकरणत्वासंभवादिति भावः । **विशिष्टस्येति ।** तथाच विशिष्टसत्वं द्रव्यमात्रवृत्तितदधिकरणत्वं न गुणादेरिति न हेत्वधिकरणावच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववत्त्वमिति नाव्याप्तिरिति भावः । यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छिन्नत्वं निवेश्यापीयमव्याप्तिः शक्यते वारयितुं तथापि प्रकारान्तरेण वारणसंभवे अधिकनिवेशनमनुचितं इत्यभिप्रेत्य विशिष्टातिरिक्तत्वपक्ष आश्रितः । नच हेतुतावच्छेदकविशिष्टाधिकरणतानिवेशनमवश्यकम् । अन्यथा इदं स्पर्शवत् भूतत्वमूर्तत्वोभयत्वादित्यादौ भूतत्वे मूर्तत्वे च हेतौ स्वाधिकरणे गगने मनसि च साध्यसामानाधिकरण्यविरहेणाव्याप्तिप्रसङ्गादिति वाच्यम् । उभयत्वस्य एकविशिष्टापरत्वरूपतामवलम्ब्य विशिष्टस्यानतिरिक्ततया तत्र स्वावच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासंबन्धे-

कृष्णंभट्टीयं ।

एव संयोगः हेत्वधिकरणताच लक्षणघटितेत्युक्तिसंभवाच्च । धूमवान् वह्नेरित्यादौ धूमवत्साधारणवह्निसंभवान्नातिव्याप्तिरतः पृथिवीति । शङ्कते—हेत्वधीति । **जलेति ।** क्षितिजलोभयवृत्तिदीर्घदण्डे क्षितिमात्रवृत्तिघटवदवृत्तित्ववत्तायां हेत्वधिकरणावच्छिन्नत्वप्रसिद्धिः । **ईदृशेति ।** अत्र सत्ता द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावविशेष्यकाधेयतासंबन्धावच्छिन्नप्रमाप्रकारत्वात् । यो यद्विशेष्यकप्रमाप्रकारः स तद्वानिति व्याप्तेरिति प्रयोगः । **केनापीति ।** विशेष्यवृत्तिवृत्तिप्रतियोगितावच्छेदकताकभेदानुयोगिताया विशिष्टे अनङ्गीकारात् । विरुद्धनिष्ठोभयत्वस्यैकविशिष्टापरत्वरूपत्वासंभवादुभयत्वमात्रस्यैवातिरिक्तत्वं स्वीकृत्य तस्यैव हेतुत्वं स्वीकुर्यामिति समाधयन्तरमाह—

---

१ अनुभवात् का. पा. २ गुणकर्मान्यत्वविशिष्ट का. पा.

नोभयत्वस्यैव[1] वा तत्राव्याप्तेः समाधानसंभवात्। ननु द्रव्यं गुणान्यत्वेसति सत्वादित्यादौ विशिष्टातिरिक्ततापक्षमवलम्ब्याव्याप्तेर्वारणं न विचारसहम्। तथाहि। गुणादिवृत्तिसत्तादितो गुणान्यत्वविशिष्टसत्तादेरतिरिक्तत्वेऽनुगतधर्ममात्रोच्छेदः। एकव्यक्तिवृत्तित्वविशिष्टस्य अपरव्यक्तिवृत्तिन्यसत्वात्। नच तत्तव्द्यक्तिवृत्तित्वविशिष्टसत्तादीनां मिथो भेदेऽपि शुद्धसत्तादिकमनुगतं निराबाधमेवेति वाच्यम्। शुद्धसत्तादौ तत्तव्द्यक्तिवृत्तित्ववैशिष्ट्याभ्युपगमे भवतां तदेकत्वासंभवात्। तदेवाभ्युपगमे तस्यावृत्तित्वाप्रसङ्गात्। एवं सर्वेषामेव वस्तूनां तत्तत्क्षणादिवृत्तित्वरूपविशेषणभेदाद्भेदप्रसक्त्या क्षणभङ्गापत्तिपर्यवसान(नं दुर्वार)मेव। अथ प्रत्यभिज्ञाद्यनुरोधेन एकस्मिन्नानादेशकालवृत्तित्ववैशिष्ट्यं स्वीक्रियत एव। परन्तु गुणे द्रव्यवृत्तित्वविशिष्टसत्ता नास्ति इदानीं पूर्वक्षणवृत्तित्वविशिष्टघटत्वं नास्तीति प्रतीत्यनुरोधेन मिथो भिन्ना अपि तत्तद्वि(शेषणवि)शिष्टसत्वत्वादयः स्वीक्रीयन्ते। तदवलम्बनतयैवैतादृशप्रतीत्यनुपपत्तिः। द्रव्यवृत्तित्ववैशिष्ट्यपुरस्कारेण चानुगतसत्वादेर्द्रव्यत्वानुमापकता न स्वीक्रियते।अपितु तदन्यतादृशविशेषणविशिष्टस्य गुणाद्यवृत्तिवस्तुन एवेति तत्र द्रव्यत्वादिव्याप्तिविरहेऽपि न क्षतिरितिचेत्तादृशवस्तूनां केन रूपेण व्याप्यता। न द्रव्यवृत्तित्वविशिष्टत्वेन तादृशरूपस्याव्याप्यानुगतधर्मसाधारणात्। नापि तादृशविशेषणविशिष्टतत्तव्द्यक्तित्वादिना तादृशविशेषणवैशिष्ट्यांशस्य वैयर्थ्यात्। तव्द्यक्तित्वानुपस्थितावनुमानानिर्वाहाच्च। एवं विशिष्टसत्ता नास्तीत्यत्र विशिष्टस्याप्यवच्छिन्नाभावस्य न विषयतासंभवः तद्रूपावलीढाननुगतसत्तावति तद्रूपावच्छिन्नाभावा-

कृष्णंभट्टीयं।

तत्रेति। ननु यथा परंपरासंबन्धेनोभयत्वस्य हेतुत्वं तथा विशिष्टानतिरिक्तत्वेऽपि वैशिष्ट्यस्यापि स्वावच्छिन्ननिरूपितसमवायेन हेतुत्वं वक्तुं शक्यत इति चेदिदमेवानतिरेकेत्वित्यादिना उद्भाव्यं। इदानीं पिहितमित्यदोषः। न केवलमनुगतधर्ममात्रोच्छेदप्रसंगमात्रं किंत्वन्यदपीत्याह—**एवमिति**। अनुगतधर्ममात्रोच्छेदं क्षणभङ्गापत्तिपर्यवसानं चोद्धृत्य विशिष्टशब्दबोध्यवस्तुनोऽतिरिक्तत्वं व्यवस्थापयति। **परंत्विति**। **न द्रव्यत्वेति**। तस्या एव गुणादौ सत्वेन व्यभिचारित्वात्। **वस्तुन एवेति**। केन रूपेण तादृशवस्तुनो हेतुतेति चेदिदानीं रूपविवेचनं नास्त्येवेति बोध्यम्। धर्मः सत्तादिः। वैशिष्ट्यांशत्यागेऽप्याह—**तद्यक्तित्वादिति**। विशिष्टसत्ता नास्तीति प्रत्य-

१ हेतुत्वं स्वीकृत्यैव बा. मै. पा.

अनतिरेके तु विशेषणविशेष्यसंबन्धस्यैव परंपरया व्या(प्त)-प्यत्वात् ।

संभवात् । नापि तत्तद्व्यक्तित्वावच्छिन्नाभावस्य तत्तद्व्यक्तित्वस्य प्रतियोगितावच्छेदककोटावनुल्लेखात् । विशेषणावच्छिन्नप्रतियोगिकसंबन्धो विलक्षणः सच नानुगतसत्तायाः संबन्धः, अपितु अतिरिक्तविशिष्टसत्ताया एवेति प्रतियोगितावच्छेदकधर्मस्य गुणादिवृत्तिसत्तासाधारण्येऽपि तत्र विशिष्टभावोऽक्षत एव । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकशून्यत्वमात्रस्य विशिष्टाभावसत्वेऽपि स्थितत्वादिति चेत्तर्हि गुणादिसत्ताया एवातिरिक्तसंबन्धो गुणादिव्यावृत्तः स्वीक्रियतां किं सत्तान्तरकल्पनेनेत्यभिप्रेत्याह । **अनतिरेकेत्विति । विशेषणविशेष्यसंबन्धस्यैवेति** । सत्वनिष्ठगुणान्यत्ववैशिष्ट्यस्यैवेत्यर्थः । **परंपरया** । परंपरासंबन्धेन स्वावच्छिन्ननिरूपितसमवायादिसंबन्धेनेति यावत् । **व्याप्यत्वादिति** । गुणान्यत्ववैशिष्ट्यावच्छिन्नायाः अधिकरणताया गुणादावसत्वात् । तादृशसंबन्धेन तद्वैशिष्ट्यस्य द्रव्यमात्रवृत्तित्वादिति भावः । एवकारेण सत्तायाः व्यवच्छेदः । यत्र विशेषणविशेषावच्छिन्नसत्ताहेतुकद्रव्यत्वानुमितिरभिमता तत्तद्वैशिष्ट्यहेतुकानुमितिरेवोपेयते वैशिष्ट्यपरंपरासंबन्धेन व्याप्तिधीविरहे चानुमितिरप्रसिद्धैवेति भावः । यद्यपि विशिष्टनिरूपितस्य विलक्षणत्वे तादृशसंबन्धेन सत्ताया अपि व्याप्यत्वं निर्वहति । तथापि विशेषणावच्छिन्ननिरूपितसमवायत्वादिना न सत्तादिसंबन्धता किंतु

कृष्णंभट्टीयं ।

यस्य स्वावच्छिन्नाभावावलम्बनता न स्वीक्रियते । अपितु विशिष्टाभावावलम्बनेत्याशङ्कते । **विशेषणेति । तर्हीति । गुणादिव्यावृत्त इति** । गुणो विशिष्टसत्तावानिति प्रतीतिनिरासाय सत्ताया इति षष्ठीसंबन्धघटकतत्प्रतियोगिकत्वमात्रार्था सत्तासंबन्धताया अनुपदमेव निराकरणात् । **यद्यपीति** । एवंच विशेषणविशेष्यसंबन्धस्य व्याप्यत्वानुसरणं व्यर्थमिति भावः । **न सत्तादीति** । अन्यथा कदाचित् गुणः सत्तावानिति प्रत्ययस्य भ्रमत्वमपि स्यात् । नन्वेवं समवायमात्रस्य सत्तासंबन्धत्वे गुणो विशिष्टसत्तावानिति प्रमाप्रसंग इत्याह—**किं त्विति** ।

---

१ अनतिरिक्तत्वे तु का. पा.　२ संबन्ध्यन्तरकल्पनेनेति मै. पा.

केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः।

विशिष्टसत्तावानिति प्रत्यये वैशिष्ट्यस्यैव सत्तादिविशेषणतापन्नस्य निरुक्तपरंपरासंबन्धेन धर्मिणि विशेषणत्वोपगमान्नातिप्रसङ्ग इत्याशयेनेदमभिहितम्। नन्वेवंरीत्या प्रथमलक्षणपरिष्कारे वक्ष्यमाणकेवलान्वयिसाध्यकाव्याप्त्यप्रसङ्गतिः। तत्रापि संबन्धान्तरेण हेतुमद्वृत्तौ हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्याभावप्रसिद्ध्या लक्षणगमनसंभवादत आह—**केवलान्वयिनीति। द्वितीयलक्षणेति**। नच तच्चेत्यनेनोभयत्वाद्यवच्छिन्नस्यैव परामर्शात्प्रथमलक्षणेऽव्याप्त्यसंभवेऽसङ्गतिर्दुर्वारैवेति वाच्यम्; केवलान्वयिसाध्यके धूमे चाव्याप्तिप्रदर्शनात् तदुभयत्वेनोपस्थितप्रथमलक्षणेऽव्याप्त्यसंभवेऽपि लक्षणद्वये यथायोगं तत्तत्स्थले व्याप्त्यन्वये तात्पर्यात्। यद्यपि धूमादावपि साध्यसामानाधिकरण्यसामान्याभावघटितस्य प्रथमलक्षणार्थस्य नाव्याप्त्यनवकाशः। तथापि यत्किञ्चित्साध्यवद्व्यक्तिभेदनिवेशाभिप्रायेण

कृष्णंभट्टीयं।

सत्तादिविशेषणतेति। द्रव्यं वैशिष्ट्यवदित्यप्रत्ययात्। **नातिप्रसंगः** न गुणो गुणान्यत्वविशिष्टसत्तावानिति प्रत्ययस्य प्रमात्वप्रसंगः। तथाच विशेष्यस्य शुद्धसंबन्ध इति वैशिष्ट्यस्य साध्यव्याप्यत्वमनुसृतमिति भावः। यद्यपि विशिष्टस्वनिरूपितसंबन्धो विशिष्टाधारत्वादिः सत्तासंबन्धः तेन संबन्धेन सत्तावानिति प्रत्ययः गुणो विशिष्टसत्तावानिति प्रत्ययश्च प्रकारतावच्छेदकत्वेन वैशिष्ट्यभान एव तत्संबन्धभानमिति नियममुपेत्य वारणीयः। एवंच तेन संबन्धेन विशिष्टसत्ताया अपि व्याप्यत्वं संभवतीति वैशिष्ट्यस्यैवेत्येवकारवैयर्थ्यम्। तथापि तत्संबन्धो न सार्वभौमाभिमत इति प्रदर्शनायैवकारः अतएवाशयेनेत्युक्तम्। द्वितीयलक्षणे साध्यवत्सामान्यभेदनिवेशे धूम इत्युन्मत्तप्रलपितं स्यात् अव्याप्त्यभावात्। अतस्तदव्याप्तेर्विशेषनिवेशाभिप्रायकत्वं वाच्यम्। तथासति तद्रीत्या प्रथमलक्षणाव्याप्तिरिति दुर्वारैवेत्याशयेन समाधत्ते—**तथापीति**। यत्किंचित्वं साध्यवति

न्यायरत्नं।

ऽतिव्याप्तिसंभवस्तथापि धूमाधिकरणतदनधिकरणसाधारणैकवह्निसंभवमभिप्रेत्यैतावदनुधावनम्। ननु शुद्धसत्तायां तत्तद्व्यक्तिवृत्तित्वासत्वेऽपि व्यासज्यवृत्तिधर्मवत्स्वीकारसंभवाद्गगनादिवद्वाऽवृत्तित्वेऽप्येकत्वसंभवादत आह—**एवमिति**।

तच्चिन्त्यम् । सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमिति प्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परंपरासंबन्धेन सामानाधिकरण्यस्य वा अभावं गुणेऽवगाहते । नतु सत्तायामेव द्रव्यवृत्तित्वाभावं ।

द्वितीयलक्षणस्यैव यत्किञ्चित्साध्यसामानाधिकरण्याभावनिवेशाभिप्रायेणैव प्रथमलक्षणस्यापि नानाव्यक्तिसाध्यकस्थलेऽव्याप्तिप्रदर्शनमविरुद्धम् । मूलेच यत्किञ्चित्साध्यानधिकरणाधिकरण इत्युपलक्षणम् । यत्किंचित्साध्याधिकरणावृत्तावित्यपि बोध्यम् । तेन प्रथमलक्षणाव्याप्तिसंपादकहेत्वकथनान्यूनत्वस्य नावकाश इतिध्येयम् । सामानाधिकरण्यस्याव्याप्यवृत्तितायां प्रमाणसिद्धायामेव दर्शिताति व्याप्तिर्वारयितुं शक्यते । तत्रैव न प्रमाणं उक्तप्रतीतेरन्यविषयकत्वादित्याह—**सत्तायामिति । प्रतीतिर्हि इति ।** अभावं गुणेऽवगाहत इत्यग्रिमेणान्वयः । **अवच्छेदकत्वस्येति ।** निरूपकत्वस्येत्यर्थः । तेन सामानाधिकरण्यस्य व्याप्यवृत्तित्वमते तदवच्छेदकत्वस्य प्रामाणिकत्वेऽपि न क्षतिः । उक्ताकारप्रतीतौ अवच्छेदकत्वानुल्लेखात् । अवच्छेदकत्वाभावावगाहिता न संभवतीत्याशङ्क्याह—**परंपरेति ।** ननु परंपरासंबन्धो न वृत्तिनियामकः । आकाशं द्रव्यत्वसामानाधिकरण्यवदित्यप्रत्ययात् इति उक्तसंबन्धावच्छिन्नाभाव एवाप्रामाणिक इति तादृशाभावावलम्बनतापि नोक्तप्रतीतेः संभवतीत्याशङ्कोद्धारायानुरूपदृ-

कृष्णंभट्टीयं ।

बोध्यम् । विशिष्टानतिरिक्ततामते साध्यतावच्छेदकावच्छिन्नविवक्षयैव विशिष्टसत्तादिसाध्यकातिव्याप्तिवारणात् तदतिरिक्ततामते तु लक्षणद्वयेऽपि साध्य एव तन्निवेशेऽपि न क्षतिः । नानाधिकरणकेति दीधितिदर्शनात् तत्रापि साध्यवत्येव वा तत् । आकाशमिति । सत्तायां गगनान्तर्भावेन द्रव्यत्वसामानाधिकरण्यात् । घटो द्रव्यत्वसामानाधिकरण्यवानिति

न्यायरत्नं ।

न केवलमनुगतधर्ममात्रोच्छेदः किंत्वन्यदपीत्याह—एवमिति । केचित् ननु विशिष्टसत्तानिष्ठतद्व्यक्तित्वानुपस्थितिदशायां नानुमितिरनुभवसिद्धेत्यत आह—

सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृ-

---

ष्टान्तमाह—द्रव्यत्वे इति । गुणस्यावच्छेदकतानियामकद्रव्यत्वसंबन्धशून्यतया द्रव्यत्वनिष्ठाभावावच्छेदकत्वं न संभवतीत्यगत्या गुणनिष्ठो द्रव्यत्वपृथिवीत्वसामानाधिकरण्यावच्छेदकत्वस्य परंपरासंबन्धावच्छिन्नतादृशसामानाधिकरण्याभाव एव तादृशप्रतीतिविषय इति अवश्यं उपेयम् । तद्वदत्रापीत्यर्थः । स्वरसतो यादृशशब्दात् यादृशार्थः प्रतीयते तादृशशब्दोल्लिखितप्रत्यये तादृशार्थविषयकत्वमेवासति बाधके युज्यत इत्याशयेन दर्शितप्रतीतेः सत्तायां गुणावच्छिन्नद्रव्यवृत्तित्वाभावावगाहितायां बाधकप्रतीतिमाह—सत्ता न-द्रव्यवृत्तित्वाभाववतीति । नच द्रव्यवृत्तित्वाभावाभावस्य द्रव्यवृत्तित्वरूपस्य सत्तायामस्मन्मतेऽपि सत्तात्वम् । नैतस्याः प्रतीतेर्बाधकत्वं संभवति विरोध्यविषयकत्वादिति वाच्यम् । तादृशशब्देन द्रव्यवृत्तित्वाभाववद्भेदस्यैव प्रत्ययनात् । अपरप्रतीतेरपि तद्भेदावगाहित-

कृष्णंभट्टीयं ।

सामान्याकारस्य सर्वमतसिद्धत्वात्स नोक्तः । गुणस्येति । समवायरूपतादृशसंबन्धशून्यत्वमुक्तं, सामान्यतः तादृशसंबन्धशून्यत्वे तु नित्यगुणो बोध्यः । कालिकसंबन्धस्य जन्यगुणे सत्वात् । अथवा कालिकसंबन्धस्याप्यवच्छेदकतानियामकत्वे इदमिदानीमिति प्रत्ययः स्यात् । नच कालिकसंबन्धेनावच्छेदकस्यापि पूर्वोक्तयुक्त्या देशविधया अवच्छेदकत्वस्वीकार इति वाच्यम् । सकलकाले आत्मत्वाकाशत्वोभयसामानाधिकरण्यसत्वेन निरवच्छिन्नतया तथाभावविरहादुक्तव्याप्तेरप्रयोजकत्वाच्च । कालिकाव्याप्यवृत्तित्वापत्तिविरहात् । तत्कल्पस्य सिद्धान्तविरुद्धत्वादित्यवधेयम् । अनुरूपमिति । वृत्त्यनियामकसंबन्धावच्छिन्नाभावाङ्गीकारे । अन्यथा द्रव्यत्वनिष्ठपृथिवीत्वसामानाधिकरण्ये गुणनिरूपितत्वमर्थो बोध्यः । कदाचित् वृत्त्यनियामकसंबन्धावच्छिन्नाभावो भवतु । सत्तायां गुणे न द्रव्यवृत्तित्वमित्याकारानुरोधात् । सत्वव्याप्यवृत्त्यभाव इति सूचनाय तदुक्तम् । सत्ता नेत्यादिकं न दूषणान्तरं चकाराभावात् । अतो दृष्टान्तेस्तु बाधकवशेनान्यथोपपादनं प्रकृते किं बाधकमित्याशङ्कायामिदमित्याशयेनावतार-

न्यायरत्नं ।

एवमिति । द्रव्यवृत्तित्वाभाववद्भेदस्यैवेति । तद्बोधकसमानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारसत्वादिति भावः । अतीन्द्रियसाध्यकेति

या बाधकत्वात् भेदस्याव्याप्यवृत्तिताविरहेण सामानाधिकरण्याभाववद्भेदस्य तदभावविरोधित्वात् । यदिच भेदस्याव्याप्यवृत्तित्वमतमवलम्ब्य तादृशप्रतीतेर्विरोध्यविषयकत्वमुपपाद्यते तदा सत्तायां द्रव्यसामानाधिकरण्याभावेऽपि तदधिकरणभिन्नत्वस्याप्यक्षततयाऽतिव्याप्तिवारणमशक्यमिति भावः । अव्याप्यवृत्तित्वसाध्यकदर्शितप्रतीतेरभावरूपविशेष्ये सत्तावृत्तित्वावगाहिताया उपगमात्तत्राभावविशेष्यकसत्तावृत्तित्वविरोधिविषयकप्रत्ययं बाधकतयोपन्यसति—द्रव्यवृत्तित्वाभाव इति । यद्यपि द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वं गुणाद्यवच्छेदेन नतु द्रव्यावच्छेदेनेति तदवच्छेदेन तत्र सत्तावृत्तित्वाभावः संभवति । एवं सत्तावृत्तित्वसत्तात्वसामानाधिकरण्यरूपम् । सामानाधिकरण्यस्याव्याप्यवृत्तित्वमते अव्याप्यवृत्तीति । तदनवच्छेकगुणत्वाद्यवच्छेदेन द्रव्यवृत्तित्वाभावे तदभावः संभवत्येवेति न विरोधः । तथाप्युक्तयुक्त्या दर्शितप्रतीतेः सत्तावृत्तिभेदावगाहितया बाधकत्वं दुर्वारमेव । यत्तु सत्तावृत्तावभावेऽवच्छेदकभेदेन सत्तावृत्तित्वाभावसंभवेऽपि अवच्छेदकाप्रतीतिदशायां

कृष्णंभट्टीयं ।

यति—स्वरूपसत इति । अशक्यमेवेति । हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्याभावाधिकरणं यद्यत् तत्तद्भिन्नत्वरूपलक्षणकरणे व्याप्यावृत्तिधर्मस्योपलक्षणत्वेनाव्याप्तेः साध्याघटितत्वं विशेषणत्वे तद्विशिष्टतद्व्यक्तित्वमप्यव्याप्यवृत्त्येव भविष्यति । यदिच तत्समानाधिकरणसकलतद्व्यक्तित्वावच्छिन्नभिन्नत्वमर्थ इति मन्यते, तदापि व्यभिचार्यखण्डद्रव्यवृत्तिरूपाद्यात्मकतद्व्यक्तित्वस्थलेऽतिव्याप्तेः । उक्तार्थस्य उदक्षरत्वाच्चेति । यद्यपीत्यादि । नच द्रव्यवृत्तित्वाभावनिष्ठसत्तावृत्तितायां कथं गुणस्यावच्छेदकत्वं अवच्छेद्याधिकरणीभूतद्रव्यवृत्तित्वाभावेन सार्धं गुणसंबन्धाभावादिति वाच्यम् । द्रव्यवृत्तित्वाभावे गुणावच्छेद्यतायाः सत्वेन सत्ताद्रव्यवृत्तित्वाभावयोः संबन्धस्य सत्तावृत्तित्वलक्षणस्य तदवच्छेद्यत्वात् । संयोगस्याग्रावच्छेद्यतया तत्समवायादेस्तदवच्छेद्यत्वादिति । अथवा यदभावो यदवच्छेदेन तदभाववन्निष्ठवृत्तित्वमपि तदवच्छेदेनेत्यनुभवानुसारेण तथोक्तिः । तदनवच्छेदकेति । द्रव्यवृत्तित्वाभावे गुणत्वे सत्तावृत्तित्वं नास्तीति अनुभवादिति भावः । दुर्वारमेवेति । एवंच प्रमात्मकद्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रत्ययसत्वे सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीते-

त्तिरित्यादिसर्वजन(प्रसिद्ध)प्रतीतिबाधितत्वात् । बाधकाभावात्तु संयोगतदभावयोरवच्छेदकभेदेन एकत्र प्रतीत्या तदुभयोरेकत्र प्रसिद्धिः । अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारि-

---

जायमानणत्प्रत्ययस्य सत्तावृत्तित्वग्रहप्रतिबन्धकतया तदुत्तरं जायमानायाः सत्ताया गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतेः सामानाधिकरण्याभावे सत्तावृत्तित्वावगाहित्वासंभवेन गुणनिष्ठसामानाधिकरण्यावच्छेदकत्वाद्यभावावगाहित्वे सर्वत्रैव तदवगाहित्वकल्पनमुचितमिति भाववर्णनम् । तदसत् । एवं सति अवच्छेदकाविषयिण्या द्रव्यसमानाधिकरणत्वेन सत्तायां तत्सामानाधिकरण्यविषयकप्रतीतेरपि बाधकतासंभवेन सत्ता न द्रव्यवृत्तित्वाभाववतीत्यादि पर्यन्तानुधावनस्य निर्बीजत्वापातात् । नन्वेवं संयोगादिमति संयोगादेरप्यभावो नायातु मूले न कपिसंयोग इति प्रतीतेरपि मूलनिष्ठसंयोगाद्यवच्छेदकत्वाभावावलम्बनतयोपपत्तेरित्यत आह—**बाधकाभावादिति** । तत्र कपिसंयोगाभावो वृक्षावृत्तिरित्यादिप्रत्ययस्याननुभवादिति भावः । संयोगाभावे वृक्षावृत्तित्वप्रत्यय इव द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वप्रत्ययेऽपि विवादसंभवाद्यत्र सामानाधिकरण्याभावस्य न प्रत्यक्षसंभवः तत्र तत्सत्वे मानाभावेन तदनधिकरणत्वं निष्प्रत्यूहमित्यतिव्याप्तिरित्याह—**अतीन्द्रियसाध्यकमिति ।**

कृष्णंभट्टीयं ।

द्रव्यवृत्तित्वाभावविषयकाया असंभवः । कथंचिज्जातायाश्च पूर्वप्रतीतिविषयविरुद्धार्थविषयकत्वेन अप्रमात्वं । नहि विरुद्धविषयकयोरुभयोः प्रतीत्योः प्रमात्वसंभवः । एवंच सत्तायां गुण इत्यादिप्रतीतिः प्रमात्वेसति गुणावच्छेद्यद्रव्यवृत्तित्वाभावानवलम्बना तद्विरुद्धद्रव्यवृत्तित्वाभाववद्भिन्नत्वप्रकारकप्रमात्मकप्रत्ययकत्वादिति प्रयोगः । यः प्रत्ययः यत्पदार्थविरुद्धपदार्थविषयकप्रमात्मकप्रत्ययान्तरकः स प्रमात्वे सति तत्पदार्थविषयकत्वाभाववानिति व्याप्तेः । यद्वा सत्ता द्रव्यवृत्तित्वाभावनिष्ठप्रमीयविषयतानिरूपितविषयताशून्यद्रव्यवृत्तित्वाभाववद्भिन्नत्वनिष्ठप्रमाप्रकारतानिरूपितविशेष्यताशालित्वात् । यद्विपरीतनिष्ठप्रमाप्रकारतानिरूपितविशेष्यताशालित्वं यत्र तत्र तन्निष्ठप्रमाविषयतानिरूपितविषयताशून्यत्वमिति व्याप्तेरिति । **अतीन्द्रियसाध्यक इत्यादि दीधितौ** अतीन्द्रियसाध्यकमेकं अतीन्द्रियहेतुकं चरममिति व्यभि-

ण्यतिप्रसङ्गाच्च । तत्र सामानाधिकरण्याभावस्य प्रत्यक्षासंभवे-नासिद्धेः । नच तदभाववद्वृत्तित्वेन तत्र तदनुमेयं तद्वद्वृत्तिभि-

---

इदं गुरुद्रव्यत्वात्पृथिवी गुरुत्वादित्यादावित्यर्थः । अथवा स्तम्भादौ पिशाचत्वाभावस्यैव स्तम्भत्वादौ पिशाचत्वसामानाधिकरण्याभावस्य महति वायौ रूपाभावस्येव महत्त्वादौ रूपसामानाधिकरण्याभाव-स्यापि प्रत्यक्षत्वादुभयत्रातीन्द्रियत्वोपादानम् । तत्रेति । गुरु-त्वादिसाध्यकस्थले साध्यसामानाधिकरण्याभावस्यातीन्द्रियप्रतियो-गिकतया अतीन्द्रियत्वेन अतीन्द्रियहेतुकस्थले च धर्मिण एव तथात्वात् । हेतौ साध्यसामानाधिकरण्याभावस्य प्रत्यक्षासंभ-वेन तत्र तदसिद्धेरित्यर्थः । तदभाववद्वृत्तित्वेन गुरुत्वाभा-ववद्वृत्तित्वेन । तत्र द्रव्यत्वादौ । तत् गुरुत्वादिमद्वृत्तित्वा-भाववत्वम् । अनुमेयमिति । तद्विरुद्धदृष्टान्तेनेत्यादिः । तद्वदिति ।

कृष्णंभट्टीयं ।

चारिद्वयं प्रतीयत इत्याशयेनाह—इदं गुर्विति । साध्यविशिष्टवृत्तित्वा-भावनिवेशमभिप्रेत्य । ननु दीधितौ गुरुत्वविशिष्टवृत्तित्वाभावस्यैव प्रत्यक्षा-संभव उक्तः । तस्य क्षितिपाथोन्यतरवृत्तित्वाभावानात्मकत्वात् । ननु तदु-पलक्षितवृत्तित्वाभावरूपस्य गुरुत्वसामानाधिकरण्याभावस्य तेजआद्यवच्छे-देन द्रव्यत्वादौ पृथिवीजलान्यतरवृत्तित्वाभावस्य प्रत्यक्षतया गुरुवृत्तित्वा-भावस्यापि तदात्मकत्वेन प्रत्यक्षत्वात् । नच समनियताभावभेदमते दीधि-तिसंगतिः । तथापि प्रत्यक्षभूतेन जलपृथिव्यन्यतरवृत्तित्वाभावरूपलिङ्गेन तदनुमानसंभवात् । तथाच गुरुत्वसाध्यके नातिव्याप्तिसंभवः वक्ष्यमाणो-पाधेरुपाधित्वभङ्गाच्च । चकारादर्शनेन व्यभिचारिद्वयालाभः वक्ष्यमाणास्वर-सश्चेति मनस्त्ववदणुत्वादित्येकव्यभिचारिपरतामाह—अथवेति । दृष्टा-न्ताभ्यां क्रमेणोक्तस्थले साध्यसामानाधिकरण्याभावप्रत्यक्षलाभः । तद्विरु-द्धम् । आत्मत्वोष्णस्पर्शादि । नन्वणुत्वं मनोवृत्तित्वाभाववत् मनस्त्वाभाव-वद्वृत्तित्वादात्मवदित्यादौ साध्ये व्यभिचारनिरूपकाधिकरणावच्छेद्यत्वस्य कथं

न्यायरत्नं ।

दीधितावतीन्द्रियसाध्यकमेकसपरं चातीन्द्रियहेतुकमिति व्यभिचारिद्वयं प्रतीयत इत्याशयेनाह—इदं गुर्विति । ननु गुरुत्वविशिष्टवृत्तित्वाभावस्यातीन्द्रियताद-शवृत्तित्वप्रतियोगिकतयाऽतीन्द्रियत्वेऽपि गुरुत्वोपलक्षितवृत्तित्वाभावस्य जलपृथि-व्यन्यतरवृत्तित्वाभावात्मकस्य न तथात्वलक्षणे साध्योपलक्षिताधिकरणवृत्तित्वा-

न्नत्वस्योपाधित्वात्। किंचेदमिदानीमिति प्रतीतिनियामकविशे-

गुरुत्वादिमदित्यर्थः। उपाधित्वादिति। तद्वद्वृत्तिभिन्नत्वस्य तद्विरुद्धदृष्टान्ते साध्यव्यापकतायाः पक्षीभूतप्रकृतहेतौ च भेदस्य व्याप्यवृत्तित्वेन साधनाव्यापकतायाः संग्रहत्वात्[1]। पक्षे साध्यसन्देहेन पक्षावृत्तितादृशोपाधौ साध्यव्यापकत्वनिश्चयासंभवेपि सन्दिग्धोपाधित्वस्य दुर्वारत्वात्। अनुकूलतर्कविरहे(ण) संदिग्धोपाधेरपि दूषकत्वादिति भावः। नन्वेवमतीन्द्रियसंयोगादेरप्यवृत्तित्वं न स्यात्। तद्वति तदभावस्य प्रत्यक्षासंभवेनासिद्धेः। अनुमानस्याप्रयोजकत्वात्। एवं सामानाधिकरण्यस्याव्याप्यवृत्तिता(मत)माश्रित्य मणिकृतैव सिद्धान्तलक्षणे हेतुसामानाधिकरण्याभावे प्रतियोगिसामानाधिकरण्याभावस्य विशेषणताकल्पे कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण इति ग्रन्थेनाव्याप्यवृत्तिसाध्यकव्यभिचारिणि अतिव्याप्तिरुद्भृता। तथाच तन्मते युक्तिर्भवतु मा वा उभयथापि तदाश्रित्य पूर्वपक्षलक्षणं व्याचक्षाणो नापराध्यतीत्याशङ्क्य दूषणान्तरमाह—किंचेति। इदमिदानीमिति। कालिकविशेषणतात्मकविलक्षणसं-

कृष्णंभट्टीयं।

लाभः तदनवच्छेद्य तदसिद्धौ चार्थान्तरप्रसंगः। परमाण्ववच्छेद्यमनोवृत्तित्वाभावसाधने तु आत्मत्वे दर्शितहेतुमति साध्यासत्वेन व्यभिचारप्रसंग इति चेन्न। हेतौ मनोवृत्तित्वस्य निवेशनीयत्वेन व्यभिचाराभावात्। द्रव्यत्वादेरणुत्वतुल्यत्वेऽपि तत्र कथंचित्सहचारग्रहः। अथवा मनोवृत्तित्वाभावस्य परमाण्ववच्छेद्यत्वे लाघवमिति लाघवज्ञानसहकारेणैवेष्टसिद्धेर्न हेतौ तद्विशेषणं देयम्। एतेन मनो घटवृत्तित्वादित्यादौ व्यभिचारवारणाय पक्षान्यगुणान्यत्वं अवच्छेदकावृत्तिगुणान्यत्वं वा विशेषणं। तत्राप्यणुत्वमनःपरमाणुसंयोगादेः पक्षत्वे स्वरूपासिद्धिवारणाय पक्षान्यत्वादिप्रवेश इत्यपास्तम्। परंतु परंपरयाऽणुत्वत्वं हेतुः। अन्यथानुगतरूपेण हेतुत्वेऽपि साध्यवद्वृत्तित्वतदभावयोरेकत्रासत्वेन विवादायोगात् मनस्त्वं साध्यमिति बोध्यम्। नन्वेवं प्रसिद्धानुमाने पर्वतेतरत्वादेः संदिग्धोपाधित्वापत्तिरत आह—अनुकूलेति। अनुमानस्येति। अव्याप्यवृत्तित्वसाधनार्थस्य गुणत्वव्याप्याव्याप्यवृत्तिवृत्तिजातीयमत्वरूपलिङ्गस्य। तथाचाप्रयोजकत्वशङ्काविरहदशायां संयोगे व्याप्यवृत्तित्वसिद्धिवदुपाधिशङ्कायाः सर्वदा सत्वेन तद्विरहदशायामतीन्द्रियहेतावतीन्द्रियसाध्यसामानाधिकरण्याभावानुमितिसंभवान्नाति-

---

१ सुग्रहत्वात्। मै. पा०.

षणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः । तेन संबन्धेनाधिक-रणे काले तेन संबन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः ॥

इति श्रीमद्रघुनाथभट्टाचार्यशिरोमणिविरचितायां शिरोमण्याख्यतत्त्व-चिन्तामणिव्याख्यायां दीधित्यपराख्यायां सार्वभौमपरिष्कारः समाप्तः ॥

वन्धेनेत्यर्थः । अभावादेरिहेति प्रत्ययनियामको यो दैशिकविशेषण-ताविशेषः तत्र तादृशसंबन्धवैलक्षण्यस्य प्रामाणिकतालाभार्थं विल-क्षणप्रतीतिनियामकत्वाभिधानम् । नचेदानीमिति प्रतीतौ संबन्धवै-लक्षण्याभावेऽपि कालत्वेनाधिकरणावगाहादिहेति प्रत्ययात्तस्य वै-लक्षण्यमुपपद्यत इति किं संबन्धवैलक्षण्येनेति वाच्यम् । संबन्ध-विशेषानुयोगित्वादन्यस्य कालत्वस्य दुर्वचत्वात् । इदानीं कालत्वा-भाव इत्यादिप्रतीत्या कालत्वाद्यभाववृत्तेः प्रामाणिकत्वे काले कालत्वं नास्तीति प्रतीत्यनुदयान्नास्तीत्याकारकप्रतीतौ कालिकसंबन्धव्याप्य-रूपावच्छिन्नाया एव विशेषणतायाः नियामकत्वस्यावश्यकत्वादै-शिककालिकसाधारणसंबन्धतावच्छेदकस्याप्रामाणिकतया कालिक-संबन्धे संबन्धतावच्छेदकीभूतस्य वैलक्षण्यस्य सिद्धेर्निष्प्रत्यूहत्वाच्च । **सद्धेताविति** । कालत्वादिसाध्यकघटादिहेतावित्यर्थः । **कालेति** । कालावच्छेदेनेत्यर्थः । **अप्रसिद्धेरिति** । वृत्तिमतः कालावच्छेदेन

कृष्णंभट्टीयं ।

व्याप्तिरिति भावः । **अभावादेरिति** । गगनादाविह कर्मत्वं नास्तीति प्रत्ययेऽपि इदानीं कर्मत्वं नास्तीति प्रत्ययाभावात्तत्र तादृशप्रत्ययवारणाय वैलक्षण्याभिधानम् । अत्र विशेषणतात्वेन संबन्धतासंभवे विशेषणपदोपा-दानाद्यदि कालिकविशेषणतात्वेन संबन्धता तदा महाकालानुयोगिकविशेष-णतात्वेन संबन्धता स्यात् । विशेषणतायां विशेष इत्यर्थात् । तथाच तेन संबन्धेन घटादिसाध्यकेऽव्याप्तिरिति मतं निराचिकीर्षुर्विशेषपदस्य विशेषणतात्वाप्रसि-द्धिसूचकतया विशेषरूपेण संबन्धत्वं निराकरोति । **दैशिकेति** । विशेषणतात्वं चेदनुगतं स्यात्तदा स्यादपि तत्प्रसंगः तदैवचाप्रामाणिकमित्यर्थः । **व्यभिचा-रिणि** जातित्वाभाववान् घटत्वात्, एतदात्मत्वाभाववान् आत्मनः शब्द-वान् गगनमहाकालान्यतरस्मादित्यादौ । धूमवान् वह्नेरित्यादौ तादात्म्येन हेतोरपि कालिकादिसंबन्धेन न संबन्धत्वात्तदतिरिक्तेति । **कालावच्छेदे-**

कालत्वादिसामानाधिकरण्यवत्वात्, अवृत्तिनिष्ठतदभावस्य कालानवच्छिन्नत्वात्, अवच्छेद्याधिकरणसंबन्धिनोऽवच्छेदकत्वात्॥ अथ हेत्वधिरणमहाकालावच्छेदेन महाकाले एव कालवृत्तित्वाभावः प्रसिद्ध्यति। महाकालस्य गगनादिवदवृत्तितया तत्र कालवृत्तित्वा(स्या)सत्वात्स्वस्य[1] तादात्म्यसंबन्धेन स्वसंबन्धितया स्वनिष्ठाभावावच्छेदकत्वसंभवाच्च। नच तादात्म्यसंबन्धो नावच्छेदकतानियामकः। रूपे पर्वते न वह्निमत्संयुक्तत्वमिति प्रतीतिवत् रूपे स्वस्मिन्न वह्निमत्संयुक्तत्वमित्यादिप्रतीतेः सविवादत्वादिति वाच्यम्। तथासति तादात्म्यसंबन्धेन व्यभिचारिणि तदतिरिक्तसंबन्धिनि स्वासंबद्धे हेतौ तत्संबन्धेन हेतुमत्त्वावच्छेदेन साध्यसामानाधिकरण्याभावविरहादतिव्याप्तेः स्फुटतया तद्दोषापेक्षया अनुचितत्वात्। अत्र केचित्। कालिकसंबन्धेन गगनादेरपि वृत्तित्वमिति मताभिप्रायकोयं ग्रन्थः। तथाच कालावच्छेदेन महाकालेपि कालिकसंबन्धेन साध्यवद्वृत्ति-(त्वसत्वा)त्वात्। तद्विरहिणोऽप्रसिद्धिर्न विरुध्यत इति वदन्ति। वस्तुतस्तु स्वस्मिन्साध्यसामानाधिकरण्यतदभावयोर्वृत्त्यवच्छेदकत्वे स्वाधिकरणत्वमेव नियामकं नतु स्वसंबन्धितामात्रम्। स्वाधिकरणावच्छेदेनैव स्वस्मिंस्तत्प्रतीतेरनुभवसिद्धत्वात्। अतएव संबन्धान्तरेण संबद्ध इत्युपेक्ष्य संबन्धान्तरेण वर्तमान इत्यभिहितम्। नच तादात्म्यादिवृत्त्यनियामकसंबन्धेन व्यभिचारिण्यतिव्याप्त्यकथनान्न्यूनता दुर्वारैवेति वाच्यम्। तादृशसंबन्धेन साध्यवद्वृत्तित्वस्य हेत्वधिकरणत्वस्य चाप्रसिद्ध्यतिव्याप्त्यसंभवात्। नच तेन संबन्धेन सद्धेतौ लक्षणगमनाय वृत्तेरधिकरणतायाश्च संबन्धप्रतियोगित्वानुयोगित्वयोरेव निवेशनीयत्वादतिव्याप्तेरावश्यकतेति वाच्यम्। प्राचां मते तेन संब-

कृष्णंभट्टीयं।

नेति। कालस्याभावानवच्छेदकत्वलाभार्थं। तथाचावच्छेदकात्मकविशेषणाभावाद्विशेष्याभावाच्चाप्रसिद्धिरित्यर्थः। दीधितौ हेतुमतीति चैतदर्थमेव। हेतुमतीत्यस्यानतिप्रयोजनमस्वरसः। अत्रच रूपे स्वस्मिन् वह्निमत्संयुक्तत्वमिति प्रतीतिभयेन तादात्म्यस्यावच्छेदकतानियामकत्वं निराकुर्वन्वृत्त्यनियामकसंबन्धेन व्याप्यव्यापकभावमनुगम्य लक्षणे वृत्त्यादिनिवेशमुपगम्य दीधितिकृदुक्ताप्रसिद्धिं समर्थयते—वस्तुतस्त्वित्यादिना। प्राचां मत

न्यायरत्नं।

भावस्यैव निविष्टत्वादत आह—अथवेति। केचिदिति विशेषरूपेण संसर्ग-

१ तस्य मै. पा.

न्धेन व्याप्तेरनभ्युपगमसंभवेन वृत्त्यादेरपि निवेशसंभव इत्यभिप्रायेणैवातिव्याप्त्यनुद्भावनात् । एतेन हेत्वधिकरणखण्डकालविशेषावच्छेदेन कालिकसंबन्धेन तदवृत्तौ तद्विषयकज्ञान एव साध्यसामानाधिकरण्यप्रसिद्धिः संभवति । नन्वेवमपि कालत्ववान्सर्वत्वादित्यादौ खण्डकालस्य हेत्वनधिकरणतया हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्याप्रसिद्धिर्दुर्वारैवेति वाच्यम् । हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणत्वपर्यन्तानिवेशेन वैशिष्ट्यस्य व्यासज्यवृत्तिधर्मावच्छिन्नस्य यत्र हेतुत्वं तत्र तादृशधर्मस्यैवैतन्मते स्वावच्छिन्ननिरूपिताधिकरणतारूपपरंपरासंबन्धेन हेतुत्वस्यानुमततया उक्तस्थले सर्वत्वस्यैव तादृशसंबन्धेन हेतुतया तादृशसंबन्धेनावृत्तौ कालिकसंबन्धेन कालवृत्तौ गगनत्वादावेव तादृशसंबन्धेन साध्यवद्वृत्तित्वाभावस्य हेत्वधिकरणकालावच्छेदेन प्रसिद्धिरिति परास्तम् । तादृशकाले उक्ततज्ज्ञानस्य विषयतासंबन्धेन सत्वेपि तादृशसंबन्धस्य वृत्तिनियामकत्वानभ्युपगमेन तज्ज्ञानस्य तत्कालीनताविरहेण च तस्य तज्ज्ञानानधिकरणत्वात् । तज्ज्ञाने अभाववृत्तौ तत्कालस्यानधिकर-[१]

कृष्णंभट्टीयं ।

इति । तैस्तादात्म्यसंबन्धेन यस्य हेतुताधर्मस्य वृत्तिनियामकसंबन्धेन तदात्मनि भानमुपगम्य तत्तद्धर्मलिङ्गकानुमितिसामग्र्या व्यापकत्वमुपगम्य तद्धर्महेतुताकतत्साध्यकानुमितिस्वीकारात् । तज्ज्ञानस्येति । विभिन्नकालीनयोर्नाधाराधेयभाव इति भावः । तत्र तादात्म्यस्यावच्छेदकतानियामकत्वेऽपि कालत्वप्रकारकप्रमाविषयत्वसाध्यके तादात्म्यकालिकान्यतरसंबन्धेन कालहेतुकेऽव्याप्तिर्दुर्वारैव । संयोगादिसंबन्धेन वृत्तिमन्मात्रस्य भावाभावोभयस्य कालिकसंबन्धेन महाकालस्य तादात्म्यसंबन्धेन महाकाले सत्वेन साध्यवन्निरूपिततादृशान्यतरसंबन्धावच्छिन्नवृत्तित्वाभावस्य स्वाधिकरणदेशावच्छेदेनाप्रसिद्धेः । गगनादौ च तत्प्रसिद्धावपि हेत्वधिकरणानवच्छिन्नत्वात् । तस्मात्तत्राव्याप्तिप्रतिपादकोऽयं ग्रन्थ उपलक्षणपरतया व्याख्येयः । एवं चाधेयतेत्यादिपूर्वक्षणोऽप्यकिंचित्कर एवेति । अत्र चान्यतरत्वेन संबन्धत्वोपगमप्रसंगो बोध्यः । वस्तुतस्तु ज्ञानं सविषयकं घटादित्यादौ विषयतायाः ग्रन्थकारमते वृत्तिनियामकतया तत्संबन्धेन हेतौ पदार्थमात्रस्य तत्संबन्धेनेश्वरज्ञानवृत्तितया निर्विषयकावच्छेदेनैव साध्यसामानाधिकरण्याभावो बोध्यः । स न हेत्वधिकरणावच्छिन्नः तदवच्छेदेन क्वापि पदार्थे स

१ अनवच्छेदकत्वात् पा. मै.

णत्वात् । महाकालानुयोगिकविशेषणताविशेषेण घटादिहेतुकस्थलाभिप्रायकोयं ग्रन्थः । तादृशसंबन्धेन हेतुतायाः खण्डकालेऽभावान्नोक्तदिशा प्रसिद्धिरित्यपि केचित् । अत्र स्वनिष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकता तादृशसंबन्धावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वं विवक्षणीयमिति नोक्ताव्याप्त्यनवकाशः । स्वावयवपरमाण्वाद्यवच्छेदेन घटादौ वर्तमाने कालत्वादिसामानाधिकरण्याभावे तदधिकरणकालसामान्यस्यानवच्छेदकतया तत्र लक्षणसमन्वयसंभवात् । सत्तावान्जातेरित्यादौ कालिकसंबन्धेन जातिसंबन्धिध्वंसाद्यवच्छेदेन साध्यवद्वृत्तित्वाभावो जातौ प्रसिद्ध इति ज्ञेयम् । केवलान्वयिसाध्यके ज्ञेयत्वादौ सर्वाधिकरणावच्छेदेनैव हेतुतावच्छेदकसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वसत्वात् स्वनि(तन्नि)ष्ठतदभावाप्रसिद्ध्याऽव्याप्तिर्न क्षतिमावहति ।

कृष्णंभट्टीयं ।

न प्रसिध्यतीति अव्याप्तिर्बोध्या । **महेति** । विशेषणरूपेण संबन्धतास्वीकारो स्वरसः । अत्रेत्यादयः परिष्कारस्य पन्थानो द्रष्टव्या इत्यन्वयः । **स्वनिष्ठेति** । शैवालादेः कालिकसंबन्धेन पर्वते सत्वात्तत्र तन्निष्ठसाध्यवद्वृत्तित्वाभावानवच्छेदकत्वाद्धूमान्तरेत्यादिरीत्या चाव्याप्तेः स्वनिष्ठत्वनिवेशः । साध्यवद्वृत्तितावच्छेदकहेतुतावच्छेदकसंबन्धानुपादाने चिन्त्यमेतत् । गगनभिन्नं घटत्वादित्यादौ स्वनिष्ठस्य साध्यसंबन्धत्वसामान्याभावस्य प्रसिद्धेर्हेतुतावच्छेदकसंबन्धनिवेशः । स्वनिष्ठत्वानुपादाने इदं चिन्त्यम् । अधिकरणतायां तादृशसंबन्धावच्छिन्नत्वप्रयोजनं स्फुटम् । स्वनिष्ठत्वं तादृशाधिकरणतायां विवक्षितं तेन धूमरूपयोः साध्यवद्वृत्तित्वाभावस्यैकत्वेपि नाव्याप्तिः । व्यभिचारिवारणाय सामान्यपदं । जन्यमात्रस्य कालोपाधितानयेऽप्याह—**परमाण्विति** । अवच्छेदकतानियामिका दिक्कृतविशेषणता । मूर्तमात्रं न दिगुपाधिः किंतु जन्यमूर्तमित्युक्तौत्वाह—**आदीति** । आदिना महादिक्परिग्रहः । संबन्धः पूर्वोक्त एव । अत्र ज्ञानं सविषयकं घटादित्यादौ विषयतासंबन्धेन हेतौ संयोगादिना स्वाधिकरणभूतलाद्यवच्छेदेन सत्तावान्, सत्ताध्वंसत्वान्यतरवान् जातेरित्यादौ कालिकसंबन्धेन जातिसंबन्धिध्वंसावच्छेदेन अनुयोगिताविशेषसंबन्धेन भेदावच्छेदेनवा, सत्ताध्वंसत्वान्यतरवान् ध्वंसत्वादित्यादौ च क्रियाद्यवच्छेदेन वृत्तित्वाभावो बोध्यः । सर्वेषामपि देशविधयावच्छेदकत्वात् एवं प्रलयभिन्नो गोत्वादित्यादौ समवायेन

न्यायरत्नं ।

तास्वीकारोऽस्वरसः । **अत्रेति** । परिष्कारस्य पन्थानो द्रष्टव्या इत्यनेनान्वितम् । **स्वनिष्ठेति** । धूमान्तरसंयुक्तस्वावयवेत्याद्युक्तरीत्याऽव्याप्तेः स्वनिष्ठत्वनिवेशः ।

मूलकृतैव तत्राव्याप्तेर्वक्ष्यमाणत्वात् । यदिचैवमात्मभिन्नं ज्ञानवदन्यत्वादित्यादौ हेतोरात्मान्यसकलवस्त्ववच्छेदेनैव दैशिकविशेषणतया साध्यवद्वृत्तित्वसत्वात् । आत्मनश्च केनापि संबन्धेन हेतुमत्वाभावात् । तदवच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववद्वृत्त्यसंभवाद्धेतुनिष्ठतादृशाभावाप्रसिद्ध्याऽव्याप्तिरिति विभाव्यते । तदा हेतुतावच्छेदकसंबन्धेन यत्स्वाधिकरणं तदवच्छेदेन स्वस्मि-

कृष्णंभट्टीयं ।

हेतावप्यूह्यम् । केवलसाध्यवद्वृत्तित्वेन रहितः अन्वयः साध्यवद्वृत्तित्वं यस्येति व्युत्पत्त्या साध्यसामानाधिकरण्याभावाप्रसिध्याऽव्याप्तेर्मूलकाराभिमतत्वात् । यदिचेति । वस्तुतस्तु अव्याप्यत्वादेः संबन्धतामते न व्याप्तिरतो यदिचेति । हेतुतेति । आत्मभिन्नं ज्ञानवदन्यत्वादित्यादौ विषयतादिसंबन्धेन हेतौ च हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणे मनःकपालसमवेतत्वाद्यभावो बोध्यः । कालत्ववानिति । अथैतद्दोषवारणाय तर्कालंकारैर्यद्धर्मावच्छिन्नाधिकरणावच्छेदेन हेतुवृत्तिकाभावप्रतियोगितावच्छेदकं साध्यवद्वृत्तित्वत्वं तद्धर्मवत्वं व्याप्तिरिति हेतुतावच्छेदकसंबन्धाविशेषितसाध्यव-

न्यायरत्नं ।

गगनभिन्नं घटत्वादित्यादौ स्वनिष्ठसाध्यवद्वृत्तित्वसामान्याभावाप्रसिद्धेर्हेतुतावच्छेदकसंबन्धावच्छिन्नतादृशवृत्तित्वनिवेशः । समवायेन धूमाधिकरणस्यावयवस्य स्वाधिकरणतावत्सामान्यान्तर्गतस्य स्वनिष्ठतादृशाभावानवच्छेदकत्वविरहादव्याप्तिवारणाय स्वाधिकरणतायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशः सत्ताधिकरणद्रव्यस्य तन्निष्ठतादृशवृत्तित्वाभावानवच्छेदकत्वाद्द्रव्यत्वसाध्यके तत्रातिव्याप्तिवारणाय सामान्यपदम् । हेतुतावच्छेदकसंबन्धेन यत्स्वाधिकरणमिति । अत्र साध्यवद्वृत्तित्वे हेतुतावच्छेदकसंबन्धनिवेशो व्यर्थः । नच संयोगेन धूमवति पर्वतरूपकालेऽयोगोलकीयवह्नेः स्वाधिकरणायोगोलकावच्छेदेनैव कालिकेन वृत्तिः काले वृत्तौ देशस्यावच्छेदकत्वात्तथा चायोगोलकाद्यवच्छेदेन धूमवद्वृत्तित्वसामान्याभावस्य वह्नावसत्वादतिव्याप्तेर्हेतुतावच्छेदकसंबन्धनिवेश इति वाच्यम् । सामानाधिकरण्यनिरूपकमेव तदवच्छेदकमन्यत्तदभावावच्छेदकमिति ग्रन्थकृत्संमतं।तथाच सामानाधिकरण्यानिरूपकस्यायोगोलकस्य तदभावावच्छेदकत्वमव्याहतम्। अन्यथा हेतुतावच्छेदकसंबन्धनिवेशेऽपि संयोगेन धूमसाध्यकेन वह्नेर्हेतुत्वेऽतिप्रसङ्गस्य दुर्वारत्वापत्तेः । परंतु हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणावच्छेद्यहेतुतावच्छेदकसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभाववद्भिन्नत्वरूपलक्षणघटकपदार्थापरित्यागेनैव कतिपयपदार्थविशेषणविशेष्यभावव्यत्ययेनैवेदं लक्षणं कृतमिति ज्ञापनायैव तदुपादानमिति ध्येयम् । अत्र हेतुभेदेन व्याप्तिभेदादुदक्षरत्वाच्च साध्यवद्वृत्तित्वाभावघटितलक्षणान्तरमाह—हेतुतेति । महानसायो-

न्वर्तते यो अभावस्तत्प्रतियोगितानवच्छेदकतादृशसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वकत्वं व्याप्तिरित्येव विवक्षणीयम्। कालत्ववान्घटादित्यादौ घटादौ कालावच्छेदेन वर्तमानः कपालसमवेतत्वाद्यभावएव प्रसिद्धः तत्प्रतियोगितानवच्छेदकं कालिकसंबन्धावच्छिन्नं कालवृ-

कृष्णंभट्टीयं।

द्वृत्तित्वघटितलक्षणमुररीक्रियते। भट्टाचार्यैस्तद्विशेषितसाध्यवद्वृत्तित्वघटितं, स्वाधिकरणावच्छेदेन स्वस्मिन्वर्तते योऽभाव इत्याद्येतत् तत्रानुगतहेतुतावच्छेदकरूपेण हेतुनिवेशाद्व्याप्त्यैक्यसंभवात् स्वत्वेन तन्निवेश्यतद्भेदो न युज्यते। किंच साध्यवद्वृत्तित्वे हेतुतावच्छेदकसंबन्धनिवेशो व्यर्थः महानसीयधूमे वह्निमत्संयुक्तत्वाभावसत्त्वेऽपि तस्य कालिकादिसंबन्धेन वह्निमत्संबन्धतया तत्सामान्याभावासत्त्वेनाव्याप्त्यसत्त्वात्। व्यभिचारिणि व्यभिचारनिरूपकाधिकरणे साध्यासत्त्वेन तदवच्छेदेन साध्यसामानाधिकरण्याभाववत्त्वेनातिव्याप्त्यभावाच्च। अथ संयोगेन धूमवति पर्वतरूपकाले अयोगोलकीयवह्नेः स्वाधिकरणीभूतायोगोलकाद्यवच्छेदेनैव कालिकसंबन्धेन वृत्तेः काले वृत्तौ देशस्यावच्छेदकत्वात्। तथाचायोगोलकाद्यवच्छेदेन धूमवत्संबन्धत्वसामान्याभावो न वह्नौ वर्तत इति अतिव्याप्तेर्वृत्तौ हेतुतावच्छेदकसंबन्धनिवेश इति चेत्। सामानाधिकरण्यनिरूपकमेव तदवच्छेदकं अन्यत्तदभावावच्छेदकमिति लक्षणकृत्संमततया अयःपिण्डस्य तदभावावच्छेदकत्वात्। अन्यथा हेतुतावच्छेदकसंबन्धोपादानेऽपि तत्रैव कालिकेन हेतौ वह्नौ तदवच्छेदेन धूमवन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वाभावासत्त्वापत्तेः प्रतियोग्यनधिकरणधूमवद्भेदेन कालिकसंबन्धावच्छिन्नायोगोलकीयवह्न्यभाववद्धूमवन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वानिरूपकतैव तदभावे धूमवद्भिन्नस्यावच्छेदकत्वौचित्याच्च। नच तर्कालंकारमते सामानाधिकरण्यानिरूपकविधयावच्छेदकताविलक्षणावच्छेदकतानिवेशः। भट्टाचार्याणां तु तदनिवेशाद्धेतुतावच्छेदकसंबन्धनिवेश इत्युभयग्रन्थसामञ्जस्यमिति वाच्यम्। द्रव्यं गुणान्यत्वविशिष्टसत्त्वादित्यादौ सत्तानिष्ठद्रव्यवृत्तित्वावच्छेदकक्रियाया द्रव्यवृत्तित्वाभावानवच्छेदकतया अतिव्याप्तेः सर्वमते विलक्षणावच्छेदकतानिवेशावश्यकत्वात्। काले वृत्तौ देशस्यावच्छेदकत्वात् सामानाधिकरण्यनिरूपकदेशविधयावच्छेदकत्वस्याप्यन्यजातीयत्वाच्च। अन्यथा आत्मत्वे कालिकसंबन्धघटिताकाशत्वसामानाधिकरण्ये आत्मन एवाकाशत्ववज्जन्ये कालिकसंबन्धावच्छिन्नात्मत्वाभावे जन्यस्यैवच देशस्यावच्छेदकत्वं घटादेः तदभावावच्छेदकत्वं त्वात्मन इति सिद्धान्तभङ्गप्रसंगात्। प्रतियोग्यनवच्छेदकस्यैवाभावावच्छेदकत्वमिति सजातीयावच्छेदकताविषयकनियमस्य भङ्गात्। तस्मात्साध्यवद्वृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वविशेषणं निष्फलमेवेतिचेन्नैवम्।

त्तित्वत्वादिकमिति लक्षणसमन्वयः। हेतुतावच्छेदकसंबन्धेन यद्वृत्तिमत् तन्निष्ठतत्संबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतत्संबन्धावच्छिन्नतद्वस्तुप्रकृतहेतूभयाधिकरणतावत्सामान्यकत्वं वा वक्तव्यम् । आत्मभिन्नं ज्ञानवदन्यत्वादित्यादौ आत्माद्यवच्छेदेन घटत्वाभावादिनिष्ठस्यात्मान्यनिष्ठत्वाभावस्यानवच्छेदकत्वं घटत्वाभावज्ञानवदन्यत्वोभयाधिकरणतावत्सामान्यमिति लक्षणसमन्वयः। उभयाधिकरणत्वनिवेशाद्वह्निमान्धूमादित्यादौ धूमादिसंयोगिनः कपालादेर्घटनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेऽपि न दोषः। कपालादेः संयोगेन तद्घटानधिकरणतयोक्तोभयाधिकरणतावत्सामान्यानन्तर्गत-

कृष्णंभट्टीयं ।

तत्र तद्विशेषणनिवेशिनां हेतुवृत्तित्वं व्यर्थं। पर्वतरूपादौ साध्यवत्संबन्धत्वसामान्याभावासत्वात् । नापि पर्वतीयधूमे महानसावच्छेदेन धूमान्तरसंयुक्तस्वावयवावच्छेदेन धूमेवा साध्यवत्संबन्धत्वसामान्याभावः महानसस्वावयवयोरपि वह्निमत्वादिति । हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतात्वशुद्धाधेयतात्वयोर्व्याप्यव्यापकभावमात्रं पृथगखण्डोपाधित्वं चेति यथासन्निवेशे वैयर्थ्यमिति वालोच्य हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतोपादानं कृतम् । हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतैव संबन्धान्तरावच्छिन्नाधेयताभ्यो भिद्यत इत्युपगमेऽपि हेतुवृत्तित्वनिवेशिनां साध्यवद्वृत्तित्वे अनुपात्तमपि हेतुतावच्छेदकसंबन्धावच्छिन्नत्वमस्तीति सूचनायैव तदुपादानम् । तथासत्येव धूमान्तरेत्यादिक्रमेणाव्याप्तेः सार्थकत्वात्। नच हेतुवृत्तित्वोपादानेऽपि तत्राव्याप्तिर्न वार्यत इति वाच्यम् । हेतुतावच्छेदकावच्छिन्नवृत्तित्वस्य तदर्थत्वात् । अत्रातिप्रसक्तधर्मव्याप्यानुयोगितावच्छेदकत्वे बाधकाभावात् तादृशार्थकहेतुवृत्तित्वनिवेशेऽप्यव्याप्तेर्दुर्वारत्वमालोच्य स्वयं स्ववृत्तित्वनिवेशः कृतः । अथ हेतुवृत्तित्वं स्वनिष्ठत्वं वोपादीयतां यथा सन्निवेशेऽवैयर्थ्यात् हेतुतावच्छेदकसंबन्धावच्छिन्नत्ववैयर्थ्यं तु न हीयत इति चेत्, हेत्वधिकरणावच्छिन्नसाध्यवन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाभाववद्भिन्नत्वलक्षणघटकपदार्थपरिहारेण कतिपयपदार्थविशेष्यविशेषणभावव्यत्यासेनेदं लक्षणं कृतमिति सूचनाय तदुपादानात् । अत्र हेतुभेदेन व्याप्तिभेदात् उदक्षरत्वाच्च साध्यवद्वृत्तित्वाभावघटितं लक्षणान्तरमाह—हेतुतेति । वह्निमान् धूमादित्यादौ वस्तुपदेन शैवालादिकं न ग्राह्यं । तथासति तद्वस्तु प्रकृतहेतूभयाधिकरणाप्रसिद्धिः स्यात् । किंतु पर्वतादिनिष्ठतृणादिकमेव तत्र स्वावयवावच्छेदेन साध्यवद्वृत्तित्वाभावसत्वाल्लक्षणसमन्वयः । कालिकसंबन्धेन हेतौ हेतुतावच्छेदकसंबन्धेन वृत्तिमति घटादौ स्वावयवपरमाण्वाद्यवच्छेदेन वाच्यम् । ज्ञेयत्वादित्यादौ तथाविधघटत्वप्रकारकप्रमाविषयत्वादावुक्तरीत्या

त्वात्। अथवा हेतुतावच्छेदकसंबन्धेन यत्स्वाधिकरणं तदवच्छिन्नं

कृष्णंभट्टीयं।

घटाद्यवच्छेदेन विषयतासंबन्धेन हेतौ तादृशहेतुभिन्नघटादौ स्वाधिकरणभूतलाद्यवच्छेदेन च साध्यवद्वृत्तित्वाभावः प्रसिद्धः। धूमवान् वह्नेरित्यादौ महानससाधारणदीर्घदण्डरूपतद्वस्तुप्रकृतहेतूभयाधिकरणमहानसादेः साध्यवद्वृत्तित्वाभावानवच्छेदकत्वादतिव्याप्तेः सामान्यपदम्। उभयाधिकरणत्वनिवेशादित्यादिना स्वयमेव तद्वस्तुनिवेशं सार्थकयिष्यति। तेन व्यधिकरणधूमान्तरसंयुक्तस्वावयवावच्छेदेन साध्यवद्वृत्तित्वाभावसत्वाद्धूमेऽपि नाव्याप्तिः। प्रकृतहेत्वनिवेशे हेतौ धूमरूपतद्वस्त्वधिकरणकत्वसत्वेपि केवलान्वयिनि घटत्वप्रकारकप्रमाविषयत्वरूपतदधिकरणकत्वासंभवेनाव्याप्तिरतः तन्निवेशः। आत्मभिन्नं ज्ञानवदन्यत्वादित्यादौ घटत्वाभावे आत्मावच्छेदेन साध्यवद्वृत्तित्वाभाववत्वादव्याप्तिवारणमपि तत्प्रयोजनं। द्रव्यं विशिष्टसत्तात्वादित्यादौ विशिष्टसत्तानतिरिक्ततामते सत्तानिष्ठसाध्यवद्वृत्तित्वाभावानवच्छेदकत्वविरहादव्याप्तेः व्याप्त्यैक्यानुरोधेन च प्रकृतत्वनिवेशः। हेतुतावच्छेदकसंबन्धेन तद्वस्त्वधिकरणतानिवेशाद्धूमवत्कालसमवेतघटे साध्यवद्वृत्तित्वाभावसत्वेन कपालस्य तदवच्छेदकत्वेपि न क्षतिः। नच हेतुतावच्छेदकसंबन्धेन तद्वस्त्वधिकरणतानिवेशे वृत्तिमत्वमात्रनिवेशेपि निर्वाहसंभवाद्वृत्तौ हेतुतावच्छेदकसंबन्धेनेति व्यर्थमिति वाच्यम्। हेतुतावच्छेदकसंबन्धेन यद्वस्तु प्रकृतहेतूभयाधिकरणप्रसिद्धिः तद्वस्तुन एवोपादेयतया वृत्तिमत्वानिवेशेप्यदोषात्। तथाच यन्निष्ठसाध्यवद्वृत्तित्वाभावानवच्छेदकत्वं हेतुतावच्छेदकसंबन्धावच्छिन्नतन्निष्ठाधेयतानिरूपकत्वसहितयद्धर्मावच्छिन्नाधिकरणताव्यापकं तद्धर्मसत्वमात्रनिवेशे हेतुतावच्छेदकसंबन्धावच्छिन्नवृत्ति यद्यत् तदेव यच्छब्देनोपादेयमित्येतल्लाभार्थं तथोक्तिरिति। अथ धूमादिसंयोगिनः कपालादेः घटादिनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेऽपि धूमाधिकरणस्य वह्न्यादिरूपयत्किंचिद्वस्तुनिष्ठवह्निमत्संयुक्तत्वाभावानवच्छेदकतया लक्षणसमन्वयसंभवाद्धेतुतावच्छेदकसंबन्धावच्छिन्नतद्वस्तुमत्वं व्यर्थं। नच धूमवान् वह्नेरित्यादौ धूमवह्न्युभयाधिकरणस्य धूमनिष्ठसाध्यासामानाधिकरण्याभावानवच्छेदकत्वेपि सामान्यान्तर्गतायोगोलकस्य कालिकसंबन्धेन धूमाधिकरणतया तादृशावच्छेदकत्वादतिव्याप्तिविरहेपि जातिमान् भावत्वादित्यादौ सत्तावत्वप्रकारकप्रमाविषयत्वनिष्ठसाध्यसामानाधिकरण्याभावानवच्छेदकहेत्वधिकरणत्वादतिव्याप्तिरिति यद्यद्वस्तु विवक्षणीयं। एवंच तत्तद्वस्त्वन्तर्गतघटमादायाव्याप्तेर्वारणाय तद्विलक्षणमावश्यकमिति वाच्यम्। तथासति शैवालस्यापि यद्यच्छब्दान्तर्गततया तन्निष्ठसाध्यवद्वृत्तित्वाभावानवच्छेदकशैवालधूमोभयाधिकरणाप्रसिद्धेः। तत्सामान्यवृत्तित्वाभावे नाव्याप्तिरिति चेन्न। हेतुसमानाधिकरणत्वस्य यद्वस्तुविशेषणत्वात्।

स्ववृत्तिकान्यहेतुतावच्छेदकसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावविवक्षणान्न कश्चिद्दोषः । सर्वत्र सद्धेतावन्ततः प्रसिद्धेः साध्यसामानाधिकरण्याभाव एव स्ववृत्तिकान्यत्वसत्वेन लक्षणसमन्वयात् । वह्न्यादिनिष्ठधूमादिसामानाधिकरण्याभावेऽयोगोलकादिरिव तद्वृत्तित्वस्यापि अवच्छेदकसंबन्धावच्छिन्नवृत्त्यनवच्छिन्नहेतुतावच्छेदकसंबन्धावच्छिन्नसाध्यसामानाधिकरण्याभावकत्वं वा विवक्षणीयम् । इत्यादयः परिष्कारस्य पन्थानो द्रष्टव्याः ॥ **इति सार्वभौमपरिष्कारः संपूर्णः ॥**

इति श्रीगदाधरभट्टाचार्यविरचितव्याप्तिपञ्चकं संपूर्णम् ।

कृष्णंभट्टी ।

वस्तुतस्तु बहुव्रीहौ पूर्वपदार्थस्य विधेयतया यद्यद्वस्तु प्रकृतहेतूभयाधिकरणसामान्यं तद्वस्तुवृत्ति साध्यसामानाधिकरण्याभावानवच्छेदकमित्येवाभिप्रेतं । यत्र च धूमवत्काले तृणघटौ तत्र तृणधूमोभयवृत्तिघटनिष्ठसाध्यवद्वृत्तित्वाभावानवच्छेदकत्वेऽपि न क्षतिः । प्रत्येकमेकैकवस्तुघटितोद्देशे तद्वस्तुघटितविधेयाभावात् । एवंच व्यभिचारनिरूपकाधिकरणमात्रवृत्तितृणादेर्यद्यदर्थान्तर्गतत्वात्तमादायैवातिव्याप्तिविरहेऽपि तद्रूपभिन्नं गुणत्वादित्यादौ अतिव्याप्तिरतः सामान्यपदं । एवं च हेतुमद्वृत्तित्वं व्यर्थमेव । न चात्मभिन्नं ज्ञानवदन्यत्वादित्यादौ गगनात्मान्यतरभेदस्य यद्यदर्थान्तर्गतत्वात्तन्निष्ठसाध्यसामानाधिकरण्याभावाप्रसिद्धेरव्याप्तिरिति वाच्यम् । उद्देशघटकवस्तुनोपि कल्पद्वयेऽपि साध्यवद्वृत्तित्वाभाववत्वनिवेश इति दिक् । हेत्वधिकरणावच्छिन्नतदधिकरणत्ववदन्यत्वप्रवेश एव दीधितिकारोक्तदोषः प्रसज्यते । ननु तदवच्छिन्नस्ववृत्तिकान्यत्वनिवेश इत्याशयेनाह—अथवेति । हेत्वधिकरणावच्छिन्नरूपनिष्ठसाध्यसामानाधिकरण्यमादाय व्याप्तेः स्ववृत्तिकत्वनिवेशः । अत्र हेतुतावच्छेदकनिवेशः । हेत्वधिकरणावच्छिन्नस्ववृत्तिकान्यत्वस्थाने स्वनिष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्त्यनवच्छिन्नत्वनिवेशायोपक्रमते । **वह्न्यधीति ।** शैवालादिनिष्ठसाध्यवद्वृत्तित्वाभावस्य तन्निष्ठवृत्त्यवच्छिन्नत्वादव्याप्तिरतः स्व-

न्यायरत्नं ।

गोलकसाधारणदीर्घदण्डादिरूपवस्तुहेतूभयाधिकरणमहानसादेः साध्यवद्वृत्तित्वाभावानवच्छेदकत्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तेः सामान्यपदम् । केवलान्वयिन्यात्मभिन्नं ज्ञानवदन्यत्वादित्यादौ च घटत्वप्रकारकप्रमाविषयत्वघटत्वाभावादिरूपतदधिकरणत्वस्य हेतावभावात्प्रकृतहेतुनिवेशः । तद्वस्तुत्वावच्छिन्नोभयाधिकरणकधर्मवत्त्वनिवेशाद्व्याप्त्यैक्योपपत्तिः । उभयाधिकरणत्वनिवेशप्रयोजनं

कृष्णंभट्टी।

निष्ठत्वनिवेश इत्यादय इत्यादिना हेत्वधिकरणावच्छिन्नत्वं न साध्यसामानाधिकरण्याभावाधिकरणताविशेषणम्। किंतु हेत्वधिकरणसामान्यवच्छिन्नत्वं तद्भेदस्यैव। एवंच भेदस्यावृत्तितया गुणावच्छेदेन साध्यसामानाधिकरण्याभाववत्यां सत्तायां द्रव्यावच्छेदेन वर्तमानेऽपि तद्वद्भेदो न हेत्वधिकरणसामान्यावच्छिन्नः स्वप्रतियोगितावच्छेदकावच्छेदकस्य भेदानवच्छेदकत्वादिति द्रव्यं सत्वादित्यादौ नातिव्याप्तिः। मूलानुरोधेतु हेत्वधिकरणसामान्यावच्छिन्नसाध्यवद्वृत्तित्ववत्त्वमेव लक्षणम्। आत्मभिन्नं ज्ञानवदन्यत्वादित्यादौ साध्यसामानाधिकरण्याभावाधिकरणताया हेतुनिष्ठत्वाभावेऽपि घटत्वाभावादावात्मावच्छेदेन प्रसिद्धायाः तद्वद्भेदे हेत्वधिकरणसामान्यावच्छिन्नत्वस्य सत्वेन प्रथमस्य हेतौ साध्यवद्वृत्तित्वस्य व्याप्यवृत्तित्वेपि व्याप्यवृत्तेरवच्छेदकस्य लक्षणकृत्संमततया द्वितीयस्य च लक्षणस्य समन्वय इत्यस्य परिग्रहः। ननु हेतुतावच्छेदकसंबन्धावच्छिन्नावच्छेदकताकसाध्यवन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाभावाधिकरणभिन्नत्वमेव लाघवाल्लक्षणमस्तु। नचैवं वह्निमान् रूपादित्यादौ संयोगेन हेतौ वह्निमत्संयुक्तत्वाभावसत्वेऽपि हेतुतावच्छेदकसंयोगसंबन्धेन तदधिकरणाप्रसिध्या तादृशाभावे तत्तत्संबन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेद्यत्वासंभवेन तत्संबन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेद्यताशालिवह्निमत्संयुक्तत्वाद्यभावाधिकरणशैवालादिभिन्नत्वादतिव्याप्तिरिति वाच्यम्। हेतुतावच्छेदकसंबन्धेन संबन्धित्वस्यापि हेतौ निवेशनीयत्वात्। नच द्रव्यत्ववान् द्रव्यादित्यादौ संयोगेन हेतुतायां तत्संबन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेद्यताशालिसाध्यवन्निरूपितवृत्तित्वाभावाप्रसिध्याव्याप्तिरिति वाच्यम्। हेतुतावच्छेदकसंबन्धावच्छिन्नत्वस्थाने हेतुतावच्छेदकसंबन्धातिरिक्तहेतुप्रतियोगिकसंबन्धानवच्छिन्नत्वस्यैव निवेशनीयत्वात् द्रव्यत्वप्रकारकप्रमादिविशेष्यतायामेवैतादृशसंबन्धावच्छिन्नस्वरूपसंबन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेद्य-

न्यायरत्नं।

स्वयं वक्ष्यते। अधिकरणतायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशाद्धूमवत्कपालसमवेतघटे साध्यवद्वृत्तित्वाभावसत्त्वात्तदुभयाधिकरणकपालस्य तदवच्छेदकत्वेऽपि धूमादौ नाव्याप्तिः। अत्र च यन्निष्ठसाध्यवद्वृत्तित्वाभावानवच्छेदकत्वं तन्निष्ठहेतुतावच्छेदकसंबन्धावच्छिन्नतन्निष्ठाधेयतानिरूपकत्वसहिततत्संबन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणताव्यापकं तद्धर्मवत्त्वस्यैव व्याप्तित्वसंभवाद्धेतुतावच्छेदकसंबन्धेन यद्वृत्तिमदित्येतावदनर्थकमेव परंतु हेतुतावच्छेदकसंबन्धेन यद्वस्तु प्रकृतहेतूभयाधिकरणप्रसिद्धिस्तद्वस्त्वेव यत्पदेन ग्राह्यमिति सूचनायैव तदुक्तिरिति बोध्यम्। हेत्वधिकरणावच्छिन्नतदधिकरणतावदन्यत्वनिवेश एव दीधितिकारोक्तदोषप्रसक्तिर्न तु तदवच्छिन्नस्ववृत्तिकान्यत्वनिवेशे इत्याशयेनाह—**अथवेति**। हेत्वधिकरणावच्छिन्नस्ववृत्तिकान्यत्वस्थाने हेतुतावच्छेद-

कृष्णंभट्टी ।

ताशालिसाध्यवद्वृत्तित्वाभावप्रसिद्ध्या तदधिकरणभिन्नत्वस्य हेतौ सत्वात् । नन्वेवं संयोगेन द्रव्यसाध्यके तेनैव संबन्धेन प्रमेयहेतुकस्थले हेतुतावच्छेदकसंबन्धस्य तत्संबन्धावच्छिन्नावृत्तित्वाभावावच्छेदकत्वासंभवात् । तदितरस्य सकलस्यापि संबन्धस्य हेतुप्रतियोगितया तत्संबन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेद्यताशालिसाध्यवद्वृत्तित्वाभावाप्रसिद्ध्या अव्याप्तिरिति चेन्न । हेतुतावच्छेदकसंबन्धेन संबन्धित्वस्यावच्छेदकतानियामकसंबन्धघटकीभूतहेतुप्रतियोगितेत्यत्र हेतावेव निवेश्यतया हेतुतावच्छेदकसंबन्धातिरिक्तहेतुतावच्छेदकसंबन्धेन संबन्धि हेतुप्रतियोगिकसंबन्धानवच्छिन्नत्वलाभेन प्रकृते हेतुतावच्छेदकसंबन्धेन संबन्धियद्द्रव्यं तत्प्रतियोगिकातिरिक्तस्य स्वरूपादेः संसर्गस्य प्रसिद्धतया तदवच्छिन्नावच्छेदकताकसाध्यवद्वृत्तित्वाभावस्य द्रव्यत्वप्रकारकप्रमाविशेष्यत्वादावेव प्रसिद्धत्वादिति । एवंच न किंचेत्यादिदीधितिग्रन्थोक्तदोषः । कालो घटवान् घटादित्यादावपि हेतुतावच्छेदकीभूतकालिकातिरिक्ततत्संबन्धेन संबन्धिघटप्रतियोगिकसमवायादिसंबन्धानवच्छिन्नत्वस्य कालिकसंबन्धेन घटवन्निरूपिततत्संबन्धावच्छिन्नवृत्तित्वप्रतियोगिकगगनत्वप्रकारकप्रमाविशेष्यत्वतदभावाधिकरणकाभावनिष्ठावच्छेद्यतानिरूपितस्वरूपसंबन्धावच्छिन्नावच्छेदकतायां प्रसिद्धत्वेन तथाविधाभावाधिकरणभिन्नत्वस्य घटत्वावच्छिन्ने वर्तमानतया लक्षणसंगतिरिति चेन्न । कालिकसंबन्धेन घटसाध्यके तेनैव संबन्धेन प्रमेयहेतुकस्थले अव्याप्तितादवस्थ्यात् । अवृत्त्यवच्छेदेन गगनत्ववृत्तितथाविधाभावावच्छेदकत्वेपि तथाविधातिरिक्तसंबन्धावच्छिन्नत्वसत्वेन तथाविधसंबन्धानवच्छिन्नावच्छेदकत्वस्याप्रसिद्धत्वादिति दिक् ॥

इति कृष्णंभट्टीये सार्वभौमपरिष्कारः ॥

न्यायरत्नं ।

कसंबन्धावच्छिन्नवृत्त्यनवच्छिन्नत्वनिवेशायोपक्रमते—**वह्न्यादीति** ।

विदुषां कण्ठभूषायै **रघुनाथेन** निर्मिते ।
संन्यायरत्ने सम्पूर्तिमगमत्**पञ्चलक्षणी** ॥

इति मीमांसान्यायपञ्चास्य**श्रीमद्राघवाचार्य**शिष्यस्य **पर्वते** इत्युपनामकस्य **रघुनाथस्य** कृतौ गादाधरीपञ्चवादटिप्पण्यां **न्यायरत्नाभिधायां** सार्वभौमग्रन्थान्तपञ्चलक्षणी समाप्ता ॥

न्यायपारिभाषिकशब्दकोशः ।

अघटकत्वम्—१ स्वाविषयकप्रतीतिवृत्तितत्तन्निरूपितविषयताकत्वम् । २ तद्विषयत्वाव्यापकविषयतावत्त्वम् ।

अतिव्याप्तिः—लक्ष्यतावच्छेदकसमानाधिकरणत्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यम् ।

अधिकरणत्वम्—१ यथार्थविशिष्टधीविशेष्यत्वम् । २ विषयताविशेष इति केचन ।

अनतिरिक्तत्वम्—स्वान्यूनवृत्तितत्कत्वम् ।

अनवस्था—अव्यवस्थितपरम्परारोपाधीनोऽनिष्टप्रसङ्गः ।

अनवस्थितिः—क्लृप्तवस्तुसजातीयवस्तुपरंपराकल्पनस्य विरामाभावः ।

अनित्यत्वम्—प्रतियोगितासंबन्धेन ध्वंस[1]वत्त्वम् ।

अनुमितिः—व्याप्तिविशिष्टपक्षधर्मत्वविषयताशान्तिनिश्चयत्वावच्छिन्नकारणतानिरूपितकार्यत्वे सति ज्ञानम् ।

अनेकाश्रितगुणत्वम्—स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणगुणत्वम् ।

अन्यतमत्वम्—भेदकतावच्छिन्नप्रतियोगिताकभेदवत्त्वम् ।

अन्यतरत्वम्—भेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्वम् ।

अर्थान्तरम्—१ प्रकृतानाकाङ्क्षितार्थाभिधानम् । २ प्रकृतोपयुक्तार्थमुपेक्ष्यासंबद्धार्थाभिधानम् ।

अवच्छिन्नत्वम्—१ 'इदमेतद्विशिष्टे एतत्प्रकारकम्' इति प्रतीतिसाक्षिकः स्वरूपसंबन्धविशेषः । २ 'इदमेतद्विशेष्यकत्वांशे एतत्प्रकारकं' इति वा ।

अवच्छेदः—प्रतियोगी । क्वचित् व्याप्तिः । क्वचित् इयत्ताकरणम् । क्वचित् अवधारणम् ।

अव[2]च्छेदकत्वम्—१ प्रतियोग्यंशप्रकारीभूतधर्मत्वम् । २ अन[3]तिरिक्तवृत्तित्वम् । तच्च व्यावर्तकत्वसामानाधिकरण्य, स्वनिष्ठावच्छेदताकत्व एतत्त्रितयसंबन्धेन यत्किंचिद्धर्मविशिष्टत्वम् ।

अवच्छेद्यत्वम्—अवच्छिन्नवदेवास्यार्थः ।

---

१ अयंच नित्यत्वपरिष्कारः प्रागभावानङ्गीकारपक्षे ध्वंसस्य नित्यत्वपक्षेऽपि संगच्छते ।

२ समानाधिकरणयोरेवावच्छेद्यावच्छेदकभावः ।

३ अन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकत्वम् ।

अव्याप्तिः—लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वम् ।
अव्याप्यवृत्तित्वम्—१ स्वात्यन्ताभावसमानाधिकरणत्वम् ।
२ स्वप्रतियोगित्व–स्वसामानाधिकरण्यैतदुभयसंबन्धेनाभाववत्त्वम् ।
असंभवः—लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम् ।
आकाङ्क्षा—१ स्वरूपयोग्यत्वेसति अजनितान्वयबोधजनकत्वम् । (ख)
२ यत्पदस्य यत्पदाभावप्रयुक्तमन्वयबोधाजनकत्वं तत्पदसमभिव्याहृतत-त्पदत्वम् ।
आधेयता—आधेयमित्याकारकप्रतीतिनियामकधर्मविशेषः ।
आहार्यम्—स्वविरोधिधर्मधर्मितावच्छेदकं स्वप्रकारकं ज्ञानम् ।
उत्पत्तिः—१ स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षणसंबन्धः ।
२ स्वाधिकरणक्षणध्वंसानधिकरणक्षणसंबन्धो वा तदधिकरणक्षणावृत्ति-त्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वम् ।
उत्सर्गः—स्वा[1]नुयोगिकप्राप्तवस्तुप्रतियोगिकसंबन्धविरहेच्छा ।
उपलक्षणम्—विवक्षितान्वयप्रतियोगितानवच्छेदकत्वे सति व्यव-च्छेदकम् ।
उपायः—साक्षात् परंपरया वा यत्किंचित्कार्यजनने समर्थः ।
एकत्वम्—स्वस[2]जातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वम् ।
एकैकवृत्तिगुणत्वम्—स्वाश्रयान्योन्याभावव्यापकात्यन्ताभावप्रतियोगि-गुणत्वम् ।
औपयिकत्वम्—व्याप्तिग्रहोपायप्रतिपादनघटकोपायविषयकप्रतिपत्तिप्रयो-जकत्वम् ।
कर्मधारयः—क्रमिकपदार्थयोरेकस्य धर्मिणि तादात्म्येनापरनाम्नोऽर्थस्या-न्वयबोधं प्रति समर्थः ।
कादाचित्कत्वम्—सत्वे सति किंचित्कालवृत्त्यभावप्रतियोगित्वम् ।
कालोपाधिः—१ क्षणदिनादिव्यवहारविषयत्वनियामको धर्मः ।
२ क्रिया[3]मात्रं वा ।

---

१ अत्र स्वपदेन देवदत्तादेर्ग्रहणम् ।

२ साजात्यं च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदक-रूपेण ज्ञेयम् ।

३ (१) स्वजन्यविभागप्रागभावावच्छिन्नं कर्म । तदर्थश्च स्वं (रविक्रिया) तज्जन्यो विभागः (रविपूर्वदेशयोर्विभागः) तस्य प्रागभावः (स तादृशक्रि-योत्पत्तिकाले तिष्ठति) तदवच्छिन्नं (तदेव कर्म) इति ।

(२) पूर्वसंयोगावच्छिन्नविभागः । सच स्वजन्यविभागनाश्यपूर्वसंयोगवि-शिष्टः स्वजन्यविभागः ।

केवलान्वयित्वम्—असद्विपक्षत्वम् ।

ग्रन्थः—एकार्थप्रतिपादकवाक्यसन्दर्भः ।

ग्रहः—सामान्यसंबन्धावच्छिन्नप्रकारतानिरूपितप्रकारतासमानाधिकरणगुणत्वव्याप्यजातिमत्त्वम् ।

घटकत्वम्—१ तद्विषयताव्यापकविषयतावत्त्वम् ।

२ (ख) स्वभिन्नत्व—स्वव्यापकत्व एतदुभयसंबन्धेन विषयताविशिष्टविषयतावत्त्वम् ।

चरमत्वम्—१ स्वसजातीयपदार्थप्रागभावानधिकरणत्वम् ।

२ स्वेतरभावकारणानपेक्षकार्यकत्वम् ।

तत्पुरुषः—१ स्वघटकैकपदार्थनिष्ठद्वितीयाद्यर्थावच्छिन्नापरपदार्थबोधकसमासत्वरूपधर्मवत्त्वम् ।

२ समासप्रयुक्तलक्षणाशून्योत्तरनामकत्वे सति लुप्तद्वितीयादिविभक्तिकपूर्वनामकसमासः ।

तद्व्यक्तित्वम्—तत्तत्तादात्म्यविशिष्टधर्मः ।

तर्कः—अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहः । [2]

द्वित्वम्—१ अपेक्षाबुद्धिविशेषविषयत्वम् । [3]

२ अपेक्षाबुद्धिजन्यो गुणविशेषः । [4]

निराकरणम्—तत्तद्विषयकज्ञाने मध्यस्थस्य अप्रामाण्यव्यावर्तकव्यापारः ।

निरूपकत्वम्—१ स्वरूपसंबन्धविशेषः ।

२ तज्ज्ञानजनकज्ञानविषयत्वम् ।

निरूपणम्—१ ज्ञानानुकूलशब्दप्रयोगः ।

---

(३) पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावः । सच स्वजन्यविभागजन्यपूर्वसंयोगनाशावच्छिन्नः स्वजन्योत्तरसंयोगप्रागभावः ।

(४) उत्तरसंयोगावच्छिन्नं कर्म च स्वनाशक उत्तरसंयोग इत्यर्थः । अनेनोपाधिचतुष्टयेन क्षणचतुष्टयव्यवहार उपपद्यते । एवं लक्षणान्तरव्यवहारनियामकं कर्मान्तराद्यूह्यम् । महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदा सोऽनायत्याध्वंसेनैव उपपादनीय इति ।

१ इदं प्रलयादौ ।

२ कारणोपपत्तित ऊह इति लक्षणम् । अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति प्रयोजनकथनम् ।

३ इदं तु व्यासज्यवृत्ति । पर्याप्तिसंबन्धेन द्वयोरेव द्रव्ययोस्तिष्ठति ।

४ इदं स्वरूपसंबन्धेन पदार्थमात्रे तिष्ठति ।

२ लक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानजननानुकूलव्यापारः ।

३ परमतनिराकरणपूर्वकसिद्धान्तकथनम् ।

निरूपितत्वम्—स्वरूपसंबन्धविशेषः ।

तज्ज्ञानजनकज्ञानविषयत्वम् ।

निर्णयः—१ तदभावाप्रकारकं तत्प्रकारकं ज्ञानम् ।

२ विमृश्य[1] पक्षप्रतिपक्षाभ्यामर्थावधारणम् ।

निश्चयः[2]—१ तद्भावप्रकारतानिरूपिततत्प्रकारतानिरूपितविशेष्यताशालिज्ञानम् ।

२ तद्वद्विशेष्यकत्वा[3]वच्छिन्नतदभावप्रकारताशून्यतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानम् ।

निष्पन्नत्वम्—अतीतकृतिविषयत्वम् । अतीतत्वं च स्वाधिकरणकालवृत्तिकृतिजन्यक्रियाजन्यफलानुकूलक्रियानुकूलत्वविशिष्टप्रतियोगित्वसंबन्धेन वर्तमानध्वंसविशिष्टत्वम् ।

परीक्षा—परमतनिराकरणपूर्वकस्वमतस्थापनम् ।

(ख) यथावल्लक्षितस्यैतल्लक्षणमुपपद्यते न वेति विचारः ।

पुनरुक्तिः—अनुवादान्यत्वेसति निष्प्रयोजनं पुनरभिधानम् ।

प्रतिपादनम्—प्रतिपत्तिजननानुकूलशब्दप्रयोगः ।

प्रतियोगित्वम्—१ स्वरूपसंबन्धविशेषः ।

२ निरूपकत्वम् ।

प्रतियोगितावच्छेदकः—१ येन रूपेण यस्याभावादौ प्रतियोगिता बोध्यते स धर्मः[4] ।

२ येन संबन्धेन प्रतियोगिताया अभावांशे भानं ससंबन्धः ।

प्रतिसंधानम्—अनुचिन्तनम् ।

प्रतीक्षा—भविष्यत्काले कर्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः ।

प्रमाण्यम्—तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशाल्यनुभवत्वम् । विशेष्यतावच्छेदेन तद्धर्मावच्छिन्नप्रकारतासंबन्धेन तद्धर्मवत्त्वं तत्संबन्धानुयोगिविशेष्यकत्वावच्छिन्नतत्प्रतियोगिकसंबन्धावच्छिन्नप्रकारकज्ञानत्वम् ।

---

१ इदं जल्पवितण्डामधिकृत्योक्तम् ।

२ संशयभिन्नज्ञानमिति सर्वेषां सिद्धान्तः । निश्चयत्वं न जातिः, प्रत्यक्षत्वादिना सांकर्यात् । किंतु विषयताविशेषः ।

३ महानसोयं वह्निमान् नवा पर्वतो वह्निमान् इत्यत्र नातिप्रसंगः ।

४ स च क्वचिदेकः क्वचिदनेकः । तत्र वह्निर्नास्तीत्यादौ वह्नित्वमेकम् महानसीयवह्निर्नास्तीत्यादौ महानसीयत्वं वह्नित्वं चेत्युभयम् ।

अनधिगतार्थग्राहित्वमिति मीमांसकाः ।

प्रयोजकत्वम्—तन्निष्ठान्यथासिद्धिभिन्नान्यथासिद्धिशून्यत्वे सति कार्याव्यवहितपूर्ववृत्तित्वम् ।

बहुव्रीहिः—नियमतः[1] समासप्रयुक्तलाक्षणिकोत्तरनामकसमासः ।
अन्यपदार्थप्रधानो बहुव्रीहिरिति शाब्दिकाः ।

महाकालः—अनवच्छिन्नः कालः, उपाध्यनवच्छिन्नः कालः ।

युक्तिः—साधकबाधकप्रमाणोपन्यासः ।
अनुमानं तच्च साध्यसाधकलिङ्गज्ञानम् ।
न्यायः[2] इति मीमांसकाः ।

लघुत्वम्—शीघ्राल्पोपस्थितिजनकत्वम् ।

लक्षणम्—१ यो धर्मो लक्ष्ये व्याप्या वर्तते न वर्तते चान्यत्र स धर्मः ।
२ लक्ष्यतावच्छेदकसमनियतत्वम् ।

लक्षणा—स्वशक्यसंबन्धः ।
शब्दनिरूपितोऽर्थनिष्ठशाब्दबोधप्रयोजकः शब्दार्थसंबन्धः ।

विकल्पः—द्वैविध्यम् ।

विग्रहः—वृत्त्यर्थावबोधकं वाक्यमिति केचन । समासादिवृत्तिसमानार्थकवाक्यविशेषः इति वैयाकरणाः ।

विनिगमकम्—अन्यतरपक्षपातिनी युक्तिः ।

विशेषणम्—स्वरूपसंबन्धरूपः सन्निकर्षविशेषः ।
प्रकारताख्यो विषयताविशेषः ।

वैयधिकरण्यम्—१ तदनधिकरणवृत्तित्वम् ।
२ तदधिकरणावृत्तित्वम् ।

वैशिष्ट्यम्—संबन्धः यस्य यत्र यः संबन्धः स एव तत्र तस्य वैशिष्ट्यम् ।

व्यभिचारः—कार्यकारणभावभङ्गः ।

व्यवस्था—१ मर्यादा । सा च शास्त्रविहितस्य विषयान्तरपरिहारेण विषयविशेषे स्थापनम् ।
२ स्वाभिधेयापेक्षावधिनियमः[3] इति वैयाकरणाः ।

---

१ राजपुरुष इत्यादिवारणाय उत्तरेति नामविशेषणम् । अर्धपिप्पलीत्यादितत्पुरुषवारणाय नियमतः इति पदम् । तत्पुरुषे तु न नियमतः ।

२ न्यायो नाम श्रुत्योः परस्परविरोधे निर्णायकप्रमाणम् ।
"श्रुत्योर्विरोधे न्यायस्तु बलवानर्थनिर्णये ।
युक्तिहीनविचारे तु धर्महानिः प्रजायते ॥" इति ।

३ तदर्थश्च दिग्देशकालैरवधिनियमभेदरूपत्वम् ।

व्यापकत्वम्—यन्निरूपित[1]साध्यतावच्छेदकताघटकसंबन्धसामान्ये प्रतियोगित्वाधिकरणयत्किंचिद्व्यक्त्यनुयोगिकत्वाभावः तदन्यत्वम्।

व्यापकत्वम्—१ तत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्।

२ तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वम्।

३ निरुक्त[2]प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये सत्संबन्धावच्छिन्नत्व-यद्धर्मावच्छिन्नत्व-एतदुभयाभावः तेन संबन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वम्।

व्याप्तिः—अनौपाधिकः संबन्धः। अनौपाधिकत्वं तु यावत्स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिकात्यन्ताभावासमानाधिकरणात्यन्ताभावात्प्रतियोगिप्रतियोगिकात्यन्ताभावासमानाधिकरणसाध्यसामानाधिकरण्यम्।

व्यासज्यवृत्तित्वम्—स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वतादात्म्यैतदुभयसंबन्धेन यत्किंचित्पदार्थविशिष्टत्वम्।

व्युत्पत्तिः—शास्त्रजन्यशब्दार्थज्ञानादिसंपाद्यसंस्कारविशेषः।

संबन्धः—स्वभिन्नसंबन्ध्याश्रितस्वभिन्नप्रतियोगिकः पदार्थः।

संसर्गमर्यादा—समभिव्याहारज्ञानकार्यतावच्छेदककोटिप्रविष्टसंबन्धता।

समनियतत्वम्—व्याप्यत्वे सति व्यापकत्वम्।

समारब्धत्वम्—वर्तमानकालवृत्तिध्वंसप्रतियोगिसमानाद्यकृतिविषयत्वम्।

वर्तमानकालवृत्तिध्वंसप्रतियोगिप्रमाणतत्वविवेचकस्वविषयककृतिध्वंसासमानकालीनस्वविषयककृतित्वम्।

मुसदा[3]यत्वम्—१ अनेकपर्याप्तो धर्मः।

२ त्रित्वादिपर्याप्तसंख्याविशेषः।

सामानाधिकरण्यम्—१ प्रतियोगितासंबन्धेन तद्वदनुयोगिकत्वम्।

२ स्वावच्छेदकी[4]भूतो यः कालः तदवच्छिन्ना या स्वविशिष्टनिरूपिता यत्किंचिद्व्यक्तिनिष्ठाऽधेयता सा।

सुषुप्तिः—पुरीतता मनःसंयोगः।

स्वरूपम्—स्वभावविशेषः।

स्वात्मकः पदार्थः।

---

१ इदं प्रतियोगिताव्यापकत्वम्।

२ इदं साध्यस्य हेतुव्यापकत्वम्।

३ प्रत्येकानतिरिक्त इति नैयायिकसिद्धान्तः।

४ इदं एकक्षणावच्छिन्नसामानाधिकरण्यम्।

संस्कृतनूतनपुस्तकानि ।

कारिकावली ।

सिद्धान्तमुक्तावलीसंवलिता ।

दिनकरीव्याख्या-रामरुद्रीव्याख्याभ्यां सनाथीकृता ।

न्यायशास्त्रप्रविविक्षूणां मुक्तावलीसहितकारिकावल्येवादावादरणीयेति सुप्रसिद्धं सर्वेषाम् । परमुभयोरप्यतिगम्भीरार्थत्वेन दुरूहत्वादध्येतॄणामध्यापकानां च भवत्येव व्याख्यान्तरापेक्षेति तेषां सौकर्यायाऽयं ग्रन्थः सुप्रसिद्धाभ्यां शिरोनिर्दिष्टव्याख्याभ्यां संयोज्य टिप्पण्यादिभिश्च सम्यक्परिष्कृत्य मुद्रितोऽस्ति ।

मूल्यं २॥ रु., मार्ग. ८ आ.

कारिकावली ।

(सिद्धान्तमुक्तावलीसहिता)

नास्त्यविदितमेतत्कृतगीर्वाणभाषापरिचयानां विशेषतश्च भारतीयानां यत्किल सकलप्रकरणमौलिभूता सिद्धान्तमुक्तावलीभासिता कारिकावली न्यायसिद्धान्तं करतलगतमिव प्रकाशयन्ती गादाधरीजागदीशीप्रभृतितत्त्वचिन्तामणिदीधिति व्याख्याध्ययनयोग्यतामादधात्यध्येतॄणामिति । सेयमस्माभिर्दिनकरीव्याख्यया पाठान्संवाद्य विषमस्थलटिप्पणीनिवेशनपुरःसरं प्रकाशिता.

मूल्यं ६ आ., मार्ग. १ आ.

न्यायलीलावती ।

श्रीमद्वल्लभाचार्यविरचिता ।

मैथिलदेशीयप्राचीनमहानैयायिकश्रीमद्वल्लभाचार्यविरचितोऽयं वैशेषिकदर्शनसारभूतो न्यायलीलावतीग्रन्थोऽस्माभिर्गीर्वाणविद्यारसिकजनविनोदाय महता प्रयासेन संपाद्य संमुद्र्य प्रकाशितः । अस्मिन्ग्रन्थे वैशेषिकदर्शनप्रसिद्धपदार्थानां मण्डनं मतान्तरखण्डनं च विद्वज्जनमहनीयाभिर्युक्तिभिः कृतमस्ति । श्रीमद्गङ्गेशोपाध्याय-श्रीरघुनाथतार्किकशिरोमण्यादिभ्योऽपि प्राचीनतरो वल्लभाचार्यस्तस्यायं ग्रन्थोऽद्यावधि क्वापि न केनापि साकल्येन मुद्रयित्वा प्राकाश्यं नीतः । अतो दार्शनिकविद्यारसिकैरवश्यं संग्राह्यमिदं ग्रन्थरत्नम् ।

मूल्यं १२ आ., मार्ग. २ आ.